Digitized by Google

Digitized by Google

0
4
5160

UJJVALADATTA'S

COMMENTARY ON THE UṆĀDISŪTRAS.

EDITED FROM A MANUSCRIPT
IN THE LIBRARY OF THE EAST INDIA HOUSE

BY

THEODOR AUFRECHT.

BONN:
ADOLPH MARCUS.
1859.

Digitized by Google

Digitized by Google

G.H.C.(?)

TO

H. H. WILSON Esq.,

BODEN PROFESSOR OF SANSKRIT IN THE UNIVERSITY OF OXFORD,

ETC. ETC. ETC.

THIS VOLUME IS RESPECTFULLY DEDICATED

BY THE EDITOR.

Digitized by Google

PREFACE.

The *Uṇâdisûtras* are rules for deriving, from the acknowledged verbal roots of the Sanskrit, a number of appellative nouns, by means of a species of suffixes, which, though nearly allied to the so-called *kṛits*, are not commonly used for the purposes of derivation. They take their name from the suffix *uṇ* (that is *u* with an indicatory *ṇ*), by which the words *kârú*, *vâyú*, *pâyú*, *jâyú*, *mâyú*, *svâdú*, *sâdhú*, *âçú*, are formed in the first *sûtra*. A peculiarity of all words derived by an *uṇâdi* is, that, whether they be substantives or adjectives, they do not express a general or indefinite agent, but receive an individual signification, not necessarily resulting from the combination of the suffix with a verbal root. If words like *kâru* from *kṛi*, 'to do', or *vâyu*, from *vâ*, 'to blow', meant only 'doing', 'blowing', or 'the doer', 'the blower', there would have been no necessity for the native grammarians to separate the *uṇâdi*-words from those formed by the common laws of derivation. But the fact that 'the doer', 'the blower', have been individualised into 'an artisan', 'the wind', appeared sufficiently important to warrant the collection of such words as these in a separate treatise.*) Besides,

*) *Kâru* seems to have been intentionally placed at the beginning of the work, in order to show, by its meanings of 'doing' and 'an artisan', the transition from a *kṛit* to an *uṇâdi*.

Digitized by Google

टायनो नैरुक्तसमयश्च, "(All) nouns derive their origin from verbs; so says *Çâkaṭâyana*, and so agree all commentators (of the Vedas.)" With this sentence we must combine a *kârikâ* in *Patanjali's* commentary on *Pâṇini* III, 3, 1:

नाम च धातुजमाह निरुक्ते

Pat. नाम खल्वपि धातुजमेवाहुर्नैरुक्ताः ।

व्याकरणे शकटस्य च तोकं ।

Pat. वैयाकरणानां च शाकटायन आह । धातुजं नामेति ॥

"The noun is derived from a root, says the author of the *Nirukta* and *Çâkaṭâyana* in his grammar." *) Honour to these grammarians! Their efforts could not, indeed, be crowned with full success, owing to

---

*) *Kaiyata:* अन्यैरप्याचार्यैः शब्दानां प्रकृत्यादिविभागेन व्युत्पादनमभ्युपगतमित्याह । नामेति । तोकमित्यपत्यमित्यर्थः ॥ "Other grammarians too agree in deriving nouns, by dividing them into root and suffix, etc." *Nâgojî:* ननु तेषामेवं व्युत्पादनं कैर्वैयाकरणैः कृतमित्याशंक्याह भाष्ये नाम चेत्यादि । तद्व्याचष्टे । नाम खल्वपीति । नाम धातुजमित्येवमाहुर्नैरुक्ता इत्यक्षरार्थस्तदाह । अन्यैरित्यादिना । पाणिनेस्तु तान्यव्युत्पन्नान्येवेति भावः । इदं चायनेयोति सूत्रे भाष्ये स्पष्टं । एवं च कृवापेत्याद्युणादिसूत्राणि शाकटायनस्येति सूचितं । धातुजं नामेति निरुक्त आह निरुक्तकारः शाकटायनश्च स्वकृते व्याकरणे ॥ "It is in order to solve the doubt as to which grammarians derived the *unâdis* from verbal roots, that the author of the *kârikâ* says: "*the noun is derived etc.*" This is explained by *Patanjali:* "*the commentators declare that the noun also has originated from a verb, etc.*" *Kaiyata*, again, comments on it in this way: "*Other grammarians too agree etc.*"; by which he (Pat.) means to say, that *Pânini* considers them as not derived, a view which is distinctly stated by *Patanjali* in his commentary on P. VII, 1, 2. Hence it would appear that *Patanjali* considered *Çâkaṭâyana* as the author of the *unâdisûtras*. etc."

the circumstance that even a language so old and transparent as the Sanskrit has lost a great many verbal roots, and has frequently modified the original meaning of those still in existence. Nevertheless, they have the undeniable merit of having been the first to teach the method, which alone can lead to a right understanding of an important part of the Sanskrit vocabulary. It is almost incredible, that grammarians of two thousand years ago, without a knowledge of any other language but their own, should in several points of grammar, but more especially in that of derivation, have the advantage over many philologers of the present day, who are still inclined to look upon the oldest words of the Greek, Latin, and Teutonic languages, as *avyutpannâni prâtipadikâni*, "crude forms without origin."

We have no direct tradition as to the author of the *sûtras*. They were composed before the time of *Pâṇini*, as they are referred to by him in two different passages of his grammar. The fact, however, that both *Yâska* and the author of the above quoted *kârikâ* specify *Çâkaṭâyana* as the grammarian who derived all nouns from verbs, speaks in favour of *Nâgoji's* conjecture that the authorship is to be attributed to *Çâkaṭâyana*. Nor is this supposition entirely unsupported by the evidence of the *sûtras* themselves. In one place (II, 38) we are told that the people of the north used the word *kârshaka* for 'a husbandman'; in another (IV, 128), that they employed *kâri* in the meaning of 'an artisan'. This distinction refers to a period of the language, of which no mention is made

Digitized by Google

by any grammarian after *Pâṇini.* In another rule (III, 144) we find the name of *Câkravarmaṇa,* an old grammarian, who is only once more quoted, namely in *Pâṇini* VI, 1, 130. It is of some importance also, that the author of the *sûtras* considers *açman* (stone) and *bhuvana* (world) as Vaidic, whereas they are treated by *Pâṇini* as words of common occurrence.*) These facts, even when taken collectively, furnish no decisive evidence as to the authorship of the *sûtras,* but they show, at all events, that they were composed a considerable time before *Pâṇini.*

In *Vimala's Rûpamâlâ* — a Sanskrit grammar, arranged very much after the fashion of the *Kaumudîs,* the only copy of which extant in Europe (East India House Libr. 1666) is dated A. D. 1381 — I find the statement that *Vararuci* is the author of the *uṇâdisûtras:* उणादयो बहुलं ॥ संज्ञाविषये स्युः ॥ ताभ्यामन्यत्रोणादयः ॥ संप्रदानापादानाभ्यामन्यस्मिन्नर्थे स्युः । लक्ष्यानुसरणोन्नेया **) अनुबंधा उणादिषु । बहुलोक्त्या प्रसाध्यानि तेषु कार्यान्तराणि च । उणादिस्फुटीकरणाय वररुचिना पृथगेव सूत्राणि प्रणीतानि । तद्यथा । कृवापाजिमिस्वदिसाध्यशूभ्य उण् ॥ This assertion, which makes *Vararuci* older than *Pâṇini,* has no claim to probability.

The *uṇâdisûtras* have not been handed down to us in their original form. It was not the intention of the author to give a complete list of all the *uṇâdi-*

---

*) *Çakaṭa,* the name of *Çâkaṭâyana's* family, is placed, in *sûtra* IV, 81, at the beginning of a *gaṇa.* This is perhaps accidental, but may be of some importance, if further proofs should be forthcoming.

**) MS. लक्ष्यानुसारेणोन्नेया.

Digitized by Google

words, but merely to collect the most important of them. Henco we frequently meet with the sentence: बहुलमन्यत्रापि "in various other words too", or अन्येभ्योऽपि दृश्यंते "the same suffixes are found in other words too". Very often he contented himself with pointing out a single specimen of words formed with a certain suffix, of which he had treated in preceding *sûtras* (*gaṇâs*). Compare अघ्न्यादयश्च, अब्दादयश्च, अलीकादयश्च, अश्वादयश्च, उलूकादयश्च, उल्वादयश्च; अशित्रादिभ्य इत्रोत्रौ, etc. etc. He thereby left later grammarians at liberty to make their own additions, which they did to a great extent; but they were at the same time unscrupulous enough to add to the number of roots in several rules, to supply new *sûtras*, and to alter the form of the *anubandhas*, or indicatory letters. This accounts for some words appearing in the *sûtras*, which could hardly have formed a part of the Sanskrit vocabulary at the period we have assigned to their composition. Two words may serve as instances. In chapter III, we find the *sûtra* दीङो नुट् च, by which the word *dînâra*, "a dînâr", is formed. This term, however, derived from the Latin *denarius*, was introduced into India at a comparatively recent date, and we are actually told that the above mentioned rule was wanting in two of the earlier commentaries. *Mihira* appears now in I, 52, but this name for "the sun", corrupted from the Persian *mihr*, was hardly known in Sanskrit before our era. Should we ever arrive at a critical knowledge of the Sanskrit vocabulary, — and a good foundation is being laid in the excellent Dictionary of Boehtlingk and Roth, — we shall be able to point

Digitized by Google

out several other words of equally late origin. But it would be hypercritical to call in doubt the antiquity of the *uṇâdisûtras*, simply because they now contain some words of comparatively modern growth. Wherever we find, according to Ujjvaladatta's statement, that either a whole rule or part of one was wanting in earlier commentaries, we may safely conclude that it did not exist in the original treatise. Rules of this description are I, 9. 26. 57—63. 84. III, 25. 91. 101. 140. IV, 155. 185 (where *tirṭa* is a later addition).

The author of the *sûtras* mentions in only a few instances the meaning of the words, the formation of which is given in his treatise. These are: *aksha, adhama, anna, aptas, abjas, ambhas, arjuna, arṇas, arbhaka, arvan, arças, avadya, avama, âgas, îçvara, uru, enas, ojas, kâdamba, kâri, kṛishṇa, canas, jaghana, nabhas, patanga, pâka, pâjas, pâthas, pṛithuka, prahi, yaças, rahas, ripta, rekṇas, repha, lipta, varpas, çârikâ, çârnga, çiras, çepas, skandhas.* Taken as they mostly were from the literary language of his own time, he might expect that they would be universally known. As to words occurring only in the Vedas, — and of these he mentions comparatively few, — he could no doubt refer to special treatises. But in the course of time some branches of literature disappeared, a number of words became antiquated, and the tradition as to their meaning was either entirely lost or corrupted. When commentators arose to explain the *uṇâdisûtras*, they found the greater part of the words contained in them still employed

in the literature of their age, or recorded in older dictionaries. But an unknown residuum remained, and to these, whenever tradition failed them, they were bold enough to assign quite arbitrary significations. By a reference to older writings, of which they had less knowledge than we possess at present, we are in many cases enabled to control them and to lay bare the absurdity of their inventions. Every page of the accompanying glossary contains a number of significations of which no trace is to be discovered in any department of Sanskrit literature that has come down to our times. These, as well as words which occur nowhere else but in the *uṇâdisûtras*, ought to be received with extreme caution, and distinguished from those of good authority. Any lexicographer of the present day, who should neglect this, would deceive himself as much as others. Another fault of the commentators is, that they attribute to many *uṇâdi*-words — sometimes in the face of an express warning on the part of the author of the *sûtras* — all the different shades of meaning which they only acquired by the gradual development of the Sanskrit. This must be carefully kept in mind, when we employ the Sanskrit vocabulary as one of the principal sources for tracing the different periods of Hindu literature.

The same want of critical discernment, of which we complain in the commentaries, manifests itself also in regard to the accentuation. The conciseness of the *sûtras* renders it frequently doubtful, whether a certain *anubandha*, or indicatory letter, is to be continued from one rule to those following immedi-

ately after, or not. We often find that grammarians differ on this point, or that, in such cases, the Vaidic accent does not agree with that specified by the commentators. The greatest mistake, however, in this respect, is, that they entirely misunderstood their author in one point. Wherever the *sûtras* contain *nipâtâs*, irregular forms, or *âkṛitigaṇâs*, lists of specimens, the intention of the author merely was to point out words of a similar formation, the derivation of which appeared to him obscure; not to attribute to them the same accent. By assuming the complete uniformity of such words, the commentators, in many cases, give them an evidently false accent. The last rule in the first chapter is one of the clearest examples. In the glossary I have endeavoured to indicate, as far as my resources allowed, all the instances in which the accent of the Vedas differs from that given by the grammarians. In fact, the only reliable source of information as to the accent is the text of the Vedas. To believe that, from the beginning of our era downwards, when the language spoken by the Brahmins had subsided into a dull, monotonous, uniform accentuation, the grammarians possessed an accurate knowledge of accent, and to use the accents, which they give, for comparative and other purposes, would be to take the shadow for the real substance.

The *uṇâdisûtras* have been explained by many grammarians. Every Sanskrit grammar, whether following the system of *Pâṇini*, or not, contains a more or less accurate and copious chapter on the *uṇâdis*. The oldest and best commentary in existence is that

of *Ujjvaladatta*, now published for the first time. The age of the author is fixed by two dates. He very frequently quotes *Maheçvara's Viçvaprakâça*, a lexicon written A. D. 1111, and is in his turn mentioned by *Râyamukuṭa*, who composed his commentary on *Amara* in 1431.*) If the quotation of the *Medinîkara* in I, 101 be not a later addition by some copyist **), *Ujjvaladatta* cannot have lived before the middle of the 13th century. He was well read in *Pâṇini* and his commentators, and quotes many lexicographers. Beside this, in order to establish the meanings of the *uṇâdi*-words, he frequently gives extracts from those poets who were considered classical in his age. Additions to the sûtras, made either by his predecessors or himself, he generally introduces by the expression *bâhulakât*, "the *uṇâdi*-suffixes being applied variously, (we may consider the following words as belonging to the same class)". He often gives secondary derivatives (*taddhita*), formed from the *uṇâdis*. These are for the most part taken from *Pâṇini*. The same thing, but to a still greater extent, is done by *Sâyaṇa* in the *Dhâtuvṛitti*.

---

*) *Ujjvaladatta* is mentioned by RM., Padmanâbhadatta, Bhaṭṭoji, Bhânuji, and Bharata in his commentary on the Bhaṭṭikâvya VI, 41 (where the Calc. ed. reads उज्ज्वलदत्त).

**) That additions of this kind have been occasionally made, is proved by an example of some importance. *Mallinâtha* makes no mention of the *Medinîkara* in any of his voluminous commentaries, but in the Calcutta edition (1815) of the *Çiçupâla* a quotation from that lexicographer is found in the commentary on II, 65. This quotation was doubtless inserted on the authority of some MSS., but is wanting in the Bodleian copy (WILSON 494).

Ujjvaladatta cites the following books and authors.

A. Commentaries on the uṇâdisûtras.

का चिदुणादिवृत्ति, I,67. — का चिद्वृत्ति, I,128.130. III,16. — *क्षपणकवृत्ति, I,158. *) — गोवर्धन, the author of the *Gaṇaratnamahodadhi,* likewise wrote a commentary on the *uṇâdisûtras* **).II,107.III,40.IV,20.68.117.213.V,19.— देववृत्ति by *Purushottamadeva,* II,23.49.III,1.28.86.91.98. 101.117.140. IV,109. V,61. — *नग्नवृत्ति, IV,66. Comp. क्षपणकवृत्ति. — प्राचीनवृत्ति, II,32. — *सतीवृत्ति, III,25., and *सूतीवृत्ति, III, 140, one or other of which spellings is, of course, corrupt.

B. Grammarians.

अनुन्यास. See न्यास. — आपिशलि, I,18. IV,174. — इंदुमित्र, II,84. He is quoted by *Viṭṭhalâcârya,* and *Râyamukuṭa* (RM.) on Am.I,1,3,6. — उपाध्यायसर्वस्व, and sometimes simply सर्वस्व, *Introduction,* I,78.108.113.126.151. 153. II,25.29.80.109. III,2.25.47.50.92.145. IV,1.30.32. 41.133.155.156.166.216.236. — कातंत्र, the Kâtantra-grammar, I,158. — चंद्र, I,95 (*Cândravyâkaraṇa*). IV,1 (*Cândralingânuçâsana*). — *छात्रमित्र, III,70. — जयादित्य, I,52. ***) जिनेंद्र, IV,146. See न्यास. — दुर्घटे रक्षित, II,57. III,160.IV,1. — धातुपारायण, धातुपारायणीय, पारायण, पारायणीय, I,45.133.134. II,7. III,22.53.131. IV,13.57.68.102 (*apârâyaṇîya*). 111.117.158 (*apârâyaṇîya*). V,19. Comp.Co-

*) An asterisk marks all those names which I have not hitherto met with elsewhere in the course of my reading.

**) Comp. गोवर्धनीयोणादिवृत्तिः, RM. on Am. I, 1, 1, 55.

***) Colebrooke (in the Misc. Ess. II, 40) gives *Jayâditya* as a second name of *Vâmana.* Our passage, as well as the manner in which both names are quoted by other grammarians, induces me to doubt the correctness of this statement.

lebrooke Misc. Ess.II,16. — धातुप्रदीप, धातुप्रदीपिका, a short commentary on the *Dhâtupâṭha* by *Maitreya Rakshita, Introduction,* I,67.113.II,112.IV,81.213.214.219. Comp. Westergaard, Radices, II. The author's name is formed in I,38. — धातुप्रदीपटीका, *Introduction,* I,82. II,13.75. III, 4.62. IV,15. — न्यास, *Jinendra's* commentary on the *Kâçikâ,* *) *Introduction*, I,10.26.64.108.114.117.153. II,32.79.84.85.116.III,89.138. IV,124.125.177.184.188. 218. *Rakshita's* commentary on the *Nyâsa* was called अनुन्यास (*Introduction,* and I,151), and the two combined probably formed the महान्यास, cited in IV,93. **) Comp. रक्षित. — पाणिनि. — फिट्सूत्र, III,59. — भागवृत्ति, *Introduction,* I,156.II,58.68.109 (quotes *Mâgha*). IV,35.41.158.V,19. See वृत्ति. — भाष्य, *Patanjali's Mahâbhâshya, Introduction,* II,23. III,50.89.123.IV,20.119.138.174.188. — भाष्यटीका, II,39. — भोजदेवशब्दानुशासन, I,92.***) — रक्षित, *Introduction,* I,26.106.113.II,12.39.57.90. III,160.IV,1.2.51.142.177. 200. See दुर्घट and न्यास. — रामदास, V,52. — वररुचिलिंगकारिका, II,109. *Vararuci* wrote a short treatise on gender, with the title: *Lingaviçeshavidhis.* His Prâkrit-grammar is quoted in I,108. — वामन, the author of the Kâçikâ (comp.IV,117), I,52. His book is generally cited by the name of वृत्ति, *Introduction,* I, 37. 55. 82. 104.128. II,20.58.120. III,27. IV,81.149.193. In some of these passages, however, *vṛitti* seems to be an abbreviation of *Bhâgavṛitti.*

---

*) Comp. *Jinendranyâsa* in the *Kâvyakâmadhenu.*

**) A book called *Nyâsoddyota* is frequently mentioned.

***) Comp. इल्वलास्तारका इल्वलो ऽसुर इत्युपादौ भोजदेवो व्याकरोत्। Kshîrasvâmin on Am. I, 1, 2, 25.

C. Lexicographers.

*अचलकोष III,68. A lexicon which is quite unknown to us. *) — अजयकोष, II,75, etc.— अमर. — अमरटीका, I,24. 108. II,4. III,6. IV,125.— अमरदत्त, IV,85.— अमरमाला, III, 43 (*Nânârthâmaramâlâ*). IV,181.188. V,28.— अरुणदत्त, III,159. IV,117.184. — *आचार्यकोष, III,114. — उत्पलिनीकोष, I,3.7.125. III,157. IV,188. — कलिंग, *Introduction*, I,68. II,32.75. III,126. IV,62. V,48. According to Colebrooke, Misc. Ess. II,54, he was a commentator on Amara. — *गोपालित, III,22. IV,1 (*Gopâlito Vâtapâlitas*). *Gopâlita* is perhaps a corruption of *Vopâlita*. — चंद्र, probably in some passages an abbreviation of *Haṭṭacandra*. I,41.90.123.129. II,57.99.103. III,62.141 (*Candravyâkhyâna*). IV,20. V,15. — चंद्रगोमिन्, IV,78.107.184. — त्रिकांडशेष, I,1, etc. — दामोदर, I,28. — द्विरूपकोष, I,44.47. V,35.— धरणिकोष, I,1, etc. — नाममाला, II,94. — *पशुपति, IV,179. **) — पुरुषोत्तमदेव, see त्रिकांडशेष and हारावली. — भागुरि, I,113. II,57. III,132. — मेदिनीकर, I,101.— रत्नकोष, I,151. II,40. रत्नमालाकोष I,3. उत्तररत्न, III,38. IV,219. — रंतिदेवकोष, I,42. II,27. IV,52.138.188. — रभसकोष I,82.151. IV,70.110.117.188. V,6. — राजशेखर III,76. — रुद्रकोष, II, 84.111. IV,144.158. — रूपमंजरी, I,95. II,57. — रूपरत्नाकर, II,108. IV,30. — वररुचिकोष, I,11.37. — वर्णदेशना, or for

---

*) *Acala* is mentioned as a writer of poetry, and is praised in the following stanza as one of the best poets: कविरमलः कविरचलः कविरभिनंदश्च कालिदासश्च । अन्ये कवयः कपयः चापलमात्रं परं दधति ॥ With regard to the spelling of *kosha*, I have received कोश into the text, because the manuscript writes so in the majority of cases, but, from an etymological point of view, I consider कोष to be the correct way of spelling the word.

**) *Abhirâmapaçupati* is mentioned as a poet.

shortness' sake देशना, *Introduction*, I,108.113. II,13. III,43. IV,64.139.200. — वर्णविवेक, I,2.39.47.92.96 (cites *Kavirâja*). II,7.15. IV,2.15.56.81.117.121.144.179.188. 201.V,43. — वाचस्पतिकोष, III,22. IV,129.233. — वातपालित, see गोपालित. — विक्रमादित्यकोष, I,95.96. II,15. III,83.126. IV,16.56.75.139. — विश्वप्रकाश by *Maheçvara*. — वोपालित, IV,56.78. — व्याडि, I,151. — शब्दतरंगिणी, I,123. — शब्दार्णव, I,2.150. II,7.13.99.103.119. III,92 117.134 IV,38.41.124. 138.188. V,57. — शाश्वत, I,114, etc. — संसारावर्त, I,9.48. — सुभूतिचंद्र, or सुभूति, *Introduction*, I,28. II,10.85.111. III, 42. IV,1.12.52.200. V,70. He was one of the earlier commentators on the *Amarakosha*. — सोमनंदिन्, *Introduction*. *) — हट्टचंद्र, another commentator on Amara, *Introduction*, I,3.19.42. IV,101.158. V,3. — हलायुध, I,46. — हारावलीकोष, I,17., etc.

D. Poets and miscellaneous writers.

अभिनंद I,2 (*Vindhyavarṇana*). 48. II,103. IV,117. — *कश्चिद्राघ्नः (?), IV,188. — कविराज, quoted by the *Varṇaviveka*, I,96. — कादंबरी by *Vâṇa*, I,158. III,7. — कामंदक, IV,75. — कालिदास. Ujjvaladatta quotes the *Raghuvañça*, *Kumârasambhava*, and *Meghadûta*. — कीचकवध, an artificial poem, often cited by other grammarians, I,117. IV,102. — कुमारिल, I,11. — गद्यरामायणकाव्य, the *Râmâyaṇa* in prose, IV,139. — *गोपदत्त, IV,16. — गोवैद्यक, II,109. — गोभट्ट. See the note on II,90. — चंडीमाहात्म्य, II,58. — चरक, IV,188. — चाणाक्यशतक, III,14. The same passage occurs in the *Brahmavaivartapurâṇa*, II,56,22: सर्वरत्नप्रधानं च स्त्रीरत्नं दुष्कुलादपि. — चिकित्साशास्त्र, II,109. — जानकीहरण, III,

*) He is several times quoted by RM.

73. — ज्योतिष, III,86. IV,188. See वराह. — दमयंतीकाव्य by *Trivikramabhaṭṭa*, I,55. — दारिद्र्यवर्णन, III,79.137. — *द्रव्यगुण, a medical work, III,79. — धन्वंतरि, I,7. — नागार्जुन, IV,121. — बालरामायण, I,3. IV,138.171. — बुद्धचरित. See the note on I,156. — भट्टिकाव्य, I,1., etc. — भवभूति, *Mâlatîmâdhava*, I,108. IV,18. — भारवि, *Kirâtârjunîya*, I, 95., etc. — मतिनिर्णय, an artificial poem, I,41. *) — महाभारत or व्यास. — महिम्नः स्तव, I,48.99. — माघ, *Çiçupâlavadha*, I,3., etc. — मुरारि, *Anarghyarâghava*, IV,171. V,19. — वराहमिहिर, III,86. IV,188. V,8. Comp. ज्योतिष. — वासवदत्ता by *Subandhu*, I,28., etc. — वासवदत्ताटीका, IV,111. — विदग्धमुखमंडन by *Dharmadâsa*, I,108. III, 49. — विदेहाधिप, IV,195. — *विनीतकीर्त्ति, II,58. — विष्णुपुराण, III,6.39. — वृंदावन, I,28.121. II,78. — वृहत्कथा, I,11. — वैद्य, वैद्यकशास्त्र, I,42. III,79. — शबरस्वामिन्, IV,117. — शृंगारतिलक, III, 47. — *सागरनंदिन्, IV,121. — सुबंधु. See *Vâsavadattâ*. — *सुवर्णरेख, III,136. — सूर्यशतक by *Mayûra*, IV,51.213.233. — हरविलास, II,28. — हितोपदेश, III,90.

It is scarcely probable that *Ujjvaladatta* had read all these books, or even that they were all still in existence in his time. It is a common practice among Indian grammarians and commentators to borrow quotations from their predecessors without acknowledging the source from which they were taken.

We see this clearly in the case of *Bhaṭṭoji*, who has treated briefly of the *uṇâdisûtras* in the *Siddhântakaumudî*, following *Ujjvaladatta* in the main, but making additions of his own. **) In the *Prauḍhama-*

*) Also quoted by RM. on Amara I, 1, 1, 38.

**) The chapter on the *uṇâdis* in the Calcutta edition of the *Siddhântakaumudî* abounds in errors of the worst description. Besides

noramâ he repeats most of the quotations from *Ujjvaladatta*, and these works have consequently proved of some service in the emendation of our text. *Bhaṭṭoji* has one advantage over *Ujjvaladatta*; he possessed a good knowledge of the Vedas, and was consequently able to point out errors in the accentuation, and to show that the meanings assigned to words occurring only in the Vedas did not agree with the explanations given by *Sâyaṇa*. He frequently quotes the *Daçapâdi*, an unknown commentary on the *uṇâdi-sûtras*.

Padmanâbhadatta, the author of the *Supadmavyâkaraṇa* and of the *Bhûriprayogakosha*, is older than *Bhaṭṭoji*. In a supplement to his grammar he gives a collection of *uṇâdi*-words. The system he follows is peculiar. His treatise is divided into two chapters. The first contains the suffixes that end in a vowel, beginning with *u*, *û*, and proceeding with *a*, *â*, and the other vowels in succession. In the second chapter he treats, in alphabetical order, of the suffixes that end in a consonant, giving first the monosyllabic, and then the polysyllabic suffixes. Those that end in *ka*, for instance, are arranged as follows: *ka*, *aka*, *ika*, *âku*, *ânaka*, *tika*, *taka*, *âka*, *îka*, *uka*, *ûka*. The same plan is more or less consistently adhered to

---

many other faults, *sûtras* are often given as commentary, and the commentary turned in *sûtras*. It is a matter of regret, that Professor Boehtlingk, in his otherwise valuable edition, thought fit to reprint this treatise without the help of manuscripts. Compare 'Die Uṇâdi-affixe. Herausgegeben und mit Anmerkungen und verschiedenen Indices versehen von Otto Boehtlingk. St. Petersburg 1844.'

with all the other consonants. The *sûtras* are of *Padmanâbhadatta's* own composition. In the explanation of the *uṇâdi*-words he generally follows *Ujjvaladatta*, whom he acknowledges as one of his authorities in the *Bhûriprayoga*.

Râmaçarman, a grammarian of the school of *Vopadeva*, has collected the *uṇâdis* in the form of a vocabulary, written in verse, and composed, I believe, at the end of the 17th, or the beginning of the 18th century. In the first part he gives the words ending in *a, aka, anga, aṭa, aṭha, anta, atha, ana, apa, amba, abha, ama, aya, ara, atra, ala, aça, asa, ati;* then those ending in a consonant with a preceding vowel; words in *â, âka, ânaka,* etc., *i, u,* etc. The second part contains the words ending in a consonant and vowel, but in which the suffix is not preceded by a vowel. This is the *Uṇâdikosha,* mentioned by Professor Wilson in his Sanskrit Dictionary (first ed. p. XXXIX), and frequently quoted in the *Çabdakalpadruma* of *Râdhâkânta.* The first verse may serve as a specimen:

त्रिषु भयानके घोरं जंघांघ्र्युपरिभागके ।
क्ष्मावन्यां धीवरे तु स्याद्दाशो दासस्तु धीवरे ॥

Râmaçarman's compilation is very inaccurate, and in every respect unreliable.

The present edition of *Ujjvaladatta* has been prepared from a manuscript belonging to the Library of the East India House (No. 2375), copied in 1706. Though beautifully written, it is full of mistakes. Most of the faults have been corrected by referring to printed and unprinted sources, and verifying, as far

as it was possible, the quotations from grammatical and other writers. A few passages, however, were too corrupt to admit of emendation. These are commonly pointed out in the *Notes*, in which the readings of the manuscript are carefully indicated. Should another copy of *Ujjvaladatta* be ever brought to Europe, it will be easy to remove those faults which still remain in the text, or which have escaped the attention of the Editor.

In the *Glossary*, an asterisk marks all those words which are not expressly formed in the *sûtras*. The *Appendix*, it is hoped, will prove of some value to those who take an interest in comparative philology.

T. A.

Oxford, Sept. 7, 1858.

ओं

। श्रीगणेशाय नमः ।

हेरंबमीश्वरं वाचं नमस्कृत्य पदं गुरोः ।
श्रीमदुज्ज्वलदत्तेन क्रियते वृत्तिरुत्तमा ॥ १ ॥
वृत्तिं न्यासमनुन्यासं रक्षितं भागवृत्तिकां ।
भाष्यं धातुप्रदीपं च तट्टीकां वर्णदेशनां ॥ २ ॥
उपाध्यायस्य सर्वस्वं सुभूतिं सोमनंदिनं ।
कलिंगहट्टचंद्रादीन् समीक्ष्यैषा कृतिर्मम ॥ ३ ॥
उणादिवृत्तयो ऽनेका भूरिभिः सूरिभिः कृताः ।
तास्त्विदानीं विपर्यस्ताः सूत्रशब्दार्थधातवः ॥ ४ ॥
ता एवाथ समालोच्य ग्रंथानन्यांश्च विस्तरात् ।
सर्वतः सारमाकृष्य मया वृत्तिर्विरच्यते ॥ ५ ॥
निरूप्य लिखितं सत्यं सज्जनैः सुविचारितं ।
नमस्कुर्मः खला युष्मांस्तूष्णीमत्र करिष्यथ ॥ ६ ॥
यो ऽमूं वृत्तिं समालोच्य स्वपौरुषसमीहया ।
मन्नामाच्छादनं कुर्यात्सुकृतं तस्य नश्यति ॥ ७ ॥
प्रत्ययानां च धातूनामागमादेशयोस्तथा ।
व्यत्यासेवानुबंधानां फलं नोदीरितं ततः ॥ ८ ॥

प्रत्ययः। परश्च। आद्युदात्तश्च। अनुदात्तौ सुप्पितौ। पा° ३.१.१—४.। धातोः। तत्रोपपदं सप्तमीस्थं। कृदतिङ्। वासरूपो ऽस्त्रियां। पा° ३.१.९१—९४.। वर्तमाने लट्। पा° ३.२.१२३.। पुवः संज्ञायां। पा° ३.२.१८५.। उणादयो बहुलं। भूते ऽपि दृश्यंते। भविष्यति गम्यादयः। पा° ३.३.१—३.। कर्तरि कृत्। पा° ३.४.६७.। दाशगोघ्नौ संप्रदाने। भीमादयो ऽपादाने। ताभ्यामन्यत्रोणादयः। पा° ३.४.७३—७५.॥

एषा सप्तदशसूत्री पंचमपादपरिसमाप्तेरनुवर्तते। ततो वक्ष्यमाणाः सपादशतत्रयमुणादयः प्रत्ययाः साधवो भवंति। तान्वक्तुकामो ऽहमस्मि ॥

कृवापाजिमिस्वदिसाध्यशूभ्य उण् ॥१॥

डुकृञ् करणे। वा गतिगंधनयोः। पा पाने। जि अभिभवे। डुमिञ् प्रक्षेपणे। ष्वद् आस्वादने। साध संसिद्धौ। अशू व्याप्तौ॥ एभ्यो ऽष्टधातुभ्य उण्प्रत्ययः स्यात्। करोतीति कारुः। प्रसिद्धो ऽसौ क्रियाशब्दः शिल्पिन्यपि च वर्तते। तथा च धरणिकोशः। कारुः शिल्पिनि कारके। राघवस्य ततः कार्यं कारुर्वानरपुंगवः। सर्ववानरसेनानामाशवागमनमादिशत्। ७. २८.। इति भट्टिः। स्त्रियामूङुक्तः। कारूः स्त्री॥ वातीति वायुर्वातः। आतो युक् चिण्कृतोः। पा° ७. ३. ३३.। इति युक्। उभयत्र वायोः प्रतिषेधो वक्तव्यः। पा° ६. ३. २६. १.। इति देवताद्वंद्वे च। पा° ६. ३. २६.। इत्यानङ् न भवति। वाय्वग्नी। अग्निवायू॥ पिबत्यनेनौषधमिति पायुर्गुदस्थानं। गुदं त्वपानं पायुर्नेत्यमरः॥ जयत्यभिभवति रोगानिति जायुरौषधं वैद्यो ऽपि॥ मिनोति प्रक्षिपति देह उष्माणमिति मायुः पित्तं। मायुः पित्तं कफः श्लेष्मेत्यमरः। गोपूर्वात् गां वाचं विकृतां मिनोति प्रक्षिपतीति गोमायुः शृगालः॥ स्वदत इति स्वादु मिष्टं। त्रिलिंगः। शीघ्रद्रव्ये ऽसत्त्वे क्लीबं। क्लीबे शीघ्राद्यसत्त्वे स्यात्। १. १. १. ६३.। इत्यमरस्त्रिलिंगे। पृथ्वादिभ्य इमनिच्। पा° ५. १. १२२.। स्वादिमा। स्त्रियां ङीष्। स्वाद्वीत्यपि॥ साध्नोति परकार्यमिति साधुः सज्जनः। स्त्रियां वोतो गुणवचनात्। पा° ४. १. ४४.। इति ङीष्। साध्वी सती पतिव्रता। अम° २. ६. १. ६.। पृथ्वादित्वात्साधिमा॥ अश्नुत इत्याशु शीघ्रं धान्यस्य च नाम। पृथ्वादित्वादाशिमा। धान्यवाचित्वे पुंसि। आशुर्व्रीहिः पाटलः। अम° २. ९. १५.॥ बहुलवचनात् रह त्यागे। ष्णा शौचे। कक लौल्ये। हल विलेखने। वस निवासे। एभ्यो ऽप्युण् भवति॥ गृहीत्वा रहति त्यजति चंद्रमिति राहुः स्वर्भानुः॥ स्नात्यंगमिति स्नायुः शरीरबंधः। स्नायुः स्त्री वस्नसा स्मृतेत्यमरः॥ कक्यते ऽनेनेति काकुः। काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेरित्यमरः॥ हल्यते ऽनेनेति हालुर्दंतः॥ सर्वो ऽत्र वसति सर्वत्रासौ वसति। अत्रार्थे वासुः। वासुश्चासौ देवश्चेति वासुदेवः। तथा च स्मृतिः। सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः। ततो ऽसौ वासुदेवेति विद्वद्भिः परिगीयते॥ १॥ सर्वत्रासौ वसत्यात्मरूपेण विश्वंभरत्वादिति वासुः। वासुना-

रायणापुनर्वसुविश्ववद्रुपाः। १.१.२१.। इति त्रिकांडशेषे। वसुदेवस्यापत्यमित्यस्मिन्नर्थे ऋष्यंधकवृष्णिकुरुभ्यश्च। पा° ४.१.११४.। इत्यणि कृते वासुदेव इत्यपि व्युत्पत्त्यंतरं ॥

छंदसीणः ॥ २ ॥

इण् गतौ ॥ अस्मादुण्प्रत्ययः स्याच्छंदसि विषये। एतीत्यायुः। आयुर्जीवितकालो ना स्यादिति क्षत्रियवर्गे ऽमरः। बहुलवचनाद्भाषायामपि प्रयुज्यते। जटा आयुरस्येति समासे जटायुः पक्षिराजः। जटायुः स्याद्विहगेंद्रो जटायुररुणाग्रज इति शब्दार्णवः। मा वधिष्ठा जटायुं मां। ६.४१.। इति भट्टिः। वायुना जगदायुनेति वर्णविवेकः। तटे विंध्यस्याद्रेरभजत जटायोः प्रथमज इति विंध्यवर्णने ऽभिनंदः। एतेर्णिच्च।२.११८.। इत्युस्प्रत्यये सकारांतो ऽप्यायुःशब्दो भवति ॥

दृसनिजनिचरिचटिभ्यो ञुण् ॥ ३ ॥

दॄ विदारणे। षणु दाने। जन जनने। चर गतौ। चट भेदने ॥ एभ्यो ञुण् स्यात्। दीर्यत इति दारु क्लीबे काष्ठं। अर्धर्चादिः। देवदारुः पुंसि। अमुं पुरः पश्यसि देवदारुं।२.३६.। इति रघुः। नपुंसके दारु। दारुणी। दारुणि। काष्ठं दार्विंधनं त्वेध इत्यमरः॥ सनोति सनुते वा। सानुः पर्वतैकदेशः। सानुः शृंगे बुधे मार्गे वात्यायां पल्लवे वने। नांत° ११.। इति विश्वः। पर्वतैकदेशे स्नुः प्रस्थः सानुरस्त्रियामिति क्व चित्॥ जायंते जनयंति वा। जानुर्जंघोपरिभागः। क्लीबे जानु। जानुनी। जानूनि। जानूरुपर्वाष्ठीवदस्त्रियामित्यमरः। प्रसंभ्यां जानुनोर्ज्ञुः। पा° ५.४.१२९.। प्रज्ञुः प्रगतजानुकः संज्ञुः संहतजानुक इत्यमरः। ऊर्ध्वाद्विभाषा। पा° ५.४.१३०.। ऊर्ध्वज्ञुरूर्ध्वजानुः स्यात्। ञ्यनुबंधकग्रहणं जान्वित्यत्र जनिवध्योश्च। पा° ७.३.३५.। इत्यनेन वृद्धिप्रतिषेधो मा भूत्॥ चरति चक्षुरादिष्विति चारु शोभनं ॥ चाटु प्रियं वाक्यं। चाटुर्नारि प्रियोक्तिः स्यादिति रत्नमालाकोशः। चकार च बहुचाटूनप्रौढयोषिद्वदस्य। ११.३१.। इति माघः। माघे नपुंसकमपि दर्शितं। चाटु चाकृतकसंभ्रममासां कार्मणत्वमगमन्रमणेषु। १०.३७.। चाटुः पिचिंडे च नुतौ चाटुरालापे तत्सममित्युत्पलिनीकोशः। मृगय्वादित्वात्कुप्रत्यये चटुरित्यपि भवति। चटु चाटु प्रियं वाक्यमिति हट्टचंद्रः। वत्सेनोदस्यमानो रचितचटुशतं मोचितः स्वर्गिवर्गैरिति बालरामायणं च ॥

एषा सप्तदशसूत्र्या पंचमपादपरिसमाप्तेरनुवर्तते । ततो वक्ष्यमाणाः सपादशतत्रयमुणादयः प्रत्ययाः साधवो भवंति । तान्वक्तुकामो ऽहमस्मि ॥

कृवापाजिमिस्वदिसाध्यशूभ्य उण् ॥ १ ॥

डुकृञ् करणे। वा गतिगंधनयोः। पा पाने। जि अभिभवे। डुमिञ् प्रक्षेपणे। ष्वद आस्वादने। साध संसिद्धौ। अशू व्याप्तौ॥ एभ्यो ऽष्टधातुभ्य उण्प्रत्ययः स्यात्। करोतीति कारुः। प्रसिद्धो ऽसौ क्रियाशब्दः शिल्पिन्यपि च वर्तते। तथा च धरणिकोशः। कारुः शिल्पिनि कारके। राघवस्य ततः कार्ये कारुर्वानरपुंगवः। सर्ववानरसेनानामाश्वागमनमादिशत्। ७. २८.। इति भट्टिः। स्त्रियामूङंतः। कारूः स्त्री ॥ वातीति वायुर्वातः। आतो युक् चिण्कृतोः। पा° ७. ३. ३३.। इति युक्। उभयत्र वायोः प्रतिषेधो वक्तव्यः। पा° ६. ३. २६. १.। इति देवताद्वंद्वे च। पा° ६. ३. २६.। इत्यानङ् न भवति। वाय्वग्नी। अग्निवायू॥ पिबत्यनेनौषधमिति पायुर्गुदस्थानं। गुदं त्वपानं पायुर्नेत्यमरः॥ जयत्यभिभवति रोगानिति जायुरौषधं वैद्यो ऽपि॥ मिनोति प्रक्षिपति देह उष्माणमिति मायुः पित्तं। मायुः पित्तं कफः श्लेष्मेत्यमरः। गोपूर्वात् गां वाचं विकृतां मिनोति प्रक्षिपतीति गोमायुः शृगालः॥ स्वद्यत इति स्वादु मिष्टं। त्रिलिंगः। शीघ्रद्रव्ये ऽसत्त्वे क्लीबं। क्लीबे शीघ्राद्यसत्त्वे स्यात्। १. १. १. ६३.। इत्यमरस्त्रिलिंगे। पृथ्वादिभ्य इमनिच्। पा° ५. १. १२२.। स्वादिमा। स्त्रियां ङीष्। स्वाद्वीत्यपि॥ साध्नोति परकार्यमिति साधुः सज्जनः। स्त्रियां वोतो गुणवचनात्। पा° ४. १. ४४.। इति ङीष्। साध्वी सती पतिव्रता। अम° २. ६. १. ६.। पृथ्वादित्वात्साधिमा॥ अश्नुत इत्याशु शीघ्रं धान्यस्य च नाम। पृथ्वादित्वादाशिमा। धान्यवाचित्वे पुंसि। आशुर्व्रीहिः पाटलः। अम° २. ९. १५.॥ बहुलवचनात् रह त्यागे। ष्णा शौचे। कक लौल्ये। हल विलेखने। वस निवासे। एभ्यो ऽप्युण् भवति॥ गृहीत्वा रहति त्यजति चंद्रमिति राहुः स्वर्भानुः॥ स्नात्यंगमिति स्नायुः शरीरबंधः। स्नायुः स्त्री वस्नसा स्मृतेत्यमरः॥ कक्यते ऽनेनेति काकुः। काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेरित्यमरः॥ हल्यते ऽनेनेति हालुर्दंतः॥ सर्वो ऽत्र वसति सर्वत्रासौ वसति। अत्रार्थे वासुः। वासुश्चासौ देवश्चेति वासुदेवः। तथा च स्मृतिः। सर्वत्रासौ समस्तं च वसत्यत्रेति वै यतः। ततो ऽसौ वासुदेवेति विद्वद्भिः परिगीयते ॥ १ ॥ सर्वत्रासौ वसत्यात्मरूपेण विश्वंभरत्वादिति वासुः। वासुना-

रायणपुनर्वसुविश्ववन्नपाः। १.१.२१.। इति त्रिकांडशेषे। वसुदेवस्यापत्यमित्यस्मिन्नर्थ ऋष्यंधकवृष्णिकुरुभ्यश्च। पा° ४.१.११४.। इत्यणि कृते वासुदेव इत्यपि व्युत्पत्त्यंतरं ॥

छंदसीणः ॥ २ ॥

इण् गतौ ॥ अस्मादुणप्रत्ययः स्याच्छंदसि विषये। एतीत्यायुः। आयुर्जीवितकालो ना स्यादिति क्षत्रियवर्गे ऽमरः। बहुलवचनाद्भाषायामपि प्रयुज्यते। जटा आयुरस्येति समासे जटायुः पक्षिराजः। जटायुः स्याद्विहगेंद्रो जटायुररुणात्मज इति शब्दार्णवः। मा वधिष्ठा जटायुं मां।६.४१.। इति भट्टिः। वायुना जगदायुनेति वर्णविवेकः। तटे विंध्यस्याद्रेरभजत जटायोः प्रथमज इति विंध्यवर्णने ऽभिनंदः। एतेर्णिच।२.११८.। इत्युसप्रत्यये सकारांतो ऽप्यायुःशब्दो भवति ॥

दृसनिजनिचरिचटिभ्यो ञुण् ॥ ३ ॥

दॄ विदारणे। षणु दाने। जन जनने। चर गतौ। चट भेदने ॥ एभ्यो ञुण् स्यात्। दीर्यत इति दारु क्लीबे काष्ठं। अर्धर्चादिः। देवदारुः पुंसि। अमुं पुरः पश्यसि देवदारुं।२.३६.। इति रघुः। नपुंसके दारु। दारुणी। दारूणि। काष्ठं दार्विंधनं त्वेध इत्यमरः॥ सनोति सनुते वा। सानुः पर्वतैकदेशः। सानुः शृंगे बुधे मार्गे वात्यायां पल्लवे वने। नांत° ११.। इति विश्वः। पर्वतैकदेशे स्नुः प्रस्थः सानुरस्त्रियामिति क्व चित्॥ जायंते जनयंति वा। जानुर्जंघोपरिभागः। क्लीबे जानु। जानुनी। जानूनि। जानूरुपर्वाष्ठीवदस्त्रियामित्यमरः। प्रसंभ्यां जानुनोर्ज्ञुः। पा° ५.४.१२९.। प्रज्ञुः प्रगतजानुकः संज्ञुः संहतजानुक इत्यमरः। ऊर्ध्वाद्विभाषा। पा° ५.४.१३०.। ऊर्ध्वज्ञुरूर्ध्वजानुः स्यात्। ञ्यनुबंधकग्रहणं जान्वित्यत्र जनिवध्योश्च। पा° ७.३.३५.। इत्यनेन वृद्धिप्रतिषेधो मा भूत्॥ चरति चक्षुरादिष्विति चारु शोभनं ॥ चाटु प्रियं वाक्यं। चाटुर्ना प्रियोक्तिः स्यादिति रत्नमालाकोशः। चकार च बहुचाटून्प्रौढयोषिद्वदस्य।११.३१.। इति माघः। माघे नपुंसकमपि दर्शितं। चाटु चाकृतकसंभ्रममासां कार्मणत्वमगमन्रमणेषु।१०.३७.। चाटुः पिचिंडे च नुतौ चाटुरालापे तत्समगमित्युत्पलिनीकोशः। मृगय्वादित्वात्कुप्रत्यये चटुरित्यपि भवति। चटु चाटु प्रियं वाक्यमिति हेमचंद्रः। वत्सेनोदश्यमानो रुचितचटुशतं मोचितः स्वर्गिवर्गैरिति बालरामायणं च ॥

किंजरयोः श्रिणः ॥ ४ ॥

शॄ हिंसायां। इण् गतौ॥ आभ्यां किंजरादित्यनयोरुपपदयोर्यथासंख्यं ञुण् स्यात्। किं शृणातीति किंशारुः शरो धान्यशूकं च। किंशारुः सस्यशूकं स्यात्किंशारुर्विशिखो मतः। धरणि° ॥ जरामेतीति जरायुर्गर्भाशयः। गर्भाशयो जरायुः स्यादित्यमरः ॥

त्रो रश्च लः ॥ ५ ॥

तॄ प्लवनतरणयोः॥ अतो ञुण् स्याद्रेफस्य च लत्वं। तरंत्यनेन वर्णा इति तालु वदनैकदेशः। तालु क्लीबे मुखोपरिभागः। परिशुष्कतालवः। तालु। तालुनी। तालूनि। तालु काकुदमित्यमरः। शरीरावयवाद्यत्। पा° ५.१.६.। तालव्यं। तृसन्यादिसूत्रे तलिग्रहणे कर्तव्ये सूत्रमिदमन्यतो ऽप्युकारांताद्भावार्थं ॥ बाहुलकाद् गतौ। भृ भर्त्सने। शॄ हिंसायां। मृ प्राणत्यागे॥ एभ्यो ऽपि ञुण् भवति रेफस्य लत्वं च। आलुर्घटी भक्ष्यद्रव्यं च॥ भृणाति भर्त्सयति रोगानिति भालुरादित्यः॥ शालुः कषायद्रव्यं॥ मालुः पत्रलता ॥

कृके वचः कश्च ॥ ६ ॥

वच परिभाषणे॥ अस्मात्कृकशब्द उपपदे ञुण् कश्चांतादेशः। गलतालुकंठनाभयः कृकशब्दार्थाः। कृकेन गलेन वक्तीति कृकवाकुः। कृकवाकुः कुक्कुटे स्यात्कृकलासमयूरयोः ॥

भृमृशीतॄचरित्सरितनिधनिमिमस्जिभ्य उः ॥ ७ ॥

भृञ् भरणे। मृङ् प्राणत्यागे। शीङ् स्वप्ने। तॄ प्लवनतरणयोः। चर गतौ। त्सर छद्मगतौ। तनु विस्तारे। धन धान्ये। डुमिञ् प्रक्षेपणे। टुमस्जो शुद्धौ॥ एभ्यो दशधातुभ्य उः स्यात्। भरति बिभर्ति वेति भरुः स्वामी॥ म्रियंते भूतान्यस्मिन्निति मरुर्निर्जलो देशः। मरुः पर्वतधन्वनो रेफांते ऽमरः॥ शयनशीलः शयुरजगरः। शयुर्वाहसो ऽजगरः स्यात्॥ तरंति नरकमनेन रोपका इति तरुर्वृक्षः॥ चरुर्मंत्रपूतः पाकः॥ त्सरुः खड्गादिमुष्टिः स्यात्॥ तन्यते कर्मपाशो ऽनयेति तनुः शरीरं स्वल्पं च। स्त्रियां मूर्तिस्तनुस्तनूरित्यमरः।

पृष्वादित्वान्ननिमा॥ धन्यते हन्यते ऽनेनेति धनुः शास्त्रं। धनुना च धनुर्विदुः। शब्दभेद. १. २४.। इति विश्वप्रकाशः। धनुर्वंशविशुद्धो ऽपि निर्गुणः किं करिष्यतीति धान्वंतरं॥ मु शब्दं मिनोति प्रक्षिपतीति मयुः किंनरः। किंनरः किंपुरुषस्तुरंगवदनो मयुरित्यमरः। बाहुलकादत्र मीनातिमिनोतिदीङां ल्यपि च। पा° ६.१.५०.। इत्यात्वं न भवति॥ भक्तार्थे पानीये मज्जतीति मद्गुः पानीयकाकिकाभिधः पक्षी। न्यंक्वादित्वाज्जकारस्य गकारः। फलां जश् झशि। पा° ८.४ ५३.। इति सस्य दः॥ बाहुलकात् गडि वदनैकदेशे। अतो ऽण्युः स्यात्। तस्य च पक्षे दीर्घत्वं। गंडुर्गंडूरुपधानं तैलं वा॥ क्वचित्प्रवृत्तिः क्वचिदप्रवृत्तिः क्वचिद्विभाषा क्वचिदन्यदेव। विधेर्विधानं बहुधा समीक्ष्य चतुर्विधं बाहुलकं वदंति। पा° २.१. ३२.१.॥ गंडुर्गंडूश्च दृश्यत इत्युत्पलिनीकोशः॥

अणश्च ॥ ८ ॥

अण शब्दार्थः॥ अत उप्रत्ययः स्यात्। अणुः सूक्ष्मः। पुंसि लवलेशकणाणव इत्यमरकोशः। पुंसीति वचनात्पुंस्त्वमस्य। परमश्चासावणुश्चेति परमाणुः। कन्प्रत्यये ऽणुकः। अणोर्निपुणे कन्॥

चकारात् बाहुलकाद्वा

(कटिवटिभ्यां च ॥ १ ॥)

कटति रसनामिति कटुः रसविशेषः स्यात्। त्रिलिंगः॥ वटुर्द्विजसुतः स्मृत इति संसारावर्तः। उपचारान्नरटवटुः॥ के चिदिदं सूत्रद्वयं धान्ये निदित्यत्र पठंति॥

धान्ये नित् ॥ १० ॥

धान्ये वाच्ये ऽण उप्रत्ययः स्यात् स च निद्भवति। अणुर्व्रीहिभेदः। व्रीहिभेदस्त्वणुः पुमानित्यमरः। निद्ग्रहणमिदं स्वरार्थे फलिपाटि। १. १२.। इत्यादिसूत्रं यावदनुवर्तत इति वोतो गुणवचनादित्यत्र सूत्रे न्यासः॥

शॄस्वृस्निहित्रप्यसिवसिहनिक्लिदिबंधिमनिभ्यश्च॥ ११॥

शॄ हिंसायां। स्वृ शब्दोपतापयोः। ष्णिह प्रीतौ। त्रपूष् लज्जायां। असु क्षेपणे। वस निवासे। हन हिंसागत्योः। क्लिदू आर्द्रीभावे। बंध बंधने।

मन ज्ञाने॥ एभ्यो दशधातुभ्य उप्रत्ययः स्यात् स च नित्। शरुरायुधकोपयोः॥ स्वर्यते प्राणिनोऽनेनेति स्वरुर्वज्रं॥ त्नेहुर्व्याधिः॥ अग्निं दृष्ट्वा त्रपते लज्जत इति त्रपु सीसकं। क्लीबे रंगसीसकयोस्त्रपु॥ पुंसि भूम्न्यसवः प्राणा इत्यमरः। असु मानसोपतापे। कंड्वादित्वाद्यक्। असूयति देवदत्ताय॥ वसू रत्नाग्निदेवेषु। प्रज्ञादित्वादणि स्वार्थे वासवः। विश्वस्य वसुराटोः। पा° ६. ३. १२८.। इति दीर्घः। विश्वावसुर्मनुः॥ हनुर्हट्टविलासिनीत्यमरः। हनुः पुमान्पुरो गंडादिति वररुचिकोशः। हनुः प्रहरणे मृत्यौ कपोलावयवे गद इत्यपि स एव। निंदायां मतुप्। हनुमान्हनुमतापि न च निर्ययाविति कुमारिलः। शरादीनां च। पा° ६. ३. १२०.। इति दीर्घत्वमिति के चित्। हनूमान्। हनूमंतं दंतैर्दशति कुपितो राक्षसगण इति वृद्धप्रयोगः॥ क्लिद्यति विहरणा इति क्लिदुश्चंद्रः॥ स्नेहेन बध्नातीति बंधुः सज्जनः। प्रज्ञादित्वात्। पा° ५. ४. ३८.। बांधवः॥ मनू राजा। स्त्रियां मनोरौ वा। पा° ४. १. ३८.। इति ङीप्। उकारस्यौकारैकारौ च। मनोः स्त्री मनावी मनायी मनुः॥ चकाराद्बिदि अवयवे। अत उप्रत्ययः। बिंदुः परिमाणं जलादिकणाश्च॥

स्यंदेः संप्रसारणं धश्च ॥ १२ ॥

स्यंदू प्रस्रवणे॥ अत उः स्यात्संप्रसारणं च धातोर्धकारश्चांतादेशः। सिंधुर्नाब्धौ नदे देशे सिंधुस्तु सरिति स्त्रियामित्यमरः॥

उन्देरिच्चादेः ॥ १३ ॥

उन्दी क्लेदने॥ अत उः स्यादादेरुकारस्येकारादेशः। इंदुः कुमुदबांधवः॥ अन्वर्थबलादेव पूर्वसूत्रे सनुम्कसिठिग्रहणमस्मिंश्चेंदिग्रहणं कृतं॥

ईषेः किच्च ॥ १४ ॥

ईष गतिहिंसादानेषु॥ अत उः स्यात्स च कित्। आदेरिकारादेशः। ईषते हिनस्ति गच्छति वा। इषुः शरः। इषुर्द्वयोरित्यमरः॥

स्कंदेः सलोपश्च ॥ १५ ॥

स्कंदिर् गतिशोषणयोः॥ अत उः स्यात्सलोपश्च धातोः। कंदुः स्वेदनीत्यमरः। कंदुर्वा नरि पिष्टपाक इत्यमरः। यावादिषु कुमारक्रीडनकात्। पा° ५. ४. २९.। इति वचनात्कन्प्रत्ययः। कंदुकः। सा कंदुकैः कृत्रिमपुत्रकैश्च। कु° सं° १. २९.। इति कालिदासः॥

सृजेरसुश्च ॥ १६ ॥

सृज विसर्गे ॥ अत उः स्याद्धातोरसुगागमश्च धातुसकारलोपश्च । आगमसकारस्य जश्त्वं । दकारः । तस्यापि चुत्वं । जकारः । रज्जुर्गुणः । क्रियासंघः । रज्जूकृतमुदकं । रज्जुः स्त्रियामित्यमरः ॥

कृतेराद्यंतविपर्ययश्च ॥ १७ ॥

कृती छेदने ॥ अत उः स्यादाद्यंतविपर्ययश्च । आदौ तकारो ऽन्ते ककारः । तर्कुः स्त्रीणां कर्तनद्रव्यं । तर्कुटी सूत्रला तर्कुः । २१३ । इति हारावलीकोशः ॥

नावंचेः ॥ १८ ॥

अन्चु गतौ ॥ अतो निशब्द उपपद उः स्यात् । न्यंक्वादित्वात्कुत्वं । न्यंकुर्मृगजातिः । प्राणिरजतादिभ्यो ऽञ् । पा° ४.३.१५४. । इति विकारे ऽञि नैयंकवं चर्म । आपिशलिस्तु न्यंकोर्नैचूभावं शास्ति । न्यांकवं चर्म ॥

फलिपाटिनमिमनिजनां गुक्पटिनाकिधतश्च ॥ १९ ॥

फल निष्पत्तौ । पट गतौ पर्यंतः । णमु प्रह्वत्वे । मन ज्ञाने । जनी प्रादुर्भावे ॥ एभ्य उः स्यात् । एषां च यथाक्रमं गुगागमपटिनाकिधतश्चत्वार आदेशा भवंति । फल्गु असारं । क्लीबे फल्गुनी । फल्गूनि फलानि ॥ पाटयतीति पटुर्वाग्मी विशारदः । स्त्रियां पट्वी । वोतो गुणवचनादिति ङीष् । क्लीबे पटु । पटुनी । पटूनि ॥ नाकुर्वल्मीकः ॥ मधुश्चैत्रे च दैत्ये च मद्ये पुष्परसे मध्विति एरटचंद्रः । मधुरर्धर्चादिः । मधुश्चैत्रो मधुर्दैत्यो मधूको ऽपि मधुर्मतः । मधु मद्यं मधु क्षौद्रं मधु पुष्परसं विदुरिति विश्वः ॥ भिन्नस्य संग्रहाय त इति । जतु लाक्षा कल्कद्रव्यं च । त्रपुजतुनोः षुक् । पा° ४.३.१३८. । जातुषमाभरणं ॥

वलेर्गुक्च ॥ २० ॥

वल प्राणने ॥ अत उप्रत्ययो गुगागमश्च धातोः । वल्गु शोभनं ॥

शः कित्सन्वच्च ॥ २१ ॥

शो तनूकरणे ॥ अत उप्रत्ययः । स च किद्वत् सन्वद्भावश्चास्य ।

शिशुर्बालः। आदेच उपदेशे ऽशिति। पा० ६. १. ४५.। इत्यात्वं। आतो लोप इटि च। पा० ६. ४. ६४.। इत्याकारलोपः। इगंताच्च लघुपूर्वात्। पा० ५. २. १३१.। इत्यण्। शैशवं। शैशवे ऽभ्यस्तविद्यानां। १. ८.। इति रघुः॥

यो द्वे च ॥ २२ ॥

या प्रापणे॥ अत उप्रत्ययः। स च कित् द्वित्वं च धातोः। ययुरश्वो ऽश्वमेधीयः। सन्वदिति प्रकृते द्विग्रहणमित्त्वनिवृत्त्यर्थं॥

कुर्भ्रश्च ॥ २३ ॥

भृञ् भरणे॥ अतः कुप्रत्ययो द्वित्वं च धातोः। बभ्रुर्मुन्यंतरे विष्णौ। बभ्रू नकुलपिंगलाविति धरणिः। आलप्यालमिदं बभ्रोर्यत्स दारानपाहरत्। कयापि खलु पापानामलमश्रेयसे यतः। २. ४०.। इति माघः। लोमादित्वात् बभ्रुशः॥ प्राक्प्रत्ययनिर्देशादन्यतो ऽपि भवति। चक्रुः कर्ता। जघ्नुर्हंता। पपुः पालकः॥

पॄभिदिव्यधिगृधिधृषिहृशिभ्यः ॥ २४ ॥

पॄ पालनपूरणयोः। भिदिर् विदारणे। व्यध ताडने। गृधु अभिकांक्षायां। ञिधृषा प्रागल्भ्ये॥ एभ्यः कुः स्यात्। उत्तरपरत्वे। पुरुर्भूरिपरागयोरिति धरणिः। पुरुरसुरविशेषो ऽपीत्यमरटीकायां। अत एव पुरुणोपहूतः पुरुहूतः। पुरुं दृष्टवान् पुरुदंशाः। उदोष्ठ्यपूर्वस्य। पा० ७. १. १०२.। इत्युत्वं। उरण् रपरः। पा० १. १. ५१.। इति रपरत्वं। इंद्रस्य नामद्वयं॥ भिनत्तीति भिदुर्वज्रं॥ व्यधेः संप्रसारणं च। विरहिणं विध्यतीति विधुश्चंद्रः। विधुः शशांके कर्पूरे हृषीकेशे च राक्षसे। धांत० १३.। इति विश्वप्रकाशः। विधुश्चंद्रे च विष्णौ च। विध्वरुषोस्तुदः। पा० ३. २. ३५.। इति खश्। विधुंतुदो राहुः॥ गृधुः कामः॥ धृषुर्दक्षः॥

कृग्रोरुच्च ॥ २५ ॥

डुकृञ् करणे। गॄ निगरणे॥ आभ्यां कुः स्यादुच्चांतादेशः। कुरुस्तूत्तरराज्ञो देशभेदश्च। कुरुक्षेत्रं। कुर्वादिभ्यो ण्यः। पा० ४. १. १५१.। कौरव्यः॥ गुरुस्तातबृहस्पत्योः। गुरुर्निषेकादिकारे पित्रादौ सुरमंत्रिणि। विश्वको० रांत० ७८.। इति च। पृथ्वादित्वादिमनिच्। प्रियस्थिरेत्यादिना। पा० ६. ४.

१५७.। गरादेशः। गरिमा। खुराहतो यत्सदृशं गरिम्णः। ३. २८.। इति माघः ॥

अपदुःसुषु स्थः ॥ २६ ॥

तिष्ठतेरप दुः सु इत्येतेषूपपदेषु कुः स्यात्। सुषामादित्वात्षत्वं। अपष्ठुर्वामः प्रतिकूलं च ॥ दुष्ठुरविनीतः ॥ सुष्ठु शोभनं। उद्गात्रादित्वादञि सौष्ठवं दौष्ठवमिति। एषां त्रयाणां मृगय्वादिपाठेन सिद्धत्वात्सूत्रमिदं न्यासकारस्यासंमतमिति सुषामादिषु चेत्यत्र रक्षितः ॥

रपेरिच्चोपधायाः ॥ २७ ॥

रप लप जल्प व्यक्तायां वाचि ॥ अतः कुर्भवति। इकारश्चोपधायाः। अनिष्टं रपतीति रिपुः शत्रुः ॥

अर्जिदृशिकम्यमिपंसिबाधामृजिपशितुक्धुक्दीर्घह्काराश्च ॥ २८ ॥

अर्ज षर्ज अर्जने। दृशिर् प्रेक्षणे। कमु कांतौ। अम रोगे गत्यादौ वा। पसि नाशने। बाधृ लोडने ॥ एभ्यः षड्भ्यो धातुभ्यः कुप्रत्ययः। एतेषां यथाक्रममृजि पशि तुक् धुक् दीर्घो हकार इत्येत आगमा आदेशाश्च भवंति ॥ अर्जयति गुणान् ऋजुः प्रगुणः ॥ सर्वमविशेषेण पश्यतीति पशुर्गवि मृगादिषु देवे च। अतो महादेवः समासे पशुपतिः। अश्वपत्यादित्वादणि पाशुपतः। पशुश्चादौ निपातः। पशु दृश्यार्थमव्ययमिति धरणिः ॥ कमिमनीत्यत्रैव कंतुशब्दो व्युत्पादितः। अतश्चात्र कमेर्ग्रहणं प्रपंचार्थमिति लक्ष्यते। कंतुः कंदर्पः ॥ अंधुः कूपः। पुंस्येवांधुप्रही कूप इत्यमरः। कर्कंधुर्नष्टकूपः स्यादिति सुभूतिः ॥ पांसुर्धूलिः। पांशुर्ना न द्वयो रज इत्यमरः। पांशुर्धूलिषु सस्यार्थचिरसंचितगोमये। शांत° १२.। इति तालव्यांते विश्वप्रकाशः। दंत्यांतोऽपि। तालव्या अपि दंत्याश्च संबसूकरपांसव इति शकारभेदः। २५.। कपिशकाभिरणं सुबरा वृंदावनमाहता ववुरपांसुबराः। वृ° २८.। इति वृंदावनयमकं ॥ बाहुः स्त्रीपुंसयोर्भुज इत्यमरः। अकारांतोऽपि वाहशब्दो भुजवाचकः। तथा च वाहो ऽश्वभुजयोः पुमानिति दामोदरः। टाबंतोऽप्ययं। वाहुर्वाहा भुजा भुजः। सुवाहा इति वासवदत्तायां सुबंधुश्लेषः। शोभनाश्वाः पक्षे शोभनभुजाः ॥

प्रथिम्रदिभ्रस्जां संप्रसारणं सलोपश्च ॥ २९ ॥

प्रथ प्रख्याने। मृद् मर्दने। भ्रस्ज पाके ॥ एभ्यः कुर्भवति। एषां च संप्रसारणं भ्रस्जेः सलोपश्च॥ पृथुरादिराज्ञो विस्तीर्णं च। स्त्रियां पृथ्वी॥ मृदितुं शक्यते मृदु कोमलं। स्त्रियां मृद्वी॥ न्यंक्वादित्वात्कुत्वे भृज्जति तपसा भृगुर्मुनिभेदः प्रपातश्च। भृगुः शुक्रे प्रपाते च जमदग्नौ पिनाकिनि। गांत° ६.। इति विश्वः। भृगोरपत्यं भार्गवः। बहुवचने तु अत्रिभृगुकुत्सवसिष्ठगोतमांगिरोभ्यश्च। पा° २.४.६५.। इति तद्धितलोपे भृगवः॥

लंघिबंह्योर्नलोपश्च ॥ ३० ॥

लघि गतौ। बहि महि वृद्धौ॥ आभ्यां कुः स्यादनयोर्नलोपश्च। लंघितुं शक्यत इति लघुः स्वल्पः। स्त्रियां वोतो गुणवचनादिति ङीष्। लघ्वी। लघुः। पृथ्वादित्वाल्लघिमा॥ बालमूललघ्वंगुलीनां वा लो रत्वमापद्यते। पा° ८.२.१८.२.। इति रेफादेशः। रघुर्नृपभेदः॥ बहुः प्रचुरसंख्ययोः। बहून्यान् लातीति बहुलं॥

ऊर्णोतेर्नुलोपश्च ॥ ३१ ॥

ऊर्णुञ् आच्छादने॥ अस्मात्कुप्रत्ययो भवति नुलोपश्च। ऊरुर्जंघा। ऊरूत्तरपदादौपम्ये। पा° ४.१.६९.। ऊरूः। करभोरूः। नागनासोरूः॥

महति ह्रस्वश्च ॥ ३२ ॥

ऊर्णुञ्धातोरेव महति वाच्ये कुप्रत्ययो ह्रस्वो धातोर्नुलोपश्च। उरु महत्। पृथ्वादित्वादिमनिच्। प्रियस्थिरेत्यादिना वरादेशः। वरिमा। वरिष्ठः। वरीयान्। दधत्युरोजद्वयमुर्वशीतलं भुवो गतेव स्वयमुर्वशी तलं। श्रभौ मुखेनाप्रतिमेन का चन श्रियाधिका यां प्रति मेनका च न।१.८६.। इति माघे पादांतयमकं॥

श्लिषेः कश्च ॥ ३३ ॥

श्लिष आलिंगने॥ अस्मात्कुप्रत्ययः कश्चांतादेशः। श्लिकुः परवशो ज्योतिषं च॥

आङ्परयोः खनिशृभ्यां डिच्च ॥ ३४ ॥

खनु अवदारणे। शॄ हिंसायां॥ आभ्यां यथाक्रममाङ्परयोरुपपदयोः कुः

स्यात् स च डिद्भवति। डित्वाट्टिलोपः। आखनतीत्याखुर्मूषकः स्याद्वाराहश्च॥ परं शृणातीति परशुः कुठारो ऽस्त्रभेदश्च। पृषोदरादित्वादलोपः। पर्शुः परशुना सह। शब्दभेद. ३८.। इति विश्वः॥

हरिमितयोर्द्रुवः ॥ ३५ ॥

द्रु गतौ॥ अस्माद्धरिमितयोरुपपदयोः कुः स्यात् स च डित्। हरिद्रु-दारुहरिद्रा॥ मितद्रुः॥

शते च ॥ ३६ ॥

शतशब्द उपपदे द्रुवः कुप्रत्ययो भवति स च डित्। शतधा द्रवतीति शतद्रुर्गंगा नदीभेदश्च॥ बाहुलकात्केवलादपि कुप्रत्ययः। द्रवत्यूर्ध्वमिति द्रुर्वृक्षः। शाखावचनो ऽपि द्रुशब्दः। तद्योगात् सुद्रुभ्यां मः। पा० ५. २. १०८.। द्रुमः॥

खरुशंकुपीयुनीलंगुलिगु ॥ ३७ ॥

खरु इत्येवमादयश्च शब्दाः कुप्रत्ययांता निपात्यंते। खनेः कू रश्चांतादेशः। खरुः कामः। खरुर्दंते हरे दर्पे हये श्वेत तु वाच्यवत्। रांत० ७७.। इति विश्वः॥ शकेर्मुम्। शकि शंकायां च। अतः कुः स्यात्। शंकुर्ना कीलशल्ययोः। शंकुः कीले गरे शस्त्रे संख्यापादपभेदयोः। यदोभेदे च पापे च स्थाणावपि च दृश्यते। विश्वप्र० कांत० ४२.। शकिग्रहणं पृभिदिव्यधीत्यदौ नोक्तं वैचित्र्यार्थं। शंकुपूर्वाल्लातेरातो ऽनुपसर्गे कः। पा० ३. २. ३.। इति के शंकुला कर्तरीति तत्पुरुषे तुल्यार्थेत्यत्र वृत्तिः॥ पा पाने॥ कुर्युगागम ईत्वं चांतादेशः। पीयुर्वायसकालयोः॥ लगि गतौ॥ अस्मान्निपूर्वात्कुर्नेर्दीर्घश्च। नीलंगुः क्रिमिजातौ स्यात् भ्रमरालीप्रसूनयोः। गांत० ५०.। इति विश्वः। के चिद्धातूपसर्गयोर्दीर्घमाहुः। नीलांगुः॥ लगे संगे। सर्वत्र लगतीत्यत्रार्थे कुप्रत्यये धातोरत इत्वं च। लिगु चित्त नपुंसकमिति वररुचिः॥ खजि गतिवैकल्ये। बाहुलकादतो ऽपि कुः। खञ्जयोः पगौ नुगागमश्च। पंगुर्गतिहीनः॥ तथा हंतेरत इत्वं च गुगागमश्च धातोः। हंति स्वगंधेनान्यगंधानिति हिंगुर्वणिग्द्रव्यं॥

मृगय्वादयश्च ॥ ३८ ॥

मृगयुप्रभृतयः कुप्रत्ययांता निपात्यंते। मृग देव मित्र कुमार अध्वर

इत्येतेषूपपदेषु या प्रापणे इत्यस्माद्धातोः कुः स्यात्। मृगं यातीति मृगयुर्व्याधः॥ देवयुर्धार्मिकः॥ मित्रयुर्लोकयात्राभिज्ञः। तस्यापत्यमित्यत्रार्थे शुभ्रादित्वात् ढकि केकयमित्रयुप्रलयानां यादेरियादेशापवादो दांडिनायनेत्यादिना युशब्दलोपः। मैत्रेयो रक्षितः॥ कुमारयू राजपुत्रः॥ अध्वरस्याकारलोपश्च। अध्वर्युर्याजकः। अध्वर्युक्रतुरित्यादौ रक्षितेनाध्वरमिच्छतीति क्यचि कव्याध्वरेत्यंतलोपे क्याच्छंद-सीत्युप्रत्यये छांदसा अपि क्व चिद्भाषायां प्रयुज्यंत एवेत्यत्रार्थे ज्ञापकमुक्तं। एवं चात्रत्यः पाठः प्रपंचार्यः॥ कुह विस्मापने। बाहुलकादतो ऽपि कुः। कुहुः कुहूरमावास्याचंद्रः॥ पडि गतौ। धातोर्वृद्धिश्च। पाण्डुः। यदपत्यानि पांडवाः॥ पील प्रतिष्टंभे। पीलुर्मतंगजः। पीलुर्गजे द्रुमे कांडे परमाणुप्रसूनयोः। लांत° ३३.। इति विश्वः। समासे महापीलुपतिः॥ मंजिः सौत्रो धातुः। मंजु शोभनं॥ कडि मदे। कंडुः। मृगस्य कंडुरिति समासे पृषोदरादित्वाद्गलोपे मृकंडुः। अपत्ये शुभ्रादित्वात् ढक्। मृकंड इति के चिदत्र पठंति। ढे लोपो ऽकद्र्वाः। पा° ६.४.१४७.। इत्युलोपः। मार्कंडेयो मृकंडुज इत्यागमः। एवं निघंटु पलांडु कर्करेंदु करेंडु पेरु उमरु प्रभृतयो ऽप्यत्रैव द्रष्टव्या आकृतिगणत्वात्॥

मंदिवाशिमथिचतिचंक्यंकिभ्य उरच् ॥३९॥

मदि स्तुत्यादौ। वाशृ शब्दे। मथे विलोडने। चते याचने। चक इति सौत्रो धातुः। अकि लक्षणे॥ एभ्य उरच् स्यात्। मंदुरा वाजिशाला॥ वाशुरा रात्रिः॥ मथुरा नगरी॥ चतुरो दक्षः॥ चंकुरो रथः॥ अंकुरो बीजोत्पादः। खर्जूरादित्वादूरप्रत्ययो ऽपि। अंकूरो ऽप्यंकुरो मत इति वर्ण-विवेकः। अंकुरो ऽंकूर एव च। शब्दभेद. ६.। इति विश्वप्रकाशः॥

व्यथेः संप्रसारणं किच्च ॥४०॥

व्यथ भयचलनयोः॥ अस्मादुरच् किद्भवति संप्रसारणं च धातोः। विथुरश्चौररक्षसोः॥

मकुरदर्दुरौ ॥४१॥

एतौ निपात्येते॥ मकि मंडने। अस्मादुरच् नलोपश्च धातोः। मकुरो दर्पणो मतः। बाहुलकादकारस्योकारे कृते मकुरो मुकुरो ऽपि च। शब्द° २१.। इति विश्वः। रामो हे मकुरं गत इति मतिनिर्णायः। उकारसहितो मकारो मुकुर इत्यपि भवतीति के चित्। प्रमाणं चिंत्यं॥ दृ विदारणे। उरच्।

धातोर्द्विर्वचनमभ्यासस्य रुगागमो धातोष्टिलोपश्च निपात्यते। दर्दुरो मेघमंडूक-वाद्यभेदेषु कीर्तित इति चंद्रः। दर्दुरस्तोयदे भेके वाद्यभांडाद्रिभेदयोः। दर्दुरा चंडिकायां तु ग्रामजाले च दर्दुरं। रांत° ४८.। इति विश्वः॥

मद्गुरादयश्च ॥ ४२ ॥

मद्गुरप्रभृतयः शब्दा उरन्ता निपात्यंते॥ मदी हर्षे। धातोर्गुगागमश्च। मद्गुरो मत्स्यभेदः स्यात्॥ कबृ वर्णे। रुगागमश्च। कर्बुरः श्वेतरक्षसोः॥ बंध बंधने। बंधुरः। खर्जूरादित्वादूरप्रत्ययो ऽपि। बंधूरबंधुरौ स्यातां नम्रसुंदरयोस्त्रिष्विति रंतिदेवकोशः॥ चिनोतेः कुक् च। चिकुरश्चलकेशयो-रित्यमरः॥ कुक आदाने। धातोर्वा कुगागमश्च। कुकुरः कुक्कुरो मत इति हट्टचंद्रः॥ अत सातत्यगमने। धातोरादो दीर्घः। आतुरो ऽक्षमः। घृतमुत्तमं विधिविपक्वमाहितं प्रपिबन्निदं जयति कुष्ठमातुर इति वैद्यं॥ वा गतिगंधनयोः। गुगागमश्च धातोः। वागुरा मृगबंधिनी॥ शकॢ शक्तौ। वकि कौटिल्ये॥ आभ्यां प्रत्ययरेफस्य लत्वं वंकेर्नलोपश्च। शकुलवकुलौ स्यातां मत्स्यवृक्ष-विशेषयोः॥

असेरुरन् ॥ ४३ ॥

असु क्षेपणे॥ अस्मादुरन्प्रत्ययः। अस्यतीत्यसुरो दैत्यः। स्वार्थे प्रज्ञादि-त्वादण्। आसुरः स एव॥

मसेश्च ॥ ४४ ॥

मसी परिमाणे॥ अस्मादुरन्। मसुरो व्रीहिभेदे स्यात्। तथा च। मसूरा मसुरा व्रीहिप्रभेदे पण्ययोषिति। मसूरमसुरौ च द्वावेतावप्येतयोर्मतौ॥ रांत° २२०.। इति विश्वप्रकाशः। स्त्रियां टाप्। मसुरा पण्यस्त्री। पंचमे पादे मसेन्नरन्नित्यूरन्प्रत्यये मसूरशब्दो ऽप्यस्मिन्नेवार्थे। तथा च मसूरो मसुरो मत इति द्विरूपकोषः॥

शावशेराप्तौ ॥ ४५ ॥

शु इति कृताकारलोप आशुशब्दः। तस्मिन्नुपपदे आप्तौ गम्यमानाया-मशू व्याप्तावित्यस्माद्धातोरुरन् स्यात्। श्वशुरो दंपत्योः पिता। शुशब्दो ऽत्राशुशब्दाभिधायी। आशु व्याप्तव्यः श्वशुर इति धातुपारायणं। तस्यापत्यं

राजश्वशुराद्यत्। पा॰ ४. १. १३७.। श्वशुर्यः श्यालः। श्वशुरो नाम कश्चित्। तस्यापत्यं। संबंधिशब्दानां तत्सदृशात्प्रतिषेध इति यति निषिद्धे ऽत इञ्। पा॰ ४. १. ९५। श्वाशुरिः। स्वागतादेराकृतिगणत्वदैच्निषेधः। स्त्रियां श्वशुरस्य स्त्रीत्यत्रार्थ उङ्विधौ श्वशुरस्योकाराकारयोर्लोपश्च। पा॰ ४. १. ६८. १.। इति वार्त्तिकं। श्वश्रूः। पतिपत्न्योः प्रसूः श्वश्रूः श्वशुरश्च तयोः पितेत्यमरः॥

अविमह्योष्टिषच् ॥ ४६ ॥

अव रक्षणपालने। मह पूजायां॥ आभ्यां टिषच् स्यात्। अवंति प्रीणंति तं नद्य इत्यत्रार्थे ऽविषः समुद्रः॥ महंत्यनेन देवानिति महिषः पशुविशेषः। लुलापो महिष इत्यमरः। महिषः सैरभ उक्तो रक्ताक्षः कासरो लुलापश्च। २. ७३.। इति हलायुधः। टित्वात्स्त्रियां ङीप्। अविषी नदी॥ महिषी स्त्रीपशू राजपत्न्यपि॥

अमेर्दीर्घश्च ॥ ४७ ॥

अम गतौ॥ अस्माट्टिषच् धातोर्दीर्घश्च। आमिषं मांसादि। आमिषं भक्ष्यमांसयोरिति द्विरूपकोषः। आमिषे पृषोदरादित्वादादौ पक्षे ह्रस्वत्वं च। भोग्यवस्तुनि त्वामिषमिवामिषमिति वर्णविवेकः॥

रुहेर्वृद्धिश्च ॥ ४८ ॥

रुह जन्मनि। अस्माट्टिषच् वृद्धिश्च धातोः। रौहिषो मृगभेदः स्याद्रौहिषं च तृणं मतमिति संसारावर्तः। स्त्रियां रौहिषी मृगी लता च। अव्युत्पन्नो ऽवृद्धो रोहिच्छब्दो ऽप्यस्ति। रोहिद्भूतां रिरमयिषुमृष्यस्य वपुषेति महिम्नः स्तवः। २२.। क्रमेत सुप्तरोहिषीत्यभिनंदः॥

तवेर्णिद्वा ॥ ४९ ॥

तवेति सौत्रो धातुः॥ अस्माट्टिषच् स च पक्षे णिद्भवति। णित्वात्पक्षे वृद्धिः। तविषताविषावब्धौ त्रिदिवं वाहतुः क्व चित्। स्त्रियां ताविषी तविषी नदी देवकन्या भूमिश्च॥

नञि व्यथेः ॥५०॥

व्यथ भयचलनयोः ॥ अस्मान्नञ्युपपदे टिषच्। अव्यथिषो ऽब्धिसूर्ययोः। अव्यथिषी धरारात्र्योः ॥

किलेर्बुक्च ॥५१॥

किल श्वैत्यक्रीडनयोः ॥ अस्माट्टिषच् धातोर्बुगागमश्च। किल्बिषं पाप्मनि स्मृतं ॥

इषिमदिमुदिखिदिछिदिभिदिमंदिचंदितिमिमिहिमुहिमुचिरुचिरुधिबंधिशुषिभ्यः किरच् ॥५२॥

इषु इच्छायां। मदी हर्षे। मुद हर्षे। खिद दैन्ये। छिदिर् द्विधाकरणे। भिदिर् विदारणे। मदि स्तुत्यादौ। चदि आह्लादने। तिम आर्द्रीभावे। मिह सेचने। मुह वैचित्ये। मुचॢ मोक्षणे। रुच दीप्तौ। रुधिर् आवरणे। बंध बंधने। शुष शोषणे ॥ एभ्यः षोडशधातुभ्यः किरच् स्यात्। इषिरो ऽग्निः ॥ मदिरा सुरा ॥ मुदिरो मेघः। मुदिरः कामुके अभ्रे। रांत° १२७.। इति विश्वप्रकाशः ॥ खिदिरश्चंद्रः ॥ छिदिरो ऽसिकुठारयोः ॥ भिदिरं वज्रं। भिदुरं पविरित्यमरः। घुरच्कुरचौ कर्मकर्तरीति जयादित्यवचनाद्वामनमते साधुः ॥ मंदिरं गृहं। मंदिरं मंदिरापि स्यात्। शब्दभे° ११.। इति विश्वः॥ चंदिरौ चंद्रहस्तिनौ ॥ तिमिरं तमो ऽक्षिरोगश्च ॥ मिहिरः सूर्यः ॥ मुहिरः कामालस्ययोः ॥ मुचिरो दाता ॥ रुचिरं शोभनं ॥ रुधिरं शोणितं। अनिदितां हल उपधायाः क्ङिति। पा° ६.४.२४.। इति नलोपः॥ बधिरो गतश्रोत्रेंद्रियः ॥ शुषिरं छिद्रमाकाशश्च ॥

अशेर्णित् ॥५३॥

अश भोजने॥ अतः किरच् स च णिद्वति। आशिरो वह्निरक्षसोः॥

अजिरशिशिरशिथिलस्थिरस्फिरस्थविरखदिराः ॥५४॥

अजिरादयः सप्त किरजंता निपात्यंते ॥ अजेर्वीभावाभावः। अजिरमंगणं ॥ शश प्लुतगतौ। उपधाया इत्वं। शिशिरमृतुभेदः। शिशिरं स्यादृतोर्भेदे तुषारे शीतले ऽन्यवत्। रांत° १३३.। इति विश्वः ॥ अथ

मोचने। उपधाया इत्वं। रेफस्य लोपः। प्रत्ययरेफस्य लत्वं। शिथिलमकठिनप्रश्लथयोः॥ तिष्ठतेराल्लोपः। स्थिरं निश्चलं। गवियुधिभ्यां स्थिरः। पा° ८. ३. ९५.। इति षत्वं। गविष्ठिरः। युधिष्ठिरः॥ स्फायी वृद्धौ। आल्लोपः। स्फिरं प्रभूतं॥ तिष्ठतेर्वुक् ह्रस्वत्वं च। स्थविरो भिक्षुवृद्धयोः। प्रज्ञादित्वादणि स्थाविरं वृद्धत्वमित्यमरः॥ खद हिंसायां। खदिरो वृक्षभेदः॥ बहुलवचनात् शीङो वुक् ह्रस्वत्वं च। शिविरं नृपस्य मूलस्थानं। निवेशः शिविरं शंढ इत्यमरः॥

सलिकल्यनिमहिभडिभंडिशंडिपिंडितुंडिकुकिभूभ्य इलच् ॥ ५५ ॥

सल गतौ। कल संख्याने। अन च। धातुपाठ. २४. ६२.। मह पूजायां। भड इति सौत्रो धातुः। भडि परिहासे। शडि रुजायां। पिडि संघाते। तुडि तोडने। कुक आदाने। भू सत्तायां॥ एभ्य एकादशभ्य इलच् स्यात्॥ सलति निम्नमिति सलिलं जलं॥ कलिलं मिश्रं गहनं च॥ अनिलो वातः॥ महिला स्त्री। पृषोदरादित्वात् महिलाशब्दस्यार्थे महेलाशब्दो ऽपि साधुः। तथा च दमयंतीकाव्ये। परमहेलारतो ऽप्यपारदारिकः। परस्य महेला स्त्री। अथ च परमहेला परमक्रीडा॥ भडिलो शूरसेवकौ॥ भंडिलो दूतः कल्याणं च॥ शंडिलो मुनिः। यस्यापत्यं शांडिल्यः॥ पिंडिलो गणकः॥ तुंडिलो मुखरः॥ कोकिलः पिकः। स्त्रियां टाप्। कोकिला। अवक्रुष्टकोकिलयेति वृत्तिः॥ भविलो भव्यः॥ कुट कौटिल्ये। बाहुलकादतो ऽपि भवति। कुटिलः क्रूरकर्मा॥

कमेः पश्च ॥ ५६ ॥

कमु कांतौ॥ अत इलच् पश्चांतादेशः। कपिलो वर्णभेदः। मुनिः॥

गुपादिभ्यः कित् ॥ ५७ ॥

गुपू रक्षणे। तिज निशाने। पूज पूजायां। शुष शोषणे। देवृ देवने। गुहू संवरणे॥ एभ्य इलच् किद्भवति। गुपिलो राजा॥ तिजिलो निशाकरः॥ पूजिलो देवः॥ शुषिलः पवनः॥ देविलो धार्मिकः॥ गुहिलं वनं॥

मिथिलादयश्च ॥ ५८ ॥

मिथिलादय इलजंता निपात्यंते ॥ मथे विलोडने। अकारस्येत्वं। मथ्यंते रिपवो ऽत्रेति मिथिला विदेहनगरी। तस्यापत्यमिति मैथिली जानकी प्रोक्ता ॥ गमेस्तकारांतादेशः। गतिला वेत्रलता॥ तकि कृच्छ्रजीवने। नलोपश्च। तकिलोषधिः॥ चमु अदने। अस्मात् डुगागमः। चंडिला नदी॥ पथे गतौ। पथिलः पथिकः ॥

पतिकठिकुठिगडिगुडिदंशिभ्य एरक् ॥ ५९ ॥

पत्लृ गतौ। कठ कृच्छ्रजीवने। कुठि च। गड सेचने। गुड रक्षायां। दन्श दशने॥ एभ्य एरक् स्यात्। पतेरः पक्षी गंता च॥ कठेरः कृच्छ्रजीवी॥ बाहुलकान्नुमो ऽभावः। कुठेरः पर्णासः॥ गडेरो मेघः॥ गुडेरो गुडकः॥ अनुनासिकलोपे दशेरो हिंस्रः ॥

कुन्वेर्नलोपश्च ॥ ६० ॥

कुवि आच्छादने॥ अत एरक् नलोपश्च। अन्यैश्वर्यं कुंवतीति कुवेर-स्त्र्यंबकसखः। वेरं शरीरमित्यागमः। कुत्सितं वेरमस्यास्ति कुवेर इत्यपि व्युत्पत्त्यंतरं ॥

शदेस्त च ॥ ६१ ॥

शद्लृ शातने॥ अत एरक्। तकारांतादेशः। शतेरः शत्रुः ॥

मूलेरादयः ॥ ६२ ॥

मूलेरादय एरगंता निपात्यंते॥ मूल प्रतिष्ठायां। गुध परिवेष्टने। गुहू संवरणे। मुह वैचित्ये॥ एभ्य एरक्। मूलेरो राजा॥ गुधेरो गोप्ता॥ गुहेरो लोहघातकः॥ मुहेरो मूर्खः॥

कवेरोतच् पश्च ॥ ६३ ॥

कवृ वर्णे॥ अत ओतच् पश्चांतादेशः। कपोतः पक्षी॥ गुपादिसूत्रादा-रभ्यैतत्सूत्रं यावत्सप्त सूत्राणि केषां चित्संमतानि ॥

भातेर्डवतुप् ॥ ६४ ॥

भा दीप्तौ॥ अतो डवतुप्। भवान् सर्वनाम। भवतश्चकृइसो। पा° ४.

२.११५.। भावत्को भवदीयः। अव्युत्पन्नं वा प्रातिपदिकं भवदित्युकारांतवदिति मतुप्सूत्रे न्यासः ॥

कठिचकिभ्यामोरन् ॥ ६५ ॥

कठ कृच्छ्रजीवने। चक तृप्तौ॥ आभ्यामोरन्। कठोरः कठिनः पूर्णश्च। कठोरतारापतिलांछनच्छविः। १.२०.। इति माघः॥ चकोरः पक्षिविशेषः ॥

किशोरादयश्च ॥ ६६ ॥

किशोरादय ओरनंता निपात्यंते॥ शॄ हिंसायां। षह मर्षणे। गै शब्दे॥ किंपूर्वस्य शृणातेष्टिलोपः। किमो ऽंत्यस्य लोपः। किशोरो ऽश्वशावकः॥ सहोरः साधुः॥ गौरो ऽरुणे सिते ऽपि च। गौरो ऽरुणे सिते पीते विशुद्धे चाभिधेयवत्। गौरस्तु विशदे पद्मे केसरे सितसर्षपे॥ गौरः शशिनि गौरी तु नग्नकन्योमयोर्मता। रोचनीरजनीपिंगाप्रियंगुवसुधासु च। नदीभेदे च गौरी स्यादरुणस्य च योषिति। विश्व° रांत° २१. ॥

कपिगडिगंडिकटिपटिभ्य ओलच् ॥ ६७ ॥

कपि चलने। निर्देशान्नलोपः। गड सेचने। गडि वदनैकदेशे। कटे वर्षावरणयोः। पट गतौ॥ एभ्य ओलच्। कपोलो वदनैकदेशः॥ गडोलगंडोलौ गुडकपर्यायौ॥ कटोलः कटुः कटोलश्चांडालः। कटोलवीणा चांडालवल्लकी। चांडालिका तु कंडोलवीणा चांडालवल्लकीत्यमरः॥ पटोलस्तु समाख्यातः फलवस्त्रविशेषयोः॥ कडि मदे। कंडोलः पिटक इति का चित्पुणादिवृत्तिः॥ कल्ल शब्दे। बाहुलकादलो ऽपि भवति। कल्लोल इति धातुप्रदीपः॥

मीनातेरूरन् ॥ ६८ ॥

मीञ् हिंसायां॥ अत ऊरन्। मयूरः पक्षिविशेषः। मह्यां रौतीति पृषोदरादित्वादपि मयूरः। कलिंगस्तु मयुं शब्दं करोतीत्यातो ऽनुपसर्गात्क इति कप्रत्यये दीर्घत्वं वा मयूर इत्याह। एवं च प्रपंचार्थमिदं ॥

स्यंदेः संप्रसारणं च ॥ ६९ ॥

स्यंदू स्रवणे॥ अत ऊरन् संप्रसारणं च। सिंदूरं रक्तचूर्णे स्यादूाज-

लेखे तदंतिके। सिंदूरो वृक्षभेदे ऽपि सिंदूरी रक्तचेलिका॥ सिंदूरो रक्त-चूर्णे स्यात्सिंदूरस्तद्भिदपि। सिंदूरी रोचनीरक्तचेलिकाधातकीषु च। रांत° २०७.। इति विश्वप्रकाशः ॥

सितनिगमिमसिसच्यविधाञ्क्रुशिभ्यस्तुन् ॥७०॥

षिञ् बंधने। तनु विस्तारे। गम्लृ गतौ। मसी परिमाणे। षच सेचने। अव रक्ष पालने। डुधाञ् धारणपोषणयोः। क्रुश आह्वाने॥ एभ्यो धातुभ्यस्तुन् स्यात्। सिनोति जलमिति सेतुर्जलबंधः। सेतुरालौ स्त्रियां पुमान्। अम° २.१.१४.॥ तितुत्रतथसिसुसरकसेषु। पा° ७.२.९.। इत्यादिनेट्प्रतिषेधः। तंतुः सूत्रं। सूत्राणि नरि तंतव इत्यमरः। वरतंतुर्मुनिः। तित्तिरिवरतंतु। पा° ४.३.१०२.। इत्यादिना प्रोक्तार्थे छण्। वारतंतवीयः॥ गंतुः पथिकः। आङ्पूर्वादागंतुरभ्यागतः॥ मस्तु दधिभवं मंडं। क्लीबलिंगमेतत्॥ सच्यते स्नेहेन सिच्यत इति सक्तुर्यवविकारः। अर्धर्चादिरयं। सिध्मादित्वान्मत्वर्थे लच्। सक्तुलः॥ ज्वरत्वरेत्यूठ्। पा° ६.४.२०.। बाहुलकादकुञ्जित्वादप्राप्ते-रोतुर्बिडालः॥ धातुर्गैरिकमस्त्रियां। धातुः स्यादन्नविकृतौ विषयेष्विंद्रिये ऽपि च। भूतादिरसरक्तादिश्लेष्मादिवसुधादिषु। तांत° ११.। इति विश्वः॥ तृज्वत्क्रोष्टुः। पा° ७.१.९५.। इति तृज्वद्भावादिकं। क्रोष्टा शृगालः। स्त्रियामृन्नेभ्यो ङीप्। पा° ४.१.५.। क्रोष्ट्री॥

पः किच्च ॥७१॥

पा पाने॥ अस्मात्तुन् स च किद्भवति। कित्त्वादीत्वं। पीतुर्वह्नौ दिवाकरे॥

अर्तेश्च तुः ॥७२॥

ऋ गतौ॥ अतस्तुः स च किद्भवति। ऋतुः स्त्रीपुष्पकालयोः। ऋतोरण्। ऋतौ भवमार्तवं। ऋतुरेवार्तवः। प्रज्ञादित्वादण्॥

कमिमनिजनिगाभायाहिभ्यश्च ॥७३॥

कमु कांतौ। मन ज्ञाने। जनी प्रादुर्भावे। गै शब्दे। भा दीप्तौ। या प्रापणे। हि गतौ॥ एभ्यस्तुः स्यात्। कंतुः कंदर्पचित्तयोः। कमिग्रहणं प्रपंचार्थं। अर्त्तिदृशीत्यादिना कुप्रत्यये तुकि सिद्धत्वात्॥ मंतुरपराधः। कंड्वादित्वाद्यकि मंतूयति प्रज्ञुः॥ जंतुः प्राणी॥ गातुः पथिकगंधर्वौ। गातुः पुंस्को-

किले भृंगे गंधर्वे गायने ऽपि च। विश्व° तांत° २१.। भातुरादित्यः॥ यातुरध्वगकालयोः। रक्षसि वर्तमानो यातुशब्दः क्लीबे॥ हेतुः कारणं॥

चायः किः ॥ ७४ ॥

चायृ पूजानिशामनयोः॥ अतस्तुर्धातोः किरादेशश्च। केतुर्ग्रहपताकयोः। धूमकेतुरुत्पातः॥

आप्नोतेर्ह्रस्वश्च ॥ ७५ ॥

आप्लृ व्याप्तौ॥ अतस्तुर्ह्रस्वत्वं च धातोः। अप्तुः शरीरं॥

वसेस्तुन् ॥ ७६ ॥

वस निवासे॥ अतस्तुन् स्यात्। वस्तु द्रव्यं॥

अगारे णिच्च ॥ ७७ ॥

वसतेरागारे वाच्ये तुन् णिद्वत्। वेश्मभूर्वास्तुरस्त्रियां। अम° २. २. ११.।

कृञः क्तुः ॥ ७८ ॥

करोतेः क्तुः स्यात्। गुणाभावार्थः कः। क्रतुर्यज्ञः। पूतक्रतुरिंद्रः। तस्य स्त्रीत्यर्थे पूतक्रतोरै च। पा° ४. १. ३६.। इति ङीबैकारौ। पूतक्रतायींद्रभार्या॥ बाहुलकात् ला आदाने। अतो ऽपि भवति। ल्तुः। गर्गादित्वाल्लातव्य इत्युपाध्यायसर्वस्वं॥

एधिवह्योश्चतुः ॥ ७९ ॥

एध वृद्धौ। वह प्रापणे॥ आभ्यां चतुः। चकारः स्वरार्थः। चितो ऽन्त उदात्तः। एधतुः पुरुषो मतः॥ वहतुरनड्वान्॥

जीवेरातुः ॥ ८० ॥

जीवतेरातुः स्यात्॥ जीवातुर्जीवने भक्ते जीवातुर्जीवनौषधे। विश्व° तांत° १२५.॥

आतृकन्वृद्धिश्च ॥ ८१ ॥

जीवेरातृकन्वृद्धिश्च धातोः। जैवातृकः शशांकः स्यादायुष्मानपि कीर्तित इत्यमरः॥

कृषिचमितनिधनिसर्जिखर्जिभ्य ऊः ॥ ८२ ॥

कृष विलेखने। चमु अदने। तनु विस्तारे। धन धान्ये। सर्ज अर्जने। खर्ज व्यथने॥ एभ्यः षड्भ्य ऊः स्यात्। कर्षूः पुंसि करीषाग्नौ कर्षूर्नद्यां स्त्रियां मतेति रभसकोशः॥ चमति परराष्ट्रमिति चमूः सेना। इको ह्रस्वो ऽङ्यो गालवस्य। पा° ६. ३. ६१.। इति पक्षे ह्रस्वत्वं। चमुपतिः। चमूपतिः॥ तनूः शरीरं। स्त्रियां मूर्त्तिस्तनुस्तनूरित्यमरः। ननु सुतनूमनुपालया-नुयातां। ७. १२.। इति माघः। संबुद्धिह्रस्वत्वे वरतनु संप्रवदंति कुक्कुटा इति वृत्तिः। ह्रस्वांततनुशब्दे गुणः स्यात्। ऊङि वा ह्रस्वः। वरतनुरमु-नोपहूय। माघ° ७. ५८.। इति माघे ह्रस्वांतस्य प्रयोगः॥ धनूः शस्त्रं॥ सर्जूर्वणिक्॥ खर्जूः कंडूया॥ बहुलवचनात्कुह विस्मापने। अतो ऽपि चौ-रादिकाद्वः। कुहूरिति धातुप्रदीपटीका॥

मृजेर्गुणश्च ॥ ८३ ॥

मृजू शुद्धौ॥ अत ऊः स्यात्। वृद्ध्यपवादो गुणश्च। मर्जूः शुद्धि-र्मार्जकश्च॥

खडेर्डुड्वा ॥ ८४ ॥

खड खडि भेदे॥ अत ऊः। डुडागमश्च प्रत्ययस्य वा भवति। खडूर्बाहुतं-डाभरणं। खडूर्मृतशय्येति अयांते क्रमः॥ इदं सूत्रं न संमतं सर्वत्र॥

वहेर्धश्च ॥ ८५ ॥

वहतेऊप्रत्ययो धकारश्चांतादेशः। वधूर्जायास्नुषास्त्रीष्विति धांते ऽमरः। वधूः स्नुषानवोढास्त्रीभार्यास्पृक्कांगनासु च। धांत° २२.। इति विश्वप्रकाशः॥

कषेश्छश्च ॥ ८६ ॥

कष शिषेति दंडकः॥ अत ऊश्छश्चांतादेशः। कच्छूः पामा। मत्वर्थे कच्छ्वा ह्रस्वश्च। पा° ५. २. १०७. ३.। इति रप्रत्ययः। कच्छुरः॥

णित्कशिपद्यर्तेः ॥ ८७ ॥

कश गतौ। पद गतौ। ऋ गतौ॥ एभ्य ऊप्रत्ययो णिद्भवति। काशूः-र्विकलधातुः स्याच्छक्तावपि च दृश्यते॥ पादूश्चरणधारणी॥ आरूः पिंगलः॥

अणो डश्च ॥ ८८ ॥

अण दंडकः ॥ अत ऊः । स च णिद्वत् डश्चांतादेशः । आडूर्जलप्लवद्रव्यं ॥

नञि लंबेर्नलोपश्च ॥ ८९ ॥

लंबतेर्नञ्युपपदे ऊः स्यात्स च णिद्वत् नलोपश्च । न लम्बते जले ऽसावित्यलाबूः । तुंब्यलाबूरुभे समे इत्यमरः ॥

के श्र एरङ् चास्य ॥ ९० ॥

शॄ हिंसायां ॥ अतः कशब्द उपपदे ऊप्रत्ययः स्यादेरङ् चांतादेशः । कशेरूस्तृणकंदे स्त्री । बहुलवचनादुप्रत्ययो ऽपि भवतीति के चित् । कशेरु क्लीबलिंगं । कशेरुणा । कशेरुजतुवस्तूनि हित्वा तुरुविरामका इत्यमरः । पुंल्लिंगो ऽपि दृश्यते । किंकुर्वता वराहेण खायंते हि कशेरव इति चंद्रः । पृष्ठास्थ्नि तु कशेरुका । अम° २.६.२.२०. ।

त्रो दुक्च ॥ ९१ ॥

तरतेरूः स्यात् दुगागमश्च धातोः । तर्दूः स्यात् दारुहस्तकः ॥

दरिद्रातेर्यालोपश्च ॥ ९२ ॥

इश्च आ च या । दरिद्रातेरूः स्यादिकाराकारयोर्लोपश्च । दर्द्रूः कुष्ठभेदः स्यात् । मृगय्वादित्वात् दद्रुः । ह्रस्वांतस्यायं प्रयोगः । दद्रुणो दद्रुरोगी स्यादित्यमरः । इको ह्रस्वो ऽङ्यो गालवस्येति ह्रस्वत्वे ऽपि सिध्यति । भोजदेवशब्दानुशासने तु दरिद्राते र्यालोपश्चेति तिपा निर्देशात् रिश्च आ चेति संहितापाठे र्याशब्दलोपे दद्रूरित्यपि साधितं । तथा रश्च इश्च आश्चेत्यंत्यसदेशद्वितीयरेफलोपेन दर्द्रूरित्यपि साधितं । एवं च रूपचतुष्टयं वर्णविवेके स्पष्टं ॥

नृतिशृध्योः कूः ॥ ९३ ॥

नृती गात्रविक्षेपे । शृधु शब्दकुत्सायां ॥ आभ्यां कूप्रत्ययः स्यात् । नृतूर्नर्तकः ॥ शृधूरपानं ॥

ऋतेरम् च ॥ ९४ ॥

ऋत इति सौत्रो धातुः ॥ अतः कूः स्यादमागमश्च धातोः । रन्तूर्देवनदी प्रोक्ता ॥

अंदूदृन्फूजंबूकंबूकफेलूकर्कंधूदिधिषु ॥ १५ ॥

अंदूप्रभृतयः कूप्रत्ययांता निपात्यंते ॥ अदि बंधने। अंदूर्बंधनविशेषः। संज्ञायां कन्। पा° ५.३.८७.। केऽणः। पा° ७.४.१३.। इति ह्रस्वः। अंदुको हस्तिनिगड इत्यमरः। नृतिशृध्योः कूरित्यत्रादिग्रहणं न कृतं वैचित्र्यार्थं ॥ दृन्फ उत्क्लेशे। नलोपाभावः। दृन्फूः सर्पजातिः॥ जमु अदने। बुगागमः। जंबूर्वृक्षभेदः। चांद्रव्याकरणे जंबुरिति ह्रस्वांतो दर्शितः। उदाहृतश्च विक्रमादित्येन। तस्या जंब्वोः फलरसो नदीभूय प्रवर्तत इति। ततश्च पृषोदरादित्वात् बाहुलकाद्वा ह्रस्वः। तथा च भारविः। परिपाततजंबुफलोपभोगहृष्टाः। कि° १०.२२.॥ कमु कांतौ। बुगागमः। कंबूः परद्रव्यापहारी॥ ला दाने कफपूर्वः। कफेलूः श्लेष्मातकतरौ पुंसीति रूपमंजरी। एत्वमस्य पूर्वपदस्य निपात्यते॥ दृधातेः कर्कपूर्वस्य कर्कंधूर्बदरी॥ षो ऽंतकर्मणि दिधिपूर्वः षत्वं च। दिधि धैर्यमिंद्रियदौर्बल्यात्स्यति त्यजतीति दिधिषूः पुनर्भूः ॥

मृग्रोरुतिः ॥ १६ ॥

मृङ् प्राणत्यागे। गॄ निगरणे॥ आभ्यामुतिप्रत्ययः। इकारस्तकारस्येत्संज्ञापरित्राणार्थः। मरुत्पवनदेवयोः। तसौ मत्वर्थे। पा° १.४.१९.। मरुत्वान्। प्रज्ञादित्वादणि मारुतः। मरुतशब्दो ऽकारांतो ऽव्युत्पन्नो ऽस्ति। तथा च विक्रमादित्यकोशः। मरुतः स्पर्शनः प्राणः समीरो मारुतो मरुत्। कोपं वाति स दाक्षिणात्यमरुत इति कविराजः। पवनो ऽत्र्यल्पदृश्वान इति वर्णविवेकः॥ गरुत्पक्षः। मतुपि यवादित्वाद्वत्वं न भवति। गरुत्मान्॥

ग्रो मुट् ॥ १७ ॥

गिरतेरुतिः। तस्य मुडागमश्च। गर्मुत्सुवर्णं तृणभेदश्च। गर्मुत्सुवर्णलतयोः। तांत° १४३.। इति विश्वः॥

हृषेरुलच् ॥ १८ ॥

हृष तुष्टौ॥ अत उलच्। हर्षुलो मृगकामिनोः॥ बाहुलकाच्चटतेरुलच्। चटुलं शोभनं॥

हृसृरुहियुषिभ्य इतिः ॥ १९ ॥

हृञ् हरणे। सृ गतौ। रुह जन्मनि। युष इति सौत्रो धातुः॥ एभ्य इतिः स्यात्। हरित्ककुभि वर्णे च तृणवाजिविशेषयोः। हरिते ऽपि च

दूर्वायां हरिद्वर्णायुते ऽन्यवत्। तांत° १४२.। इति विश्वः॥ सरतीति सरित् नदी॥ रोहित् लता। अश्वस्य मृगस्य मृगी रोहिदित्युच्यते। तथा च महिम्नः स्तवे। गतं रोहिद्भूतां रिरमयिषुमृश्यस्य वपुषा। २२.। इति॥ योषित्स्त्री। अजादिपाठात् क्रुंचाशब्दवत् टापि योषितेति के चित्॥

ताडेर्णिलुक्च॥ १००॥

तड आघाते॥ अस्मादण्यंतादितिर्णेश्च लुक्। ल्लोपे हि प्रत्ययलक्षणेन वृद्धिर्न तु लुकि। तडिद्विद्युत्॥

शमेर्ढः॥ १०१॥

शमेर्ढप्रत्ययः स्यात्। बहुलवचनादित्संज्ञाभाव इडभावो ढकारस्यैयादेशाभावश्च। शंढो ना गोपतौ क्लीबे शंढः स्यात्तु महल्लकः॥ बोढा स्याद्वारिके मूते शंढः स्यात्पुंसि गोपतौ। आकृष्टांडे वर्षवरे तृतीयप्रकृतावपि। ढांत° ४.। इति मेदिनीकरः। शंढो वर्षवरे क्लीबे गोपतौ चाल्पपूरुषे। ढांत° ३.। इति विश्वः॥

कमेरठः॥ १०२॥

कमेरठः स्यात्। कमठः कच्छपः। कमठः कच्छपे भांडभेदे च कमठं मतं। ठांत° १०.। इति विश्वः॥ बाहुलकात् जृशमोरप्यठः। जरठशमठौ। जरठः कर्कशे पांडौ जरठं कठिने ऽन्यवत्। ठांत° ११.। इति विश्वः॥

रमेर्वृद्धिश्च॥ १०३॥

रमतेरठो वृद्धिश्च धातोः। रामठं हिंगुनि ख्यातं क्लीबे॥

शमेः खः॥ १०४॥

शमेः खप्रत्ययः स्यात्। बहुलवचनाद्यथा प्राप्तं न भवति। शंखो ऽर्धचादिः। निधिभेदे च पुंल्लिंगो जलजे तु नपुंसकमिति वृत्तिः। शंखो निध्यंतरे कंबुललाटास्थिनखेषु च। खांत° ५.। इति विश्वः॥

कणेष्ठः॥ १०५॥

कणातेष्ठप्रत्ययः स्यात्। कंठो गले ध्वनावपि। कंठो गले संनिधाने ध्वनौ मदनपादपे। ठांत° ४.। इति रुः। नीलकंठः शितिकंठः॥

कलस्तृपश्च ॥ १०६ ॥

तृप प्रीणने ॥ अतः कलप्रत्ययः । तृपला लता । चकारात्तृफतेरपि कलः । तृफला च फलत्रिके । तथा च त्रिफलाशब्दसमानार्थस्तृफलाशब्द इति द्विगोरित्यत्र रक्षितः । तृफला त्रिफला च । शब्दभेद° २८. । इति विश्वः ॥ बाहुलकात्कमु कान्तौ । मडि भूषायां । कुडि दाहे । पट गतौ । छो छेदने ॥ एभ्यो ऽपि भवति । कमलं पद्मं । कमलं सलिले ताम्रे जलजे चापि भेषजे । मृगप्रभेदे कमलः कमला श्रीवरस्त्रियोः । लांत° ५२. । इति स एव । अर्धर्चादिः । कमलो मृगः । कमला श्रीः पतिप्रिया च ॥ मंडलं चक्राकारं देशभेदश्च । मंडलं रक्षति मांडलिकः । रक्षति । पा° ४.४.३३. । इति ठक् । गौरादित्वात् मंडली । इवार्थे ऽङ्गुल्यादिभ्यष्ठक् । मांडलिकः ॥ स्यान्मंडलं द्वादशराजके च देशे च बिंबे च कदंबके च । कुष्ठप्रभेदे ऽप्युपसूर्यके ऽपि क्रतुप्रभेदे शुनि मंडलः स्यात् । लांत° ८०. । इति विश्वः ॥ कुंडलं वलये पाशे कुंडलं कर्णभूषणे । लांत° ७१. । इति विश्वः ॥ पटलो ऽक्षिरोगः । पललो यातुधाने स्यात्पटलं छदिषि वृन्दे । पिटके नेत्ररोगे च तिलके च परिच्छदे । लांत° ५१. । इति स एव ॥ छलं व्याजः । छलं तु स्खलिते व्याजे । लांत° १०. । इति सः ॥

शपेर्वश्च ॥ १०७ ॥

शप आक्रोशे ॥ अतः कलः स्याद्वश्चांतादेशः । शबलः कर्बुरो मतः । अन्यतो ङीष् । पा° ४.१.४०. । शबली । बहुव्रीहौ शबलगुः ॥

वृषादिभ्यश्चित् ॥ १०८ ॥

वृषु सेचने । कुश इति सौत्रो धातुर्वैदुष्यरोगयोर्वर्तते । पल गतौ । देवृ देवने ॥ एवमादिभ्यः कलश्चित् स्यात् । वृषलः शूद्रः । वर्षति क्षरति यत्र कुत्रापि । स्त्रियां वृषली । वृषं धर्मं लुनातीति वृषल इति का चिद्-मरटीका ॥ कुशलं क्षेममस्त्रियामित्यमरः । कुशलो निपुणः । कुशलवर्ज्जितः । विदग्धमुख° १.४४. । इति विदग्धः । कुशलवयोर्वर्ज्जित इत्यर्थः ॥ पललं मांसं । पललं तिलचूर्णे स्यात्पललं पंकमांसयोः । पललो यातुधाने स्यात् । लांत° ५१. । इति विश्वः ॥ देवलो धार्मिको देवांशोपजीवी च ॥ सृ गतौ । बाहुलका-द्गुणः । सरलः पूतिकाष्ठे स्यादुदारावक्रयोरपि । लांत° ५७. । इति विश्वः । सरला विरलायंते घनायंते कलिद्रुमाः । न शमी न च पुन्नागा अस्मिन् सं-सारकानने ॥ सरले साहसरागं परिहर रंभोरु मुंच संरंभं । ६.१०. । इति

भाषासमावेशो मालतीमाधवे। शषोः सः। वररुचि. २.४३.। इति प्राकृतसूत्रात् दंत्यसः॥ धावतर्बाहुलकात् ह्रस्वत्वं च। धावु् जवमृजोः। धवलः। धवलः सिंदुरे सिते। महोक्ष चाथ धवली सौरभेय्यामुदाहृता। लांत° ६३.। इति विश्वः। जातौ ङीप्। स्त्रियां गुणे त्वंतोदात्तत्वादन्यतो ङीषिति ङीप्। धवला नीता येन निशा शशांकधवलेति प्रयोगः॥ आकृतिगणत्वात्केवलकवलतरलानलजंभलपेशलमर्दलादयो ऽपि द्रष्टव्याः॥ कमेर्बुक् च। कंबलो नागराजे स्यात्सास्नावरणायोः क्रिमौ। कंबलश्चोत्तरासंगे कंबलं सलिले मतं। लांत° ७३.। इति विश्वः॥ मुश खंडने। मुशलः। मुशली गृहगोधिका। मुहुः स्वनो ऽस्येति पृषोदरादित्वात् दंत्यसो ऽपि। मुसलः। मुस खंडने। मुसलं मुशलं तु स्यादयोग्रे मुसली मता। तालमूल्यामाखुपर्णीगृहगोधिकयोरपि। लांत° ६५.। इति विश्वः। मुष स्तेय इत्यस्य मुषलो मूर्धन्यमध्यो ऽपीति वर्णदेशना। दंत्यसकारो ऽपि मुसल इत्यस्याग्रे। असितोमरकुंतमहापट्टिशगुरुपुरुचापामुसलं। १३.४७.। इति भट्टिभाषासमावेशात्। मुशलो मुषलो ऽपि च। शब्दभेद° २३.। इति विश्वः॥ कुश श्लेषणे। बाहुलकाद्गुणः। कोशलो देशविशेषः। वृद्धेत्कोशलेति। पा° ४.१.१७१.। ञ्यङ्। कोशलययासावि सुखेन रामः। १.१४.। इति भट्टिः। मलयकेकयकोशलशासिनां। ९.२२.। इति रघुः॥ लंगेर्वृद्धिश्च। लांगलं हलं। लांगली बलभद्रः॥ कदि आह्वाने। नलोपः। गौरादित्वान्ङीष्। कदली। एतस्याः फलं कदलं॥ कुटिकशिकौतिभ्यः प्रत्ययस्य मुट्॥ कुट्मलं। कुंडेरपि। कुड्मलो मुकुलो ऽस्त्रियामित्यमरः॥ गुणः। कोमलमिति मृदुले जले॥ कश्मलमिति कलुषं। कश गतिशातनयोर्भ्वादौ पठ्यत इति नाभ्यस्तस्याचीत्यादौ सूत्रे न्यासः॥ पिजि हिंसायां। न्यंक्वादित्वात्कुत्वं। पिंगलो वर्णभेदः॥ संब संबंधे। शंब च। चक्क व्यथने। एभ्यः कलः। संबलं। शंबलं। चक्कलमित्युपाध्यायसर्वस्वं॥

मृजेष्टिलोपश्च ॥ १०९ ॥

मृजूष् शुद्धौ॥ अतः कलो धातोष्टिलोपश्च। मलं वर्चस्कपापयोः। सह मलेन वर्तत इति समलः सपापः। निर्मलो निःपापः। मलं किट्टे पुरीषे च पापे च कृपणे मलः। लांत° ८.। इति विश्वः॥

चुपेरच्चोपधायाः ॥ ११० ॥

चुप मंदायां गतौ ॥ अतः कलः । उपधाया उकारस्याकारः । चपलं सविषं शीघ्रं चपला पिप्पली तडित् ॥

शकिशम्योर्नित् ॥ १११ ॥

शक्लृ शक्तौ । शमु उपशमे ॥ अतः कलो निद्भवति । शकलं खंडे वा पुंसि रोहितादीनां त्वगपि । तद्योगाच्छकली मत्स्यः ॥ शमलमशुचि ॥

छो गुक् ह्रस्वश्च ॥ ११२ ॥

छो छेदने ॥ अतः कलप्रत्ययो धातोर्गुगागमो ह्रस्वश्च । छगलश्छागः । प्रज्ञादित्वात् छागलः । भवेत्तु छगलश्छागे छगली छागमातरि । लांत° ६१. । इति विश्वः ॥

अमंतात् डः ॥ ११३ ॥

अमिति प्रत्याहारः । अमंताद्धातोर्डः स्यात् । बहुलवचनादित्संज्ञाभावः ॥ दमु उपशमे । दंडो लगुडकालयोः । दंडो ऽस्त्री लगुडे ऽपि चेत्यमरः ॥ रमु क्रीडायां । रंडा मृतधवा नारी रंडा मूषिकपर्णिका ॥ खनु अवदारणे । खंडो गुडप्रभेदः स्यात् खंडः शकलभेदयोः । अर्धे खंडं खंडः ॥ मन ज्ञाने । मंडो ऽस्त्री सर्वरसाग्र इति सर्वस्वं । मंडा धात्र्यामुदीरिता । डांत° १६. । इति विश्वः ॥ वन संभक्तौ । वंडश्छिन्नहस्तकः ॥ अम गत्यादिषु । अमंति संप्रयोगं यांत्यनेनेत्यंडः प्राण्यंगावयवः । अंडो मुष्ककडिंबयोः ॥ षणु दाने । बहुलवचनात्सत्वाभावः । षंडो काननगोपतौ । षंडः संघात इष्यते ॥ शडि रुजायां । अस्मात्तु घञि शांडशब्दस्तालव्यादिमानपि वर्तत इति देशना । अङ्गादिकदंबे शांडमस्त्रियामित्यमरः । पक्षशांड इति धातुप्रदीपः ॥ गम्लृ गतौ । गंडो व्याधिकपोलयोः । गंडः कपोले पिटके च । डांत° ८. । इति विश्वः ॥ चण दाने । चंडो दैत्यांतरे तीव्रे चंडो दासे यमस्य च । चंडी कात्यायनीहिंस्रकोपनस्त्रीषु संमता । डांत° १. । इति विश्वः ॥ पण व्यवहारे । पंडः क्लीबे । मतिः पंडा । पंडा बुद्धिर्विद्या प्राप्नोति भागुरिः । तारकादित्वादितच् । पंडितः ॥ फण गतौ । फंडः । प्रज्ञादित्वादण् । फांडमुदरं । अत्र अमि अकारेण प्रत्याहारग्रहणसामर्थ्यात् अकारांतः सौत्रो धातुर्गृह्यत इति अ म ड ण नम् इत्यत्र सूत्रे रचितः ॥

क्वादिभ्यः कित् ॥ ११४ ॥

कवर्गादिभ्यो धातुभ्यो डः किद्भवति ॥ कुण शब्दोपकरणयोः । कुंडः स्यात्पतिवत्नीनां जारसंजनितः सुतः । देवतान्यजलाधारः कुंडं कुंडमुखा स्मृतेति शाश्वतः । उपचारान्नाम्नकुंडं । स्वार्थे कनि स्वार्थिकाः प्रकृतितो लिंगवचनान्यतिवर्तंते ऽपीति कुंडिका । अमृते जारजः कुंडो मृते भर्तरि गोलकः ॥ गुङ् अव्यक्ते शब्दे । गुडो गोलेक्षुपाकयोरित्यमरः । गुडा स्नुही । गुडाप्रायाः केशा अस्येति गुडाकेशः शिवः ॥ घुण भ्रमणे । घुंडो भ्रमरः ॥ कमु कांतौ । दीर्घत्वं । कांडं वावसरे वाणे वर्गे स्कंधे च शाखिनां । प्रमाणविशेषे ऽपि कांडं । यथा त्रिकांडं । कांडं नाले तरुस्कंधे वाणे ऽवसरनीरयोः । डांत° १८. । इति विश्वः । निदित्यनुवृत्तेः कुंडादिशब्दा आद्युदात्ता इति क्षप इत्यत्र सूत्रे न्यासः ॥

स्थाचतिमृजेरालज्वालजालीयचः ॥ ११५ ॥

ष्ठा गतिनिवृत्तौ । चते याचने । मृजूष् शुद्धौ ॥ एभ्यो यथाक्रममालच् वालञ् आलीयच् इत्येते प्रत्ययाः स्युः । स्थालं भाजनभेदे स्यादुखा स्थाली प्रकीर्तिता । गौरादित्वात् ङीष् । लचि सिद्ध आलङ्विधानं चिंत्यं । घुमास्थेत्यस्याक्ङित्यपि कृ चित्प्रवृत्तौ ज्ञापकमिति केचित् चित्त्वं बाधित्वा पक्ष आद्युदात्तार्थमित्यपरे ॥ चात्वालो यज्ञोपकरणं । चात्वालो यज्ञकुंड स्यात् दर्भे चोत्ताल उत्कटे । लांत° ११७. । इति विश्वः ॥ मार्जालीयो विडालः स्यात् ॥

पतिचंडिभ्यामालञ् ॥ ११६ ॥

पत्लृ गतौ । चडि कोपे ॥ पतंत्यस्मिन्नधर्मेण । पातालमधोभुवनं ॥ चंडालः पापकर्मा । चंडमलं भृणास्थेत्यपि चंडालः । प्रज्ञादित्वादणि चांडाल इत्यपि ॥

तमिविशिविडिमृणिकुलिकपिपलिपंचिभ्यः कालन् ॥ ११७ ॥

तमु कांक्षायां । विश प्रवेशने । विड आक्रोशे । मृण हिंसायां । कुल संस्त्याने । कपि चलने । निर्देशान्नलोपः । पल गतौ । पचि विस्तारवचने ॥ एभ्यो ऽष्टधातुभ्यः कालन् स्यात् । तमालो वृक्षभेदः स्यात् ॥ विशालो महान् । त्रिलिंगः । विशालं बृहदाख्यातं । विशालोज्जयिनी पुरी । लांत° ११८. । इति विश्वः । विशालोज्जयिनी प्रोक्ता पुरी चान्या च मानिनीति कोशांतरं ।

तमिच्छति नृपं बुद्ध्या यः स्तोतुमविशालया। स वाञ्छत्यातपत्राणां करिणामविशालयेति कीचकवधः॥ विडालो मार्जारः। स्त्रियां विडाली॥ मृणालं पद्ममूलं। पुष्करादित्वान्मृणालिनी। अल्पाख्यायां मृणाली॥ कुलालः कुंभकारः स्यात्॥ कपालं नरशिरः। पुंनपुंसकं। कपालं नृशिरोस्थ्नि स्यात् घटादेः शकले वृते। लांत° १०३.। इति विश्वः॥ पलालो ऽस्त्री स निष्फल इत्यमरः। पलालं भराय ते॥ पंचालो जनदेशयोः। पृषोदरादित्वात् दीर्घत्वे पांचाल इत्यपि॥ बहुलवचनात् श्यतेरपि कालन्। शाला। विभाषा सेनासुरेति वा क्लीबं। पा° २.४.२५.। गोशालं। गोशाला। चतुःशालं। चतुःशाला। शल चलने। घञंता तत्पुरुषे शालायामिति निपातनात् स्त्रीत्वे शालेति न्यासः॥

पतेरंगच् पक्षिणि ॥ ११८ ॥

पत्ऌ गतौ॥ अस्मात्पक्षिण्यभिधेये ऽंगच्। पतंगः पक्षी। कथं पतंगः सूर्यः। खगत्वसामान्योपचारात्। पतंगः शलभे सूर्ये पतंगः पक्षिणि स्मृत इति कोशांतरं। पतंगः शलभे शालिप्रभेदे विहगे रवौ। गांत° ४१.। इति विश्वः॥

तरत्यादिभ्यश्च ॥ ११९ ॥

तरत्यादिभ्यो ऽप्यंगच्। तरंग ऊर्मिः। तरंगस्तुरगादीनामुत्फाले वस्त्रभंगयोरिति सः॥ लुनातेर्लवंगं देवकुसुमे॥ आकृतिगणो ऽयं। एवमन्ये ऽपि द्रष्टव्याः॥

विडादिभ्यः कित् ॥ १२० ॥

विड आक्रोशे। मृद क्षोदे। कॄ विक्षेपे॥ एभ्यो ऽंगच् किद्भवति। विडंग ओषधिविशेषः॥ मृदंगो मर्दलः। वाद्यविशेषः॥ बाहुलकादुत्वं रपरत्वं च। कुरंगो मृगः। स्त्रियां कुरंगी॥

सृवृञोर्वृद्धिश्च ॥ १२१ ॥

सृ गतौ। वृञ् वरणे॥ आभ्यामंगच् धातोर्वृद्धिश्च। चातके हरिणे पुंसि सारंगः शबले त्रिषु। अम° ३.४.३.२४.। नदति जलदैर्निदाघे सारंगो ऽपास्ते बिभ्रति केतकमवनैः सारं गोपास्ते। संप्रत्युद्यमकालो न वाहिनीपानां त्वन्मुखसुरभीणां श्रीर्नवा हि नीपानां। ५०.। इति वृंदावनयमकं। सारंग-

संकुलमहासालं। १३.३८.। इति भट्टिभाषासमावेशः। अन्ये तु शॄ हिंसायामित्यस्मादंगचि वृद्धौ च शारंग इति तालव्यमाहुः। प्रमाणं तु चिंत्यं। सारंगश्चातके भृंगे कुरंगे च मतंगजे। पक्षिभेदे च सारंगः सारंगः शबले ऽन्यवत्। गांत° ४१.। इति विश्वः॥ वारंगः खड्गादिमुष्टिः॥ बाहुलकात् न् नये। नारंगो नागरंगक इति कोशांतरं॥

गन् गम्यद्योः ॥ १२२ ॥

गमॢ गतौ। अद भक्षणे॥ आभ्यां गन्। गंगा विष्णुपदी ख्याता। अपत्ये शिवादित्वादिकादिशुभ्रादिपाठात् अणि फिञि ढकि च गांगो गांगायनिर्गांगेयः॥ अद्गः पुरोडाशः॥ अम गत्यादिषु। बाहुलकादतो ऽपि भवति। अंगं गात्र उपाये च प्रतीके चाप्रधानके। अंगो देशविशेषः स्यादंग संबोधने ऽव्ययं। विश्व° गांत° १४.॥

छापूखडिभ्यः कित् ॥ १२३ ॥

छो छेदने। पूञ् पवने। खड भेदे॥ एभ्यो गन् किद्भवति॥ छायते यज्ञार्थिभिरिति छागश्छागलः॥ पूयते मुखमनेनेति पूगो गुवाकः। पूगः क्रमुकवृंदयोरित्यमरः॥ खड्गो गंडकशृंगे स्यान्निस्त्रिंशे गंडके ऽपि चेति शब्दतरंगिणी। खड्गो गंडकशृंगासिबुद्धभेदेषु गंडके। विश्व° गांत° २४.। इति कोशांतरं॥ बाहुलकात् विट अनादरे। अतो ऽपि गन् सत्वाभावश्च। स्मृतः विड्गस्तरलमना इति चंद्रः। विड्गैरगायत ससंभ्रममेवमेका। ५.३४.। इति माघः॥

भृञः कित् नुट् च ॥ १२४ ॥

भृञो गन् किद्भवति। नुडागमो ऽपि तस्य। भृङ्गः षिड्गालिधूम्याटाः। भृङ्गो धूम्याटषिड्गयोः। मधुव्रते च भृङ्गं तु केसराजगुडत्वचोः। गांत° १८.। इति विश्वः। किदित्यनुवृत्तेः किदिति विस्पष्टार्थं॥

शृणातेर्ह्रस्वश्च ॥ १२५ ॥

शॄ हिंसायां॥ अतो गन्। धातोर्ह्रस्वत्वं कित्त्वं नुट् च प्रत्ययस्य। शृंगं विषाणमाख्यातं शैलाग्रे जलयंत्रके। मीनौषधिसुवर्णानां भेदे शृंगी प्रयुज्यत इत्युत्पलिनी। गौरादित्वात् ङीष्। शृंगं क्रीडांबुयंत्रके। विषाणोत्कर्षयोश्चाथ शृंग

स्यात्कूर्चशीर्षके। शृंगी विषापयामृषभे स्वर्णमीनप्रभेदयोः। विश्व° शांत° २१। इति सः। मत्वर्थे ऽपि शृंगमस्यास्तीति शृंगारकः। शृंगवृंदाभ्यामारकन्। पा° ५.२.१२२.४.। विकारार्थे ऽपि शार्ङ्गः कार्मुकमात्रे ऽपि विष्णोरपि शरासने। अथ सुललितयोषिद्भ्रूलताचारुशृंगं। कु° सं° २.६४.। इति च प्रांशुत्वादायतत्वादुपचारात् ॥

गण् शकुनौ ॥ १२६ ॥

शृणातेरेव शकुनौ वाच्ये गण्प्रत्ययः। पूर्ववन्नुट् च। शार्ङ्गः पक्षी॥ केचित्पुनरगपिपाठ्यकारपूर्वो गकार इत्यादावकारो विधीयते। तेन शारंग इत्यपि साधुरिति सर्वस्वं॥

मुदिग्रोर्गग्गौ ॥ १२७ ॥

मुद हर्षे। गॄ निगरणे॥ आभ्यां यथासंख्यं गक् ग इत्येतौ स्यातां। मुद्गः सस्यभेदः। मुद्गान् लातीति मुद्गलो मुनिः। यस्य मौद्गल्य आत्मजः॥ गर्गो मुनिः। गार्ग्यो यस्यात्मसंभवः॥

अण्डन् कृसृभृवृञः ॥ १२८ ॥

डुकृञ् करणे। सृ गतौ। भृञ् भरणे। वृञ् वरणे॥ एभ्यो ऽण्डन्। करंडः करंडिका। पुष्पभांडभेदः करंडो॥ सरंडः पक्षी॥ भरंडः स्वामी॥ वरंडो मुखरोगः। वरंडो ऽप्यंतरावेदी संदोहमुखरोगयोः। शांत° २७.। इति विश्वः॥ प्राक् प्रत्ययनिर्देशादन्यतो ऽपि भवति। तेन तरतेस्तरंडो जलतरणं। तरंडो वलिशीसूत्रबद्धवस्तुनि भेलके। शांत° २७.। इति सः॥ वनतेस्तकारांतादेशः। वतंड इति का चिद्वृत्तिः॥ तथा क्षमु अदने। अत एत्वं। क्षेमंडो मातापितृशून्यः॥ तथा प्रीतेरपि। प्रायंडो विषयो देश इति तु वृत्तौ। ऐषुकार्यादित्वाद्भक्तल्प्रत्यये प्रायंडभक्तः॥

शृदृभसो ऽदिः ॥ १२९ ॥

शॄ हिंसायां। दॄ विदारणे। भस भर्त्सनदीप्त्योः॥ एभ्यो ऽदिः स्यात्। शरत् संवत्सर ऋतौ॥ दरत् हृदयकूलयोः॥ भसत् जघनं। भसत् प्रभास्वरे मासे तरत्कारंडवे प्लवे। शांत° ३४.। इति विश्वः॥ पर्व सेवने। बहुलवचनादतो ऽपि भवति। समज्या पर्षत्परिषदिति चंद्रः। पर्षद्बलान्महाब्रह्मैः। ४.१२.। इति भट्टिः। परिपूर्वात्सदेः सत्स्वित्यादिना। पा° ३.२.६१.।

क्विप्। सदिरप्रतेः। पा° ८. ३. ६६.। इति षत्वं। रजःकृषीति। पा° ५. २. १२१.। वलच्। यः संप्रति प्राक् परिषद्बलानामिति कोशः ॥

दृणातेः षुक् ह्रस्वश्च ॥ १३० ॥

दृ विदारणे॥ अतो ऽदिः स्यात् ह्रस्वत्वं च धातोः षुगागमश्च। दृषत् शिला। राजदंतादित्वात् दृषदुपलं। प्रोषे। पा° ४. २. १२.। इति लक्षणां बाधिकारश्चेति दृषदि पिष्टा इत्यस्मिन्नर्थे दार्षदाः सक्तव इति का चिद्वृत्तिः ॥

त्यजितनियजिभ्यो डित् ॥ १३१ ॥

त्यज हानौ। तनु विस्तारे। यज देवपूजादौ॥ एभ्यो ऽदिर्डिद्भवति। टिलोपः। त्यद्। त्यदाद्यत्वं। तदोः सः सावनंत्ययोः। पा° ७. २. १०६.। इति सत्वं। स्यः। त्यौ। त्ये। अहं वा न भविष्यामि स्य वा कंबलविक्रयीति। एवं तयदौ। सर्वनामसंज्ञका एव ॥

एतेस्तुट् ॥ १३२ ॥

इण् गतौ॥ अतो ऽदिः स्यात्तस्य तुडागमः। एतद्। सर्वनामैव ॥

सर्तेरटिः ॥ १३३ ॥

सृ गतौ॥ अतो ऽटिः स्यात्। इकार उच्चारणार्थः। सरट् स्याद्वात-मेघयोः। सरडिति धातुपारायणे दृश्यते ॥

लंघेर्नलोपश्च ॥ १३४ ॥

लघि शोषणे॥ अस्मादटिर्नलोपश्च धातोः। लघट् वायुः। लघटिरिति पारायणे ॥

पारेरजिः ॥ १३५ ॥

पार तीर कर्मसमाप्तौ॥ अतश्चुरादेरजिः। णिलोपः। पारक् सुवर्णं ॥

प्रथः कित्संप्रसारणं च ॥ १३६ ॥

प्रथ प्रख्याने॥ अस्मादजिः किद्भवति संप्रसारणं च धातोः। गत्वादि-कार्यं। पृथक् नानार्थः। स्वरादित्वादव्ययत्वं ॥

भियः षुक् ह्रस्वश्च ॥ १३७ ॥

बिभेतेरुजिः किद्भवति षुगागमश्च ह्रस्वत्वं च ॥ भिषग्वैद्यः। अपत्ये गर्गादित्वाद्यञि भैषज्यः। भिषजामिदमित्यपि सुमंगलभेषजाच्च। पा° ४. १. ३०.। इति निपातनाद्रूपो भेषजं। स्वार्थे ऽनंतावसथेतिहभेषजाञ्ञ्यः। पा° ५. ४. २३.। इति भैषज्यं भेषजमेव ॥

युष्यसिभ्यां मदिक् ॥ १३८ ॥

युष इति सौत्रो धातुः। असु क्षेपणे ॥ आभ्यां मदिक्। युष्मदस्मदसौ। त्वाहौ सौ। शेषे लोपः। पा° ७. २. ९०. ९४.। त्वं। अहं ॥

अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन् ॥ १३९ ॥

ऋ गतौ। ष्टुञ् स्तुतौ। षुञ् अभिषवे। हु दाने। सृ गतौ। धृञ् धारणे। क्षि क्षये। टुक्षु शब्दे। भा दीप्तौ। या प्रापणे। वा गतिगंधनयोः। पद् गतौ। यक्ष पूजायामाकुस्मीयः। णीञ् प्रापणे ॥ एभ्यश्चतुर्दशधातुभ्यो मन्। अर्मश्चक्षूरोगः ॥ स्तोमः संघातः। अग्नेः स्तुत्स्तोमसोमाः। पा° ८. ३. ८२.। इति षत्वं। अग्निष्टोमः। ज्योतिरायुषः स्तोमो ज्योतिष्टोमः। आयुष्टोमः ॥ सोमः कर्पूरचंद्रयोः। सोम इव सौम्यः। शाखादित्वाद्यः। पृषोदरादित्वादौत्वं। प्रीतास्मि ते सौम्य चिराय जीव। १४. ५९.। इति रघुः ॥ होमो यागविशेषः ॥ सर्मो गमनं ॥ धर्मः स्यादस्त्रियां पुण्ये। धर्मं चरतीति ठक्। धार्मिकः। नञ्समासे ऽधर्माच्चेति ठग्वक्तव्यः। पा° ४. ४. ४१. १.। आधर्मिकः। स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः। धर्मः पुण्ये यमे न्याये स्वभावाचारयोः क्रतौ। मांत° १८.। इति विश्वः ॥ क्षेमं कुशलमस्त्रियामित्यमरः। क्षेमप्रियमद्रे ऽण् च। पा° ३. २. ४४.। क्षेमंकरः। गौरादित्वात् क्षेमंकरी। पचादिषु करट्-शब्दपाठात् योगक्षेमकरी लोकस्येत्यन्ये ॥ क्षौमं वस्त्रप्रभेदः स्यात्। क्षौमं पट्टे दुकूले स्यादतसीकुसुमे ऽपि च। मांत° ६.। इति विश्वः। त्यजतो मंगलक्षौमे वीरे च प्रतिगृह्णत इति रघुः। शणाभवे क्षौमश्च। अतसी स्यादुमा क्षुमा। अम° २. ९. २०.। इति क्षुमाशब्दाद्विकारे ऽपिपाति ॥ भाम आदित्यः। भामः क्रोधे रवौ दीप्तौ। मांत° १६.। इति विश्वः ॥ यामः प्रहरः। द्वौ यामप्रहरौ समौ। अम° १. १. ३. ६. ॥ वामः शोभनदुष्टयोः। शौंडादित्वादक्षवामः ॥ पद्मं सरोरुहं। अर्धर्चादिरयं। वा पुंसि पद्मं नलिनमित्यमरः। पद्मः स्यान्निधिशंखयोः। शंखपद्मौ निधी चित्रे दृष्ट्वा दुष्टैर्विमुच्यत इति पुराणं। पुष्करादिभ्यो देशे।

क्विप्। सदिरप्रतेः। पा° ८. ३. ६६.। इति षत्वं। रजःकृषीति। पा° ५. २. ११२.। वलच्। यः संप्रति प्राक् परिषद्वलानामिति कोशः ॥

दृणातेः षुक् ह्रस्वश्च ॥ १३० ॥

दॄ विदारणे॥ अतो ऽदिः स्यात् ह्रस्वत्वं च धातोः षुगागमश्च। दृषत् शिला। राजदंतादित्वात् दृषदुपलं। शेषे। पा° ४. २. ९२.। इति लक्षणा वाधिकारश्चेति दृषदि पिष्टा इत्यस्मिन्नर्थे दार्षदाः सक्तव इति का चिद्वृत्तिः ॥

त्यजितनियजिभ्यो डित् ॥ १३१ ॥

त्यज हानौ। तनु विस्तारे। यज देवपूजादौ॥ एभ्यो ऽदिर्डिद्भवति। टिलोपः। त्यद्। त्यदाद्यत्वं। तदोः सः सावनंत्ययोः। पा° ७. २. १०६.। इति सत्वं। स्यः। त्यौ। त्ये। अहं वा न भविष्यामि स्य वा कंबलविक्रयीति। एवं तयदौ। सर्वनामसंज्ञका एव ॥

एतेस्तुट् ॥ १३२ ॥

इण् गतौ॥ अतो ऽदिः स्यात्तस्य तुडागमः। एतद्। सर्वनामैव ॥

सर्तेरटिः ॥ १३३ ॥

सृ गतौ॥ अतो ऽटिः स्यात्। इकार उच्चारणार्थः। सरट् स्याद्वात-मेघयोः। सरडिति धातुपारायणे दृश्यते ॥

लंघेर्नलोपश्च ॥ १३४ ॥

लघि शोषणे॥ अस्मादटिर्नलोपश्च धातोः। लघट् वायुः। लघटिरिति पारायणे ॥

पारेरजिः ॥ १३५ ॥

पार तीर कर्मसमाप्तौ॥ अतश्चुरादेरजिः। णिलोपः। पारज् सुवर्णं ॥

प्रथः कित्संप्रसारणं च ॥ १३६ ॥

प्रथ प्रख्याने॥ अस्मादजिः किद्भवति संप्रसारणं च धातोः। गत्वादि-कार्यं। पृथक् नानार्थः। स्वरादित्वादव्ययत्वं ॥

भियः षुक् ह्रस्वश्च ॥१३७॥

बिभेतेरजिः किद्वति षुगागमश्च ह्रस्वत्वं च॥ भिषग्वैद्यः। अपत्ये गर्गादित्वाद्यञि भैषज्यः। भिषजामिदमित्यणि सुमंगलभेषजाच्च। पा° ४. १. ३०.। इति निपातनाड्ङीषो भेषजं। स्वार्थे ऽनंतावसथेतिहभेषजाञ्ञ्यः। पा° ५. ४. २३.। इति भैषज्यं भेषजमेव ॥

युष्यसिभ्यां मदिक् ॥१३८॥

युष इति सौत्रो धातुः। असु क्षेपणे॥ आभ्यां मदिक्। युष्मदस्मदसौ। त्वाहौ सौ। शेषे लोपः। पा° ७. २. ९०. ९४.। त्वं। अहं॥

अर्तिस्तुसुहुसृधृक्षिक्षुभायावापदियक्षिनीभ्यो मन्॥१३९॥

ऋ गतौ। ष्टुञ् स्तुतौ। षुञ् अभिषवे। हु दाने। सृ गतौ। धृञ् धारणे। क्षि क्षये। टुक्षु शब्दे। भा दीप्तौ। या प्रापणे। वा गतिगंधनयोः। पद गतौ। यक्ष पूजायामाकुस्मीयः। णीञ् प्रापणे॥ एभ्यश्चतुर्दशधातुभ्यो मन्। अर्मश्चक्षूरोगः॥ स्तोमः संघातः। अग्नेः स्तुत्स्तोमसोमाः। पा° ८. ३. ८२.। इति षत्वं। अग्निष्टोमः। ज्योतिरायुषः स्तोमो ज्योतिष्टोमः। आयुष्टोमः॥ सोमः कर्पूरचंद्रयोः। सोम इव सौम्यः। शाखादित्वाद्यः। पृषोदरादित्वादौत्वं। प्रीतास्मि ते सौम्य चिराय जीव। १४. ५९.। इति रघुः॥ होमो यागविशेषः॥ सर्मो गमनं॥ धर्मः स्यादस्त्रियां पुण्ये। धर्मं चरतीति ठक्। धार्मिकः। नञ्समासे ऽधर्माच्चेति ठक्वक्तव्यः। पा° ४. ४. ४१. १.। आधर्मिकः। स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः। धर्मः पुण्ये यमे न्याये स्वभावाचारयोः क्रतौ। मांत° १८.। इति विश्वः॥ क्षेमं कुशलमस्त्रियामित्यमरः। क्षेमप्रियमद्रे ऽण् च। पा° ३. २. ४४.। क्षेमंकरः। गौरादित्वात् क्षेमंकरी। पचादिषु करटशब्दपाठात् योगक्षेमकरी लोकस्येत्यन्ये॥ क्षौमं वस्त्रप्रभेदः स्यात्। क्षौमं पट्टे दुकूले स्यादतसीकुसुमे ऽपि च। मांत° ६.। इति विश्वः। त्यजतो मंगलक्षौमे चीरे च प्रतिगृह्णत इति रघुः। शणभवे क्षौमश्च। अतसी स्यादुमा क्षुमा। अम° २. ९. २०.। इति क्षुमाशब्दाद्विकारे ऽण्यपि॥ भाम आदित्यः। भामः क्रोधे रवौ दीप्तौ। मांत° १६.। इति विश्वः॥ यामः प्रहरः। द्वौ यामप्रहरौ समौ। अम° १. १. ३. ६.॥ वामः शोभनदुष्टयोः। शौंडादित्वादक्षवामः॥ पद्मं सरोरुहं। अर्धर्चादिरयं। वा पुंसि पद्मं नलिनमित्यमरः। पद्मः स्यान्निधिशंखयोः। शंखपद्मौ निधी चित्रे दृष्ट्वा दुष्टैर्विमुच्यत इति पुराणं। पुष्करादिभ्यो देशे।

पा° ५. २. १३५.। इतीनिः। पक्ष्मिनी। अर्शआदित्वादच्। पद्मा हरिवधूः स्मृता ॥ यक्ष्मो रोगराजः। राजयक्ष्मेव रोगाणां। २. ९६.। इति माघः। मनिनंतो ऽप्यस्ति। यक्ष्मणापि परिहानिराययौ कामयानसमवस्थया तुलां। १९.५०.। इति रघुः॥ नेमः प्राकारमूलं। अर्धवाची तु सर्वनामसंज्ञक इति ॥

जहातेः सन्वदालोपश्च ॥ १४० ॥

जहातेर्मन् सन्वद्भवति धातोराकारलोपश्च। जिह्मः कुटिलमंदयोः। जिह्मं तगरपादपे। मांत° १९.। इति विश्वः॥

अवतेष्टिलोपश्च ॥ १४१ ॥

अव रक्ष पालने॥ ततो मन् टिलोपश्च। स च सामर्थ्यात्प्रत्ययस्यैव न प्रकृतेः। अन्यथा हि डिदित्येवोच्येत। ज्वरत्वरेत्यादिना। पा° ६.४.२०.। वकारस्योपधायाश्चोठ्। दयोरूठोर्दीर्घत्वे कृते गुणः। ओमित्यनुमतौ प्रोक्तं प्रणवे चाप्युपक्रमे। विश्व° अव्य° ४८.। मंत्रांगत्वाच्छंदसो ऽत्रानुनासिकः। ओमित्युक्तावतो ऽथ शार्ङ्गिणः। १.७५.। इति माघः। ओंकारप्रणवौ समावित्यमरः। चादित्वादव्ययत्वं ॥

ग्रसेरात् ॥ १४२ ॥

ग्रसु अदने॥ अतो मन्। धातोराकारांतादेशः। ग्रामः संवसथः प्रोक्तः संपूर्वः संयुगे स्मृतः। गहादित्वाच्छः। एकग्रामीयः। ग्रामायणयोः। पा° ४.२.९४.। ग्राम्यः। ग्रामीणः। ग्रामः स्वरे संवसथे वृंदे शब्दादिपूर्वकः। मांत° १४.। इति विश्वः ॥

अविसिविसिशुषिभ्यः कित् ॥ १४३ ॥

अव रक्षणे। षिवु तंतुसंताने। षिञ् बंधने। शुष शोषणे॥ एभ्यश्चतुर्भ्यो मन् भवति स च कित्। पूर्ववदूठादिकार्यं। ऊमं नगरं। टापि बाहुलकात् ह्रस्वत्व उमा दुर्गातसी स्मृता। उ मेति मात्रा तपसो निषिद्धा पश्चादुमाख्यां सुमुखी जगाम। कु° सं° १.२६.। इत्युपायांतरं। उमातसीहैमवतीहरिद्राकांतिकीर्तिषु। मांत° ३२.। इति विश्वः॥ स्यूमो रश्मिः॥ सिमः सर्वनाम सर्वपर्यायः। सिमस्मै। सिमस्मात्॥ शुष्ममग्निसमीरयोः ॥

इषियुधीन्धिदसिश्याधूसूभ्यो मक् ॥ १४४ ॥

इष गतिहिंसादानेषु। युध संप्रहारे। ञिइन्धी दीप्तौ। दसु च। श्यैङ् गतौ। धूञ् कंपने। षूङ् प्राणिगर्भविमोचने॥ एभ्यः सप्तभ्यो मक्। इष्मः कामवसंतयोः। के चिदीष गताविति पठंति। तेषां दीर्घादिरीष्मः॥ युध्मः शरः॥ इध्मः समित्॥ दस्मो यजमानः॥ श्यामो हरितकृष्णयोरित्यमरः। श्यामः स्यान्मेचके वृद्धदारके हरिते घने। वटद्रुमे प्रयागस्य श्यामः श्यामा तु वागुजी॥ अप्रसूतांगनायां च तथा श्यामलतौषधौ। त्रिवृत्कासारिकागुंद्रानिशाकृष्णाप्रियंगुषु॥ श्यामा नील्यां पिके श्यामं मरिचे लवणांतरे। मांत° १०.। इति विश्वः॥ धूमः स्यादग्निसंभवः। पाशादित्वात् धूम्या धूमसंहतिः॥ सूमो ऽतरिक्षं॥ ईर गतौ। बाहुलकादतो ऽपि मक्। ईर्मं व्रणं। व्रणो ऽस्त्रियामीर्ममरुः क्लीब इत्यमरः॥ क्षुमु शब्दे। क्षुमातसी। तस्या विकारः क्षौमं वस्त्रभेद इत्युक्तं॥ जन जनने। जन्म उत्पत्तिः। जन्मस्तु पुंसि संभव इति पुंसि प्रयोगः। मनिनंतो ऽप्यस्ति। रुह जन्मनीति धातुपाठात्। जनुर्जननजन्मानि। अम° १.१.४.८.। इत्युभयथाप्युपपद्यते ॥

युजिरुचितिजां कुश्च ॥ १४५ ॥

युजिर् योगे। रुचि दीप्तौ। तिज निशाने॥ एभ्यो मक् कवर्गश्चांतादेशः। युग्मं युगलं॥ रुक्मो वर्णभेदः। तद्योगाद्गुणवचनेभ्यः। पा° ५. २. ९४.१.। इति मतुप्लोपे रुक्मं सुवर्णं। रुक्मो वर्णो ऽस्या अस्तीति रुक्मिणी। रुक्मं तु कांचने लोहे। मांत° १७.। इति विश्वः। त्वया विप्रकृतश्चैद्यो रुक्मिणीं हरता हरे। २.३८.। इति माघः॥ तिग्मं तीक्ष्णं। त्रिलिंगं ॥

हन्तेर्हि च ॥ १४६ ॥

हन हिंसागत्योः॥ अतो मक् धातोर्हिरादेशश्च। हिमं चंदनमाख्यातं हिमं शीततुषारयोः। मांत° ४.। इति विश्वः। हिमारण्ययोर्महत्त्वे। पा° ४. १.४९.१.। इति ङीषानुकौ। हिमानी हिमसंहतिः ॥

भियः षुग्वा ॥ १४७ ॥

बिभेतेर्मक् धातोर्वा षुगागमश्च। बिभेत्यस्मादिति भीमस्त्रिलिंगः। भीमो भयानके ख्यातो भीमो पांडवशंकरे॥ भीष्मो भयानके क्षत्रे। भीष्मं भयानके

त्रिषु। भीष्मः कुरूणां भयशोकहर्तेति। भीष्मस्तु भीषणे रुद्रे गांगेये च निशाचरे। मांत° २०.। इति विश्वः॥

घर्मः ॥ १४८ ॥

घर्म इति निपात्यते॥ घृ क्षरणदीप्त्योः। अतो मग्गुणौ निपात्येते। घर्मः स्वेदांभसि ग्रीष्मे। घर्मः स्यादातपे ग्रीष्म उष्णास्वेदांभसोः। मांत° १९.। इति सः॥

ग्रीष्मः ॥ १४९ ॥

ग्रीष्म इति निपात्यते॥ ग्रसु अदने। अतो मक् ग्रीभावश्च धातोः पुगागमश्च। ग्रसते रसानिति ग्रीष्मः कालभेदः॥

प्रथेः षिवन् संप्रसारणं च ॥ १५० ॥

प्रथ प्रख्याने॥ अतः षिवन् संप्रसारणं च धातोः। षकारो ङीषर्थः। पृथिवी मही। षित्वादेव ङीषि सिद्धे गौरादावपि पृथिवशब्दपाठो ऽनुबंधकानित्यत्वज्ञापनार्थः। तेन दंष्ट्रेति सिद्धं भवति। उत्सादित्वात्पार्थिवः। षवन्नित्येके। पृथवी पृथिवी पृथ्वी धरा सर्वसहा रसेति शब्दार्णवः॥

अशूप्रुषिलटिकणिखटिविशिभ्यः क्वन् ॥ १५१ ॥

अशू व्याप्तौ। प्रुष स्नेहनादौ। लट बाल्ये च। कण निमीलने। खट कांक्षायां। विश प्रवेशने॥ एभ्यः क्वन्। अश्वो घोटकः। अश्वः पुंभेदवाजिनोः। वांत° १८.। इति विश्वः। अश्वशब्दो वह्नावपि दृश्यत इत्युणादयो बहुलमित्यत्रानुन्यासः। अजादित्वात्स्त्रियामश्वा। अश्वादिभ्यः फञ्। पा° ४.१.११०.। आश्वायनः॥ प्रुष्वः स्यादृतुसूर्ययोः। प्रुष्वा जलकणिकेति रत्नमतिः। अटाट्टाशीकेति क्यङ्। पा° ३.१. १७.१.। प्रुष्वायते॥ लट्वा पक्षिभेदः। लट्वा स्यात्तुलिका शिलीति हारावली। लट्वा तु तूलिका ख्याता लट्वा घृतेऽपि दृश्यत इति व्याडिरभसौ। लट्वा करंजभेदे स्यात् फले वाद्ये खगांतरे। वांत° २५.। इति विश्वः॥ कणवं पापे मुनौ विदुः। बाहुलवचनादित्वं। किणवमिति सर्वस्वं। किणवं पापे सुरावीजे। तांत° १६.। इति विश्वः॥ शयनार्थिभिः कांक्ष्यत इति खट्वा शय्याभेदः॥ विश्वं जगत्। विश्वं समस्तजगतोर्विश्वे देवेषु नागरे। विश्वा चातिविषायां स्यात्। वांत° १८.। इति सः। विश्वं स्त्रीक्लीबयोः शुंठ्यामित्यमरः। विश्वस्य वसुराटोः। नरे

संज्ञायां। मित्रे चर्षौ। पा° ६.३.१२८—१३०.। इति पूर्वपदस्य दीर्घः। विश्वावसुः। विश्वाराट्। विश्वानरः। विश्वामित्र इति ॥

इण्शीङ्भ्यां वन् ॥ १५२ ॥

इण् गतौ। शीङ् स्वप्ने ॥ आभ्यां वन्। एवावधारणे। एवावधारणे ऽप्यर्ये। एवे चानियोगे। पा° ६.१.९४.४.। इति पररूपं वक्तव्यं। शयेव ॥ शेवं मेढ्रं ॥

सर्वनिघृष्वरिष्वलष्वशिवपद्वप्रह्वेष्वा अतंत्रे ॥ १५३ ॥

सर्वादयो वन्प्रत्ययांता निपात्यते ऽतंत्रे ऽ कर्तरि ॥ सृ गतौ। सर्वं निरवशेषं। त्रिलिंगं। सर्वस्वे तु सर्वतः सर्वशब्दो व्युत्पादितः ॥ घृषु संघर्षे निपूर्वः। गुणाभावः। निघृष्वं खुरं प्राहुः। निघृष्वं खुरमार्जनं ॥ रिषु हिंसायां। रिष्वो हिंस्रः ॥ लष कांतौ। लष्वो नर्तकः ॥ शीङ् स्वप्ने। ह्रस्वत्वं। शेतिरत्र तिष्ठतौ जलाशयवत्। शेते तिष्ठति नंदरतिभ्यां न विक्रियते गुणावस्थारहितः शांतः शिवः शंभुः। शिवं भद्रं शिवः शंभुः शिवा गौरी शिवाभया। शाश्वत. १.१.। शिवं मोक्षे सुखे भद्रे सलिले ऽथ शिवो हर इति कोशांतरं। शिवः शंभुः शिवं मोक्षे सलिले ऽथ शिवो हरे। अभयामलकीगौरीक्रोष्टीस्रुफलासु च। शिवा काटामलौषधौ। वांत° ९.। इति विश्वः ॥ पद गतौ ॥ पद्वो भूलोकः ॥ ओहाक् त्यागे प्रपूर्वः। आलोपः। प्रह्वो नम्रः। त्रिलिंगः ॥ ईषेर्वन्। ईष्व आचार्यः ॥ अतंत्र इति किं। सर्ता सारकः ॥ ह्रस शब्दे। बाहुलकादतो ऽपि वन्। ह्रस्वः खर्वैकमात्रयोः। पृथ्वादित्वात् ह्रसिमा। ह्रस्वं लिंगत्रये ज्ञेयं लघु नपुंसके। ह्रस्वसभेत्यशाला च। पा° २.४.२४.। इत्यत्र न्यासकृत् ॥

शेवायह्वजिह्वाग्रीवाप्वामीवाः ॥ १५४ ॥

शेवादयो वन्प्रत्ययांता निपात्यंते ॥ शीङ् स्वप्ने। शेवा लिंगाकृतिः ॥ यज देवपूजादौ। जकारस्य हकारः। यह्वो यजमानः ॥ जि जये। हुगागमः। जिह्वा रसना ॥ गॄ निगरणे। ग्रीभावश्च। ग्रीवा शिरोधरा। बहुव्रीहिसमासे दशग्रीवग्रीवौ। ग्रीवाभ्यो ऽण् च। पा° ४.३.५७.। इत्यण्ढञौ। ग्रैवं। ग्रैवेयं। कुलकुक्षीति ढकञ्। पा° ४.२.९६.। ग्रैवेयकं कंठभूषेत्यमरः ॥ आप्लृ व्याप्तौ। आप्वा कंठस्थानं ॥ मीङ् हिंसायां। मीवोदरक्रिमिः ॥

कॄगॄशॄदॄभ्यो वः ॥ १५५ ॥

कॄ विक्षेपे। गॄ निगरणे। शॄ हिंसायां। दॄ विदारणे ॥ एभ्यो वः स्यात्। इटि प्राप्ते नेड्वशि कृति। पा° ७. २. ८.। इतीट्प्रतिषेधः। कर्वः कामः ॥ गर्वो ऽहंकारः ॥ शर्वः शिवः। इंद्रवरुणेति। पा° ४. १. ४९.। ङीषानुकौ। शर्वाणी गौरी ॥ दर्वो राक्षसः ॥

कनिन् युवृषितक्षिराजिधन्विद्युप्रतिदिवः ॥ १५६ ॥

यु मिश्रणे। वृषु सेचने। तक्षू त्वक्षू तनूकरणे। राजृ दीप्तौ। धवि गत्यर्थः। द्यु अभिगमने। दिवु क्रीडादौ प्रतिपूर्वः ॥ एभ्यः सप्तभ्यः कनिन् स्यात्। युवा तरुणः। यूनस्तिः। पा° ४. १. ७७.। युवतिः। कृदिति ङीष्। युवती॥ वृषेंद्रः॥ तक्षा वर्धकिः॥ प्रकृती रंजयतीति। राजा क्षत्रियचंद्रयोरित्यमरः। अनेकार्थत्वात् रंजने ऽपि वर्तते। रंजयतीति राजा प्रभुः। तेन राजा प्रकृतिरंजनात्। ४.१२.। इति रघुः। स्त्रियां राज्ञी॥ धन्वा शरासनं। समानौ मरुधन्वानावित्यमरः। पुष्पधन्वा रतिपतिः ॥ द्युवा सूर्यः॥ प्रतिदिवा दिवसः। बहुलवचनात्केवलादपि कनिन्निति। तेन दिवौकस इत्यत्र वृद्धिर्भवतीति दिव उत्। पा° ६. १. १३१.। इत्यत्र भागवृत्तिः। अन्ये कप्रत्ययांतेन दिवशब्देनाकारांतेन साधयंति। यथायं प्रयोगः। इदं पुरं तेन विवर्जितं वनं वनं च यत्नेन समन्वितं पुरं। न शोभते तेन विनाद्य नो पुरं मरुत्वता वृत्रवधे यथा दिवमिति ॥ प्राक् प्रत्ययनिर्देशादन्यतो ऽपि भवति। दन्श दशने। नलोपः। दशन्॥ णु स्तुतौ। बाहुलकाद्गुणः। नवन्॥ अशू व्याप्तौ। षप समवाये। आभ्यां प्रत्ययस्य तुट् च। अष्टन्। सप्तन्॥ पंचतेः पंचन्। एते दशादयः संख्याशब्दाः॥

नञि जहातेः ॥ १५७ ॥

ओहाक् त्यागे॥ अस्मो नञ्युपपदे सति कनिन्। आतो लोपः। रो ऽसुपि। पा° ८. २. ६८. ६९.। इति रेफादेशः। अहर्दिनं। अहन्निति रुत्वं। अहोभ्यां। अहोभिः। अहरादीनां पत्यादिषूपसंख्यानं। पा° ८. २. ७०. २.। इति रः। अहर्पतिः। अहःपतिः। अह्नो रुविधौ रूपरात्रिरथंतरेष्वेव। पा° ८. २. ६८. २.। अहोरूपं। अहोरात्रः। गतमहो रात्रिर्गता ॥

श्वन् उक्षन् पूषन् प्लीहन् क्लेदन् स्नेहन् मूर्धन् मज्जन् अर्यमन् विश्वप्सन् परिज्मन् मातरिश्वन् मघवन्निति॥१५८॥

कनिनंता एते त्रयोदश शब्दा निपात्यंते॥ टुओश्वि गतिवृद्ध्योः। इकारलोपः। श्वा कुक्कुरः। स्त्रियां ङीप्। शुनी च गृहिणी वाच्यः किमन्यो जनः॥ उक्ष सेचने। उक्षा बलीवर्दः॥ पूष वृद्धौ। पुषेर्वा निपातनात् दीर्घः। पूषादित्यः। इन्हन्निति। पा° ६. ४. १२.। नियमात् दीर्घाभावः। पूषणौ। पूषणः। जयंति साधु पूषाणः शिष्यपंकजबोधका इति तु प्रमादः॥ प्लिह गतौ। इकारस्य दीर्घत्वं। प्लीहा कुक्षिव्याधिः। प्लीहानौ। प्लीहानः। अर्थवतो हनो नियमादत्र दीर्घत्वं भवत्येव॥ क्लिदू आर्द्रभावे। गुणश्च। क्लेदा चंद्रः॥ ष्णिह प्रीतौ। गुणः। स्नेहा व्याधिः। स्नेहानौ। स्नेहानः॥ मुर्वी मव बंधने। उकारस्य दीर्घः। वकारस्य धकारः। मूर्धा शिरः। मूर्ध्वजैरूर्ध्वजैरिति यमकाद्वकारवानपि। तथा निपातनादागंतुर्वकारः। भवार्थे यति मूर्धन्यः॥ मस्जेः सकारस्य चुत्वं। शकारः। तस्य जस्त्वं। जकारः। मज्जास्थिसारः॥ माङ् माने ऽर्यपूर्वः। अर्यमादित्यः। अर्यमणौ। अर्यमणः। बह्वर्यमापि॥ प्सा भक्षणे विश्वपूर्वः। विश्वप्सा देवः॥ ज्मु इति सौत्रो धातुः परिपूर्वः। यणादेशः। परिज्मा चंद्रः॥ टुओश्वि मातरिपूर्वः। सप्तम्या अलुक्। धातोरिकारलोपः। मातरिश्वा सदागतिः। कुशियश्च वाति प्रभातके मातरिश्वन्निति कादंबरी॥ महेर्हकारस्य घकारो ऽवुगागमश्च। मघवेंद्रः। भट्टौ तु मघवत्शब्दो ऽस्ति। हविर्जक्षिति निःशंको मखेषु मघवानसौ। १८. ९१.। इति। सौ च मघवान्मघवा चेति कातंत्रसूत्रं॥ क्षपपाकवृत्तावत्रेतिशब्द आधर्ये व्याख्यातः। हेलालीलेत्यमी हावाः। अम° १. १. ७. ३२.। इतिवत्। तेनान्ये ऽप्यत्र यथादर्शनं द्रष्टव्याः॥

॥ इति महोपध्यायजाजलीत्यपरनामधेयश्रीमदुज्ज्वलदत्तविरचितायामुणादिवृत्तौ प्रथमः पादः ॥ १ ॥

कृहृभ्यामेणुः ॥ १ ॥

डुकृञ् करणे। हृञ् हरणे॥ आभ्यामेणुः स्यात्। करेणुर्गजहस्तिन्योः। स्त्रियां करेणूरित्यपि दृश्यते॥ हरेणुर्गंधद्रव्यं कलायश्च। यथा च। कलायस्तु सतीनकः। हरेणुखंडिकौ चास्मिन्निति वैश्यवर्गे ऽमरः॥

हनिकुषिनीरमिकाशिभ्यः क्थन् ॥ २ ॥

हन हिंसागत्योः। कुष निष्कर्षे। णीञ् प्रापणे। रमु क्रीडायां। काशृ दीप्तौ॥ एभ्यो धातुभ्यः क्थन् भवति। ह्यो विषयणः॥ कुष्ठं व्याधिसुगंधयोः। द्वंद्वोपतापगर्ह्यात्प्राणिस्थादिनिः। पा° ५. २. १२८.। इतीनिः। कुष्ठिनौ। कुष्ठिनः॥ नीथो नयनं। सुनीथो धर्मशीलः॥ रथः स्यंदनः। रथः स्यात्स्यंदने काये चरणे वेतसे ऽपि च। थांत° १.। इति विश्वः। दशरथस्यापत्यं दाशरथिः। क्व चिदपवादविषये ऽप्युत्सर्गः प्रवर्तते। तेन प्रदीयतां दाशरथाय मैथिलीति सिध्यति॥ काष्ठं दारु समाख्यातं काष्ठा दिक्कालयोः स्मृता। काष्ठा दारुहरिद्रायां कालमानप्रकर्षयोः। स्यात् दिशि स्थानमात्रे च काष्ठमाख्यातमिंधने। ठांत° ८.। इति सः॥

अवे भृञः ॥ ३ ॥

अवशब्द उपपदे भृञः क्थन् भवति॥ अवभृथः यज्ञभेदो यज्ञावसानं च॥

उषिकुषिगार्तिभ्यस्थन् ॥ ४ ॥

उष दाहे। कुष निष्कर्षे। गै शब्दे। ऋ गतौ॥ एभ्यस्थन् स्यात्। ओष्ठो दंतच्छदः। ओत्वोष्ठयोर्वा पररूपत्वं। पा° ६. १. ९४. ५.। बिंबोष्ठी। बिंबौष्ठी॥ कोष्ठं कुक्षिकुशूलयोः। कोष्ठं कुशूले चात्मीये कुक्षेरंतर्गृहस्य च। ठांत° ५.। इति विश्वः॥ गाथा वाग्भेदवृत्तयोः॥ अर्थो ऽभिधेये शब्दानां धनकारणवस्तुषु। प्रयोजने निवृत्तौ च विषये च प्रयुज्यते। पर्षादित्वात् ष्ठन्। अर्थिकः॥ श्रु गतौ। बहुलकादतो ऽपि थन्। श्रोथः श्वयथुरित्यमरटीकायां॥

सर्तेर्णिच्च ॥ ५ ॥

सृ गतौ ॥ अतस्थन् णिद्वत्ति । सार्थः समूहः ॥

जॄवृञ्भ्यामूथन् ॥ ६ ॥

जॄ वयोहानौ । वृञ् वरणे ॥ आभ्यामूथन् । जरूथं मांसं ॥ वरूथो रथगुप्तौ ना ॥

पातॄतुदिवचिरिचिसिचिभ्यस्थक् ॥ ७ ॥

पा पाने । तॄ प्लवनतरणयोः । तुद व्यथने । वच परिभाषणे । रिचिर् विरेचने । षिच क्षरणे ॥ एभ्यः षड्भ्यो धातुभ्यस्थक् स्यात् ॥ पीथो रविर्घृतं पीथं । महिरमिहिरपीथाः कालकृत्पद्मपाणिरिति वर्णविवेकः । पीथं जलं च ॥ तीर्थं गुर्ववतारयोः । तीर्थं शास्त्राध्वरोपायक्षेत्रोपाध्यायमंत्रिषु । अवतारर्षिजुष्टांभःस्त्रीरजःसु च विश्रुतं । थांत° ८. । इति विश्वः ॥ तुथ्यो वैश्वानरः । तुथ्यो ऽग्नावंजने तुथ्या नीलीसूक्ष्मैलयोः । थांत° ५. । इति विश्वः ॥ उक्थं सामवेदः । तदधीते तद्वेद । पा° ४. २. ५९. । इति ठक् । औक्थिकः । रिक्थं दायाद्धनं । सुवर्णमिति पारायणं । ऋच स्तुतौ । अतो ऽपि बाहुलकात् । हिरण्यं द्रविणं द्युम्नं रिक्थमृक्थं धनं वस्विति शब्दार्णवः ॥ सिक्थं तु स्यान्मधूच्छिष्टं । सिक्थं नील्यां मधूच्छिष्टे सिक्थ ओदनसंभवे । थांत° ४. । इति विश्वः ॥

अर्तेर्निरि ॥ ८ ॥

ऋ गतौ ॥ अतो निर्शब्द उपपदे थक् । निर्ऋथः साम ॥

निशीथगोपीथावगथाः ॥ ९ ॥

एते शब्दास्थक्प्रत्ययांता निपात्यंते ॥ शीङ् स्वप्ने निपूर्वः । निशीथः स्यादर्धरात्रे निशीथो रात्रिमात्रके । थांत° १४. । इति विश्वः ॥ पा पाने गोपूर्वः । घुमास्थागेत्यादिनेत्वं । गोपीथं तीर्थमाख्यातं ॥ गाङो ऽवपूर्वस्य ह्रस्वत्वं । अवगथः प्रातः स्नातः ॥

गश्चोदि ॥ १० ॥

गै शब्दे ॥ अत उद्युपपदे थक् । उद्गीयत इत्युद्गीथः सामवेदध्वनिः प्रणवश्चेति सुभूतिचंद्रः ॥

समीणः ॥ ११ ॥

इण् गतौ॥ अतः सम्युपपदे थक्। समिथो वह्निः॥

तिथपृष्ठगूथयूथप्रोथाः ॥ १२ ॥

तिथादयस्थक्प्रत्ययांता निपात्यंते॥ तिज निशाने। जलोपः। तिथो ऽनलकामयोः॥ पृषु सेचने। पृष्ठं तु चरमं तनोरित्यमरः। पृष्ठशब्दः स्तोत्रवचनो ऽपि। पृष्ठानां स्तोत्राणां समूहः पृष्ठादुपसंख्यानं। पा° ४.२.४२.१.। इति यत्। पृष्ठ्यो यागविशेष इति ब्राह्मणादिसूत्रे रक्षितः॥ गुङ् अव्यक्ते शब्दे। यु मिश्रणे। अनयोर्दीर्घः। गूथं विष्ठा। यूथं समूहः॥ प्रुङ् गतौ। गुणः। प्रोथमस्त्री तुरंगास्ये प्रोथः प्रस्थित उच्यते। वृत्तांतरं मुदकांतं च प्रियं प्रोथमनुव्रजेत्। प्रोथो ऽध्वगे ऽश्वघोणायां कठोस्त्रीगर्भयोः। थांत° ३.। इति विश्वः॥

स्फायितंचिवंचिशकिक्षिपिक्षुदिसृपितृपिदृपिवंद्युंदिश्वितिवृत्यजिनीपदिमदिमुदिखिदिछिदिभिदिमंदिचंदिदहिदसिदंभिवसिवाशिशीङ्हसिसिधिशुभिभ्यो रक् १३

स्फायी वृद्धौ। तन्चू संकोचने। वन्चु प्रलंभने। शक्लृ शक्तौ। क्षिप प्रेरणे। क्षुदिर् संपेषणे। सृप्लृ गतौ। तृप प्रीणने। दृप हर्षमोचनयोः। वदि अभिवादनस्तुत्योः। उन्दी क्लेदने। श्विता वर्णे। वृतु वर्तने। अज गतिक्षेपणयोः। णीञ् प्रापणे। पद गतौ। मदी हर्षे। मुद हर्षे। खिदि दैन्ये। छिदिर् द्वैधीकरणे। भिदिर् विदारणे। मदि स्तुतौ। चदि आह्लादने। दह भस्मीकरणे। दसु उपक्षये। दंभु दंभे। वस निवासे। वाशृ शब्दे। शीङ् स्वप्ने। हसे हसने। षिधु गत्यां। शुभ दीप्तौ॥ एभ्यो द्वात्रिंशद्भ्यो रक् स्यात्॥ नेड्वशि कृतीतीट्प्रतिषेधः। वलि यलोपः। स्फारं प्रभूतं। स्फारः स्याद्विकटे स्फारं फलकादेश्च बुद्बुदे। रांत° २२.। इति विश्वः॥ न्यंक्वादित्वात्कुत्वं। अनिदितामिति नलोपः। तक्रं मथितं। तक्रमुदश्विन्मथितं पादांब्वर्धांबु निर्जलं। अम° २.९.५३.॥ वक्रमनृजुदुष्टयोः। वक्रः स्यात्कुटिले क्रूरे पुटभेदे शनैश्चरे। रांत° ५४.। इति विश्वः॥ शक्रः कुटजवज्रिणोः। शक्रो महेंद्रे स्यात्कुटजार्जुनभूरुहोः। रांत° ५३.। इति विश्वः॥ क्षिप्रं शीघ्रं॥ क्षुद्रः स्याद-

ल्पहीनयोः। क्षुद्रः स्यादधमे क्रूरे कृपणे ऽल्पे च वाच्यवत्। क्षुद्रा वेश्यानटीकंटकारिकासरघासु च। रांत० ५८.। इति विश्वः॥ सृपश्चंद्रः॥ तृप्रः पुरोडाशः॥ दृप्रो बलवान्॥ वंद्रः पूजकः॥ नलोपः। उद्रो जलचरः। संपूर्वात्समुद्रो ऽब्धिः॥ श्वित्रं कुष्ठं॥ वृत्रा ध्वांतारिदानवाः। वृत्रो रिपौ घने ध्वांते शैले चक्रे च दानवे। रांत० ४०.। इति विश्वः॥ अजेर्वीभावः। वीरः सुभटः। वीरस्तु सुभटे श्रेष्ठे वीरं शृंगाटके ऽपि च। वीरा स्यात् क्षीरकाकोलीतामलक्येलवालुषु। पतिपुत्रवतीरंभागंभारीमदिरासु च। रांत० ९६.। इति विश्वः। नञि। अवीरा निःपतिसुता॥ नीरं जलं। निम्नमीर्ते पृषोदरादित्वान्नीरमिति धातुप्रदीपटीका॥ पद्रो ग्रामः संवेशश्च॥ मद्रो हर्षो देशभेदश्च॥ मुद्रा प्रत्ययकारिणी॥ खिद्रो रोगो दरिद्रश्च॥ छिद्रं विवरं॥ भिद्रं वज्रं॥ मंद्रो गंभीरध्वनिः॥ चंद्रः कर्पूरसोमयोः। चंद्रः सुधांशुकर्पूरकंपिल्लस्वर्णवारिषु। रांत० ६३.। इति विश्वः। पचाद्यचि रेफशून्यो ऽपि चंदो निशापतौ। हिमांशुश्चंद्रमाश्चंद्रः शशी चंदो हिमद्युतिरिति शब्दार्णवः॥ दग्रो दावाग्निः॥ दस्यति रोगान् क्षिपतीति दस्रः स्वर्वैद्यश्चौरश्च। नासत्यो दस्रश्च द्वावेनावश्विनीसुताविति स्मृतिः॥ दभ्रः समुद्रः स्वल्पं च। अदभ्रः प्रचुरं। अदभ्रदर्भामधिशय्य स स्थलीं। किरा० १.३८.। इति भारविः॥ वसेः संप्रसारणं। शासिवसिघसीनां च। पा० ८.३.६०.। इति षत्वं न भवति न रपरेत्यादिना। पा० ८.३.११०.। प्रतिषेधात्। उस्रो रश्मिर्देवश्च। उस्रा गौः॥ वास्रं पुरीषं। वास्रो ऽपि दिवसे वास्रं मंदिरे च चतुष्पथे। रांत० ७३.। इति विश्वः॥ शीरो ऽजगरः॥ हस्रो मूर्खः॥ सिध्रः साधुर्वृक्षजातिश्च। कुत्सायां कन्। सिध्रकावणं कश्चिन्नाम। वनं पुरगेति। पा० ८.४.४.। णत्वं॥ शुभ्रं रुचिरं शुक्लं च पांडुरं च। शुक्लप्रदीप्तयोः शुभ्रमिति कोशांतरं॥ मिश मश शब्दे। अतो बहुलवचनाद्रक्। मिश्रमिति देशना॥ तथा पुडिधातोः पुंड्रो दैत्यभेदः। तस्येदमित्यर्थे पौंड्रः पौंड्रविवर्धनः॥ तथा सिनोतेः सिरा। नाडी तु धमनिः सिरेत्यमरः॥ मुसे रक्। मुस्रं नयनजलं। मुस्रमश्रुणीति प्राकारभेदः॥ असयते रक्। अस्रं रुधिरं। तत्पिबतीत्यस्रपो राक्षसः॥

चकिरम्योरुच्चोपधायाः ॥ १४ ॥

चक तृप्तौ। रमु क्रीडायां॥ आभ्यां रगुपधायाश्चोत्वं। चुक्रमम्लद्रव्यं। चुक्रस्त्वम्ले ऽम्लवेतसे। चुक्री चांगेरिकायां स्याद्वृक्षाम्ले चुक्रमिष्यते। रांत० ५१.। इति विश्वः॥ रुम्रो ऽरुणः शोभनश्च॥

वौ कसेः ॥ १५ ॥

कस गतौ ॥ अतो वावुपपदे रगुत्वं चोपधायाः। विकुरश्चंद्रमाः। वर्णविवेके पुनरुपधायां बहुलवचनादूकारादेशं कृत्वा विकस इति साधितं। दर्शितं च। सिंधूत्यरात्रिमणिदर्शवियन्मृगांकविकसपर्वकरपारदविप्रराज इति विक्रमादित्यः ॥

अमितम्योर्दीर्घश्च ॥ १६ ॥

अम गत्यादिषु। तमु कांक्षायां ॥ आभ्यां रक् दीर्घश्चोपधायाः। आम्रं फलं। आम्रश्चूतो रसालो ऽसौ। अम० २.४.२.१४.॥ ताम्रं शुल्वं ऽरुणो ऽन्यवत्। रांत० ७०.। इति विश्वः। अर्शआदित्वादमृस्तरुस्ताम्रं शुल्वं ॥

निंदेर्नलोपश्च ॥ १७ ॥

णिदि कुत्सायां ॥ अतो रक् नलोपश्च। निद्रा स्वप्नः ॥

अर्देर्दीर्घश्च ॥ १८ ॥

अर्द गतौ ॥ अतो रक् दीर्घश्च धातोः। आर्द्रा नक्षत्रं। आर्द्रं सरसद्रव्यं त्रिषु। आर्द्रं त्वसिते त्रिष्विति विश्वः ॥

शुचेर्दश्च ॥ १९ ॥

शुच शोके ॥ अतो रक् दश्चांतादेशो धातोर्दीर्घश्च। शूद्रो वृषलः। पुंयोगे शूद्री। शूद्रा तज्जातिरेव च ॥

दुरीणो लोपश्च ॥ २० ॥

इण् गतौ ॥ अतो दुर्युपपदे रक् लोपश्च धातोः। रो रि लोपः। पा० ८.३.१४.। इत्यादिकार्यं। दूरं विप्रकृष्टं। शेषे दूरादेत्येति वक्तव्यं। पा० ४.२.१०४.६.। दूरादागतो दूरेत्यः पथिकः। स्थूलदूरेति। पा० ६.४.१५६.। दवीयान्। विदूरशब्दो नगरविशेषस्य पर्वतविशेषस्य बालवायस्य वाचकः। विदूरे प्रभवतीति विदूरात् ञ्यः। पा० ४.३.८४.। वैदूर्यो मणिः। बालवायजमिच्छंति वैदूर्यमणिमुत्तमा इति वृत्तिः ॥

कृतेश्छक्रू च ॥ २१ ॥

कृती छेदने ॥ अतो रक् छक्रू इत्येतावादेशौ स्तो यथाक्रममंत्यसर्वयोः।

कृच्छ्रं दुःखं। कृच्छ्रमाख्यातमाभीले पापसांतपनादिनोः। रांत° ६२.। इति विश्वः। पंचम्याः स्तोकादिभ्यः। पा° ६.३.२.। इत्यलुक्। कृच्छ्रान्मुक्तः। सुखादित्वात्। पा° ३.१.१८.। कृच्छ्रायते। सुखादिभ्यश्च। पा° ५.२.१३१.। इतीनिः। कृच्छ्री ॥ क्रूरः खलः। क्रूरस्तु कठिने घोरे नृशंसे चाभिधेयवत्। रांत° २६.। इति विश्वः ॥

रोदेर्णिलुक्च ॥ २२ ॥

रुदिर् अश्रुविमोचने॥ अस्मात् ण्यंताद्रक् णेश्च लुक्। लोपे हि प्रत्ययलोपलक्षणेन गुणः। रोदनाद्रुद्रः। यदुक्तं। रोदनात्तव रुद्रेति नामधेयत्वमावहेत्यागमः। इंद्रवरुणेति ङीषानुकौ। रुद्राणी॥ बहुलमन्यत्रापि संज्ञाछंदसोः। अन्यत्रापि धात्वंतरे प्रत्ययादौ च णेर्लुग्भवति। बहुलं संज्ञायां छंदसि च विषये॥ संज्ञायां तावत्। धृञ् धारणे। अतो ण्यंतात् पाशशूलचक्रवज्रशक्त्युदकदंड इत्येतेषूपपदेषु पचाद्यचि णिलुक्। पाशं धारयतीति पाशधरो वरुणः। शूलधरो रुद्रः। चक्रधरः कृष्णः। वज्रधर इंद्रः। शक्तिधरः कुमारः। उदकधरो मेघः। दंडधरो यमः॥ शुष शोषणे। मुच्लृ मोक्षणे। रुह जन्मनि। एभ्यः पर्ण उपपदे ण्यंते ऽन्येभ्यो ऽपि दृश्यते। पा° ३.२.१७८.। इति क्विपि णिलुक्। पर्णानि शोषयतीति पर्णशुट्। पर्णमुट्। पर्णरुट्। वलां झशो ऽंते। पा° ८.२.३९.। चोः कुः। हो ढः। पा° ८.२.३०.३१.। इत्यादिकार्यं। तथा च प्रयोगः। वांति पर्णशुषो वाता वांति पर्णमुचो ऽपरे। ततः पर्णरुहो वांति ततो देवः प्रवर्षति॥ छंदसि च। वृधु वृद्धौ। णिच्। णेर्लुक्। वर्धतु त्वा सुष्टुतयः॥

ज्रोरी च ॥ २३ ॥

ज्रु इति सौत्रो धातुः॥ अतो रगीश्चांतादेशः। जीरो ऽणुः। जीरः खड्गे वणिग्द्रव्ये। रांत° २८.। इति विश्वः। संज्ञायां कनि जीरकं वणिग्द्रव्यं॥ ज्यश्चेत्येके। तथा हि जीवे रदानुक्। पा° ६.१.६६.१.। इत्यस्य प्रत्याख्यानार्थं नैतज्जीवे रूपं किंतु रकि ज्यः संप्रसारणं। पा° १.१.४.। इति भाष्य उक्तं॥

सुसूधागृधिभ्यः क्रन् ॥ २४ ॥

षुञ् अभिषवे। षूङ् प्राणिगर्भविमोचने। डुधाञ् धारणे। गृधु अभिकांक्षायां॥ एभ्यः क्रन्। सुरो देवः। स्त्रियां टाप्। सुरा मदिरा॥ सूरः

सूर्यः। सौरसौरभास्पदमिति दंत्यः। उत्तरसूत्रे तालव्यादिरपि सूर्ये। शूरश्चारभटे सूर्ये। रांत॰ २६.। इति विश्वः॥ ईत्वं। धीरः पंडितः। धीरा हि दुस्तरमपि व्यसनं तरंति॥ गृध्रः पक्षी॥

शुसिचिमिञां दीर्घश्च ॥ २५ ॥

शु गताविति सौत्रः। षिञ् बंधने। चिञ् चयने। डुमिञ् प्रक्षेपणे॥ एभ्यः क्रन्नेषां दीर्घत्वं च। शूरो विक्रांतः। पात्रेसमितादित्वात् पिंडीशूरः। के चित्कुमुदाकरा इवासोढशूरभासा इति सुबंधुप्रयोगात् दंत्यादिरपि वीरवाचकः सूर इति सर्वस्वे व्याख्यातं। षु सु गतावित्ययं न भ्वादिको मूर्धन्योपदेशः पारंपर्येण। तस्माद्भ्वादेरवृत्कृतत्वात् षु इत्ययं धातुरूह्यत इति पुरुषोत्तमदेवः॥ सीरो लांगलं। सीरपाणिर्हलायुधः॥ चीरं वल्कलं॥ मीरः समुद्रः॥

वाविंधेः ॥ २६ ॥

ञिइंधी दीप्तौ॥ अतो वावुपपदे क्रन्। नलोपः। वीध्रं तु विमलार्थकमिति विश्वाख्यनिघ्ने ऽमरः॥

वृधिवपिभ्यां रन् ॥ २७ ॥

वृधु वृद्धौ। डुवप्॥ आभ्यां रन्। वर्ध्रं चर्म। तस्य विकारः। पा॰ ४. ३. १३४.। इति। अपांतात् ङीप्। वार्ध्रीव नासास्येति वार्ध्रीणसः। अञ्नासिकायाः। पा॰ ५. ४. ११८.। इति नसादेशः। पूर्वपदात्संज्ञायां। पा॰ ८. ४. ३.। इति णत्वं। कृष्णग्रीवो रक्तशिराः श्वेतपक्षो विहंगमः। स वै वार्ध्रीणसः प्रोक्तः पितॄणां पुष्टिवर्धन इत्यागमः॥ पुंनपुंसकयोर्वप्र इत्यमरः। वप्रः पितरि केदारे वप्रः प्राकाररोधसोरिति धरणिरंतिदेवौ॥

ऋज्रेंद्राग्रवज्रविप्रकुब्रचुब्रक्षुरखुरभद्रोग्रभेरमेरशुक्रशुक्लगौरवन्त्रेरामालाः ॥ २८ ॥

रनंता ऊनविंशतिरमी निपात्यंते॥ ऋज गत्यादिषु। निपातनाद्गुणाभावः। ऋज्रो नायकः॥ इदि। इंद्रः शक्रः। इंद्रः शचीपतावंतरात्मन्यादित्ययोगयोः। रांत॰ ६३.। इति विश्वः। तस्य स्त्रींद्राणी। रन्विधाविंद्रीति न कृतं वैचित्र्यार्थं। इंद्रवायू द्वंद्वे॥ अंगेर्नलोपः। अग्रं प्रधानमुपरिभागः॥ वज गतौ। वज्रो ऽस्त्री हीरके पवौ। अम॰ ३. ४. १८६.। वज्रं हीरकदंभोलिबा-

लकामलकेषु च। वन्ना गुडूचिकायां स्यात्। रांत° ७०.। इति सः॥ डुवप्। उपधाया इत्वं। विप्रो ब्राह्मणः॥ कुबि आच्छादने। चुबि वक्त्रसंयोगे। अनयोर्नलोपः। कुब्रमरण्यं॥ चुब्रं मुखं॥ क्षुर विलेखने। रेफलोपः। अगुणः। क्षुरो लोमच्छेदकः। क्षुरः स्यात् छेदनद्रव्ये कोकिलाक्षे च गोक्षुरे। रांत° १२.। इति सः॥ खुर छेदने। गुणाभावो ऽंत्यलोपश्च। खुरः शफं। कदाद्राक्षं देशं हरवृषखुरक्षुण्णनिर्दारिताश्ममिति। खुर उपपदे प्रा पूरणे। अतः कः स्यात्। खुरप्रो ऽस्त्रं। दशाननक्षिप्तखुरप्रखंडितः क्व चिद्रताङ्गो हिमदीधितिर्यथेति हरविलासः॥ भदि कल्याणे। नलोपः। भद्रं कल्याणं॥ उच समवाये। चकारस्य गकारः। उग्रो महेश्वरः। उग्रः शूद्रासुते क्षत्रे श्रीकंठे चोत्कटे ऽन्यवत्। रांत° ५५.। इति विश्वः॥ ञिभी भये। गौरादित्वात् ङीष्। भेरी दुंदुभिः। पक्षे लत्वं। भेलो जलतरणद्रव्यं वृद्धकायः कातरश्च। भेलः प्लवे भीलुके च निर्बुद्धिमुनिभेदयोः। लांत° २३.। इति विश्वः॥ शुचेश्चकारस्य ककारः। शुक्रो दैत्यगुरुः प्रोक्तः शुक्रो मासहुताशनौ। शुक्रं देहवतां वीजं शुक्रमक्षिरुजं विदुरिति शाश्वतः॥ शुक्लः शुभ्रः। शुक्लो योगांतरे श्वेते शुक्लं च रजते मतं। लांत° २९.। इति विश्वः॥ गुङ् अव्यक्ते शब्दे। वृद्धिः। गौरो ऽरुणे सिते पीते। अम° ३.४.१९१.। गौरादित्वात् ङीष्। गौरी दुर्गा॥ वन संभक्तौ। वन्रो विभागी। वर्णाशब्दस्य कृपृइत्यादिना। ३.१०.। नप्रत्ययेन सिद्धत्वादनार्यः पाठः॥ इण् गतौ। गुणाभावः। इरा मद्ये च वारिणि। इरावान् समुद्रः। तत्र भवः। ऐरावतः। ऐरावती नदी। उग्रंपश्येत्यादिना। पा° ३.२.३७.। खश्चि ह्रस्वो निपातितः। इरंमदः। इरंमदो ऽशनिरित्यन्ये॥ मा माने। लत्वं। माला स्रक्। मालं क्षेत्र जने मालो माला पुष्पादिदामनि। लांत° १५.। इति विश्वः। इष्टकेषीकेति। पा° ६.३.६५.। पूर्वपदस्य ह्रस्वत्वं। मालभारिणी कन्या॥ बाहुलकात् तिज निशाने। रन्। दीर्घत्वं। जकारस्य वकारः। तीव्रं तीक्ष्णं। त्रिषु॥

समि कसेरुकन्॥ २९॥

कस गतौ॥ अतः सम्युपपदे उकन्। सम्यक्कसंति पलायंते ऽस्मादिति संकसुको दुर्जन इत्युपाध्यायसर्वस्वं। संशयमापन्नः। संकसुको ऽस्थिर इत्यमरः। भीमादिरयं॥

पचिनशोर्णुकन्कनुमौ च ॥ ३० ॥

पचेर्नशेर्णुकन् स्यात्। पाकारो वृद्ध्यर्थः। अनयोश्च यथाक्रमं कादेशनुमागमौ भवतः। पाकुकः सूपकारः स्यात्॥ नंशुको ऽणुवाचकः॥

भियः क्रुकन् ॥ ३१ ॥

ञिभी भये॥ अतः क्रुकन्। भीरुकः कातरः॥

क्वुन् शिल्पिसंज्ञयोरपूर्वस्यापि ॥ ३२ ॥

शिल्पिन्यभिधेये संज्ञायां गम्यमानायां सोपपदादपि शब्दान्निरुपपदाच्च धातोः क्वुन् स्यात्॥ शिल्पिनि तावत्। रंज रागे। रजको वस्त्रशोधकः॥ पूर्वस्य। इक्षुपूर्वात् कुट्ट छेदने। इक्षून् कुट्टयतीति। इक्षुकुट्टको गौडिकः॥ संज्ञायां। तक्षू तनूकरणे। तक्षको वर्धकिः॥ धूञ् कंपने। धुवको गर्भमोचकः॥ अभ्र वभ्रेति। अभ्रकमौषधं॥ चरेः। चरको वैद्यशास्त्रं प्रसिद्धं गंता च॥ चष भक्षणे। चषकं पानपात्रं॥ शालपूर्वस्य भन्जो आमर्दने। नलोपाभावः। टाप्। शालभंजिका क्रीडा काष्ठपुत्रिका च। नित्यं क्रीडाजीविकयोः। पा० २. २. १७.। इत्यत्र तु संज्ञायामिति बहुलं कृत्वा न्यासे साधितं। शीलमक्षिकेति तत्प्रकारांतरं॥ चायृ पूजादौ। पुष्पप्रचायिका॥ शुन गतौ॥ शुनकः श्वा॥ भष भर्त्सने। भषको ऽपि श्वेति कलिंगः॥ आङ्पूर्वात् मलतेरामलकः। गौरादित्वात् ङीष्। आमलकी। सर्वदामलकी ग्राह्या परित्यज्य दिनं रवेः॥ कलां पातीति कलापकं चंद्रकं॥ मल मल्ल धारणे। मल्लिका पुष्पजातिः। धम्मिल्लमल्लीयज इति प्रमादपाठः॥ बहुलमन्यत्रापि। उदकमिति प्रपंचार्यमिति प्राचीनवृत्तिः॥ कनी दीप्तौ। कनकं सुवर्णं॥ कटे वर्षादौ। कटकं वलये सानौ राजधानीनितंबयोः॥ लट बाल्ये॥ लटको दुर्जनः। इत्याद्यन्यदपि बोद्धव्यं॥

रमे रश्च लो वा ॥ ३३ ॥

रमेः क्वुन्। रेफस्य वा लत्वं। रमको विलासी। लमकस्तीर्थशोधकः। नडादित्वात् लामकायनः॥

जहातेर्द्वे च ॥ ३४ ॥

जहातेः क्वुन् धातोर्द्वित्वं च। आलोपो ऽभ्यासकार्यं च। जहकस्त्यागिकालयोः॥

ध्मो धम च ॥ ३५ ॥

ध्मा शब्दाग्निसंयोगयोः ॥ अतः क्वुन् धमादेशश्च धातोः। धमकः कर्मकारः स्यात् ॥

हनो वध च ॥ ३६ ॥

हंतेः क्वुन् वधादेशश्च धातोः। वधको हिंस्रः ॥

बहुलमन्यत्रापि ॥ ३७ ॥

अन्यत्रापि क्वुन् बहुलं स्यात्॥ कुह विस्मापने। कुहको दांभिकः॥ कृती छेदने। कृतकं मिथ्या॥ भिदिर्। भिदकः खड्गः॥ छिदिर्। छिदकं वज्रं। रुचे रुचकं मातुलुंगकं॥ लंगेर्लंगको वल्लभः॥ उक्ष उत्सर्गे। उक्षको मेघयोगिनोः। इत्यादि॥

कृषेर्वृद्धिश्चोदीचां ॥ ३८ ॥

कृष विलेखने॥ अतः क्वुनुदीचां मते धातोर्वृद्धिश्च। कार्षकः कृषीवलः। कृषकः स एव॥

उदकं च ॥ ३९ ॥

निपात्यते॥ उन्दी क्लेदने। अतः क्वुन्। उदकं जलं। दिगादित्वादुदकात्संज्ञायामिति यत्। उदक्या रजस्वला। उदक्या सर्ववर्णानां वर्ज्या रात्रिचतुष्टयं। पेषंवासेति। पा° ६. ३. ५८.। उदकस्योदः। उदधिः। एकहलादौ। पा° ६. ३. ५९.। इति विकल्प उदककुंभः। उदकुंभः। शांत्युदकुंभहस्ताः। २.२०.। इति भट्टिः। उदशब्दो ऽप्युदकपर्याय इति भाष्यटीका। उदकस्योदः संज्ञायामिति रचितः। सहस्यरात्रीरुदवासतत्परा। ५. २६.। इति कुमारः॥

वृश्चिकृष्योः किकन् ॥ ४० ॥

ओव्रश्चू छेदने। कृष विलेखने॥ आभ्यां किकन्। वृश्चिकः शूककीटे स्याद्राशिभेदे ऽपि वृश्चिकः। कृषिकः फालः। स्त्री कृकुशो कृषिकः फाल इति रत्नकोषः॥

प्राङि पणिकषः ॥ ४१ ॥

पण व्यवहारे। कष शिषेति दंडकः॥ आभ्यां किकन् प्राङ्युपपदे। प्रापणिकः पण्यविक्रयी॥ प्राकषिको रामाया नर्तकः परदारोपजीवी च॥

मुषेर्दीर्घश्च ॥ ४२ ॥

मुष स्तेये ॥ अतः किकन् । धातोर्दीर्घत्वं । मूषिक आखुः । अजादित्वान्मूषिका स्त्रियां । गिरिका बालमूषिकेत्यमरः ॥

स्यमेः संप्रसारणं च ॥ ४३ ॥

स्यमु शब्दे ॥ अतः किकन् धातोः संप्रसारणं दीर्घश्च । सीमिको वृक्षभेदः स्यात् ॥

क्रिय इकन् ॥ ४४ ॥

क्रीणातेरिकन् स्यात् । क्रयिकः क्रेता । विक्रयिको विक्रेता ॥

आङि पणिपनिपतिखनिभ्यः ॥ ४५ ॥

पण व्यवहारे स्तुतौ च । पन च । पत्लृ गतौ । खनु अवदारणे ॥ एभ्य आङीकन् स्यात् । आपणिको वणिक् । अत्रैव प्रपूर्व आङि प्रापणिकसिद्धौ प्राङि पणिपाति वैचित्र्यार्थं । आपणेन व्यवहरतीत्यर्थे ठकि सिद्धे निस्स्वरार्थमिदं ॥ आपनिक इंद्रनीलः किरातश्च ॥ आपतिकः श्येनो दैवायत्तश्च ॥ आखनिको मूषिको वराहश्च ॥

श्यास्त्याहृञविभ्य इनच् ॥ ४६ ॥

श्यैङ् गतौ । स्त्यै ष्ट्यै शब्दसंघातयोः । हृञ् हरणे । अव रक्षणादौ ॥ एभ्य इनच् स्यात् । श्येनः पक्षी । श्येनस्त्रिषु सिते खग इति ॥ स्त्येनश्चौरः ॥ हरिणो मृगः पांडुरश्च । हरिणः स्यात्कुरंगे ऽपि हरिणः पांडुरे ऽन्यवत् । हरिणी हरितायां च चारुवृत्तप्रभेदयोः । णांत° ५०. । इति विश्वः ॥ अविनो ऽध्वर्युः ॥

वृजेः किच्च ॥ ४७ ॥

वृजी वर्जने ॥ अस्मादिनच् किद्भवति । वृजिनं पापवक्रयोः । वृजिनं कलुषे पापे वृजिनं कुटिले ऽन्यवदिति । केशे तु वृजिनो मत इत्यमरः ॥

अजेरज च ॥ ४८ ॥

अजेरिनच् स्यादजादेशश्च वीभावबाधनार्थः ॥ अज गत्यादौ । अजिनं चर्म । अजिनं चर्म कृत्तिः स्त्रीत्यमरः ॥

बहुलमन्यत्रापि ॥ ४९ ॥

अन्यत्रान्यस्मादपि बहुलमिनच् किद्भवति ॥ कठ कृच्छ्रजीवने। कठिनं दृढं। कठिनं निष्ठुरे स्थाल्यां शर्करायां गुडस्य च। कठिना खटिकायां तु कठिनीति प्रयुज्यते। नांत° ४८.। इति विश्वः। कठिनी कक्खटी कटीत्यन्यः। नव-जलधरश्यामाः पश्यन्दिशो भवतीं विना कठिनहृदये जीवत्येव प्रिये स तव प्रियः ॥ कुडि दाहे। कुंडिन ऋषिः। तस्यापत्यं कौंडिन्यः ॥ वर्ह वल्ह प्राधान्ये। वर्हिणो मयूरः ॥ फलतेः फलिनः फली ॥ नल गहने। नलिनं पद्मं। पुष्करादित्वान्नलिनी ॥ मसी परिमाणे। मसिनं सुपिष्टं ॥ मल मल्ल धारणे। मलिनो मलीमसः ॥ बाहुलकात् द्रुहेरपि। द्रुहिणो ब्रह्मा ॥ तथा घतेर्दिनं दिवसमिति पुरुषोत्तमदेवः ॥

द्रुदक्षिभ्यामिनन् ॥ ५० ॥

द्रु गतौ। दक्ष वृद्धौ ॥ आभ्यामिनन्। द्रविणं द्रव्यं। द्रविणं कांचने वित्ते द्रविणं च पराक्रमे ॥ दक्षिणा ऋजुः। दक्षिणः सरलावामपरच्छंदानुवृत्तिषु। वाच्यवत् दक्षिणावाचीयज्ञदानप्रतिष्ठयोः। णांत° ४५.। इति विश्वः। दक्षिणादिकं दानं च ॥

अर्तेः किदिच्च ॥ ५१ ॥

ऋ गतौ ॥ अस्मादिनन् कित्स्यादिकारश्च धातोः। रपरत्वं च। इरिणं शून्यमूषरमित्यमरः ॥

वेपितुह्योर्ह्रस्वश्च ॥ ५२ ॥

टुवेपृ कपि चलने। तुहिर् अर्दने ॥ आभ्यामिनन्। ह्रस्वो ह्रस्वत्वं च धातोः। विपिनं गहनं ॥ तुहिनं हिमं। तुहिनमित्यत्र गुणे कृते ह्रस्वः ॥

तलिपुलिभ्यां च ॥ ५३ ॥

तल प्रतिष्ठायां। पुल महत्त्वे ॥ आभ्यामिनन्। तलिनं विरले स्तोके स्वच्छे ऽपि तलिनं त्रिषु। नांत° ४८.। इति विश्वः ॥ पुलिनं तोयसंनिधाविति नांते ऽमरः ॥

गर्वेरत उच्च ॥ ५४ ॥

गर्व मोचने॥ अस्मादिनन्। अकारस्योत्। गौरादित्वात् ङीष्। गुर्विणी गर्भिणी॥

रुहेश्च ॥ ५५ ॥

रुह जन्मनि॥ अत इनन्। रोहिणः। प्रज्ञादित्वादणि रौहिणश्चंदनतरुः। अश्वादित्वात्फञ्। रौहिणायनः। स्त्रियां जातेः। पा° ४.१.६३.। इति ङीष्। रोहिणी गौः। गौरादित्वात् रोहिणी नक्षत्रे॥

महेरिनण् च ॥ ५६ ॥

मह पूजायां॥ अस्मादिनण् स्यात्। चकारादिनन्नपि। माहिनं महिनं राज्यं॥

क्विब्वचिप्रच्छिश्रिस्रुद्रुप्रुज्वां दीर्घोऽसंप्रसारणं च ॥ ५७ ॥

वच परिभाषणे। प्रच्छ ज्ञीप्सायां। श्रिञ् सेवायां। स्रु गतौ। द्रु गतौ। प्रुङ् गतौ। जु इति सौत्रो धातुः॥ एभ्यः क्विप्। एषां दीर्घोऽसंप्रसारणं च। वचिप्रच्छ्योः पदांतकार्यं चोः कुरित्यादिकं। वाक् सरस्वती। टाप्। भागुरिमतेनाजादिपाठात् वाचा वाक् गीः सरस्वतीति चंद्रः। वाचो ग्मिनिः। पा° ५.२.१२४.। वाग्मी॥ शब्दं पृच्छतीति शब्दप्राट् शिष्यः। छ्वोः शूडनुनासिके च। पा° ६.४.१९.। इति शत्वं। शब्दप्राशौ। शब्दप्राशः॥ श्रीर्लक्ष्मीः। श्रीर्वेशरचनाशोभाभारतीसरलद्रुवे। लक्ष्म्यां त्रिवर्गसंपत्तौ वेषोपकरणे मता। रांत° २.। इति विश्वः। कृदिकारात्। पा° ४.१.४५.। इति ङीष्। श्रीयमित्यपि भवतीति दुर्घटे रक्षितः॥ स्रवत्यतो घृतादिकमिति स्रुग्यज्ञोपकरणं॥ द्रूर्हिरण्यं॥ कटेन प्रवर्तत इति कटप्रूः कामरूपी कीटश्च॥ जूः आशौ ऽश्ववृषभयोर्जूः पिशाची स्त्रियां मतेति रूपमंजरी। जूराकाशे सरस्वत्यां पिशाच्यां जवने ऽपि च। विश्व° जांत° १.॥ इह क्विबिति योगविभागाच्छेषः। प्रवर्षंत्यस्यां घना इत्यधिकरणे प्रावृट्। अजादिपाठादेकीयमतेन टाप्। प्रावृषा तु जलाप्लव इति कोशः॥ द्वारयते। द्वाः। द्वारौ। द्वारः॥ टुओश्वि। उदकेन श्वयति। उदश्विन्मथितं॥ ऋच स्तुतौ। ऋचंति स्तुवंत्यनयेत्यृग्वेदः॥

आप्नोतेर्ह्रस्वश्च ॥ ५८ ॥

आप्लृ व्याप्तौ॥ अतः क्विप् धातोर्ह्रस्वत्वं च। अप इति जसि दीर्घः।

आपः स्त्री भूम्नि। अम° १. २. ३. ३.। आपः। अद्भिः। अद्भ्यः। अपां। अप्सु। ऋक्पूरित्यादिना च समासांतः। पा° ५. ४. ७४.। बह्वपानि तडागानि सारसाः समुपासत इति विनीतकीर्तिः। समासांतानित्यत्वे च बह्वपि तडागानीति वृत्तिः। अह्य उत्तारक उदपः प्लवः। ऊदनोर्देशे। पा° ६. ३. ९८.। इति दीर्घनिर्देशादन्यत्रापि भवतीतीको ह्रस्वो ऽङ्यो गालवस्येत्यत्र भागवृत्तिः। आपस्शब्दो ऽप्यस्ति। तस्यायं प्रयोगः। आपोभिर्मार्जनं कृत्वेति। तथा च कोशः। कमलं सलिलं भुवनमुदकं पावनं नीरं वनवारी जीवनांब्वापः। सर्वमापोमयं जगदिति चंडी ॥

परौ व्रजेः षश्च पदांते ॥ ५९ ॥

व्रज गतौ ॥ अस्मात्परावुपपदे क्विप् दीर्घत्वं च। पदांते षत्वं। परिव्राट् भिक्षुः। परिव्राजौ। परिव्राजः ॥

हुवः श्लुवच्च ॥ ६० ॥

जुहोतेः क्विप्। दीर्घत्वं श्लुवादिवच्च कार्यं। ततो द्विर्वचनादिकं। जुहूः स्त्रियां स्रुग्भेद इत्यमरः ॥

स्रुवः कः ॥ ६१ ॥

स्रु गतौ ॥ अस्मात्कप्रत्ययः स्यात्। स्रुवो यज्ञोचितद्रव्यं ॥ बाहुलकात् ध्रु स्थैर्ये। अतो ऽपि कः। ध्रुव औत्तानपादिः स्यात्। ध्रुवमपाये ऽपादानं। पा° १. ४. २४. ॥

चिक्च ॥ ६२ ॥

स्रवतेरेव चिक् च स्यात्। इकार उच्चारणार्थः। ककारः कित्कार्यार्थः। कुत्वं। स्रुक्। स्रुचौ। स्रुचः। यज्ञोचितद्रव्यं ॥

तनोतेरनश्च वः ॥ ६३ ॥

तनोतेश्चिगनश्च वकारादेशः। त्वक्। त्वचौ। त्वचः। चर्मवल्कलयोः। चांत° १३.। इति विश्वः। त्वचशब्दो ऽकारांतो ऽप्यस्ति। त्वचवेष्टितमस्थिपंजरं यदि काममनुपेषितमिति प्रयोगः। त्वचं गृह्णाति त्वचयति। सत्यापपाशेति। पा° ३. १. २५.। णिच्। स्त्रियां त्वक् स्यात्त्वचं चोचमिति कोशः ॥

ग्लानुदिभ्यां डौः ॥ ६४ ॥

ग्लै हर्षक्षये। णुद प्रेरणे॥ आभ्यां डौः स्यात्। ग्लौश्चंद्रः॥ नौर्जलतरणद्रव्यं। नावा तरति। नाविकः कर्णधारः स्यात् ॥

च्विरव्ययं ॥ ६५ ॥

डौप्रत्ययश्च्व्यंतो ऽव्ययसंज्ञकः स्यात्। कृन्मेजंतः। पा° १. १. ३९.। इति सिद्धे नियमार्थं डौप्रत्ययांतश्च्व्यंत एवायं न केवलः। ऊर्यादिच्विडाचश्च। पा° १. ४. ६१.। इति निपातनत्वेनाव्ययत्वे सिद्धे सूत्रमिदमारभ्यते नियमार्थं। यद्युणादिषु व्युत्पन्नस्याव्ययत्वं भवति तदा च्व्यंतस्यैवेतरग्लौनौरैगोद्योशब्दानां केवलानां कृन्मेजंत इति नाव्ययत्वं ग्लौर्नौरित्यादिसमयानिकषाभुहुरेवतुमित्यादीनां तु चादिस्वरादिपाठसामर्थ्यादव्ययत्वं। अग्लौर्ग्लौः संपद्यते। अभूततद्भावे इत्यादिना। पा° ५. ४. ५०.। च्विप्रत्ययः। ग्लौकरोति। ग्लौभवति। ग्लौस्यात्। एवं नौभवतीत्यादि। अव्ययत्वात्सुपूलुक्। केवलस्य तु न भवति। ग्लौर्मौरिति ॥

रातेर्डैः ॥ ६६ ॥

रा दाने॥ अस्मात् डैः स्यात्। स च च्व्यंत एवाव्ययं। रायो हलि। पा° ७. २. ८५.। राः। रायः। रायो। रायः। राभ्यां। राभिः। रायमतिक्रांतानां ब्राह्मणकुलानामतिरापामिति। नामि। पा° ६. ४. ३.। इति दीर्घात्परत्वादात्वं। च्विप्रत्यये रैकरोतीति। रैशब्दः कनके धन इति धरणिः ॥

गमेर्डोः ॥ ६७ ॥

गच्छतेर्डोः स्यात् स च च्व्यंत एवायं। गोतो णित्। पा° ७. १. ९०.। गौः। गावौ। गावः। भूम्नि चेति कोशः। स्वर्गे वृषभे रश्मौ वज्रे चंद्रमसि स्मृतः। अर्जुनीनेत्रदिग्बाणभूवाग्वारिषु गोर्मता। गांत° १.। इति विश्वः। धवला गावश्चरंति। स्वर्गे रश्मौ च वज्रे च बलीवर्दे च गौः पुमान्। स्त्री बाणरोहिणीनेत्रदिग्वाग्भूव्वप्सु भूम्नि च। गोरिवायो गमनमस्येति गवयः पशुभेदः स्यात्। गौरादित्वाङ्गवयी। च्वौ च गोकरोतीत्यादि॥ बाहुलकात् द्युतेरपि डोः। द्योतंते देवा अस्यामिति द्यौः स्त्री स्वर्गांतरिक्षयोः। गोशब्दवद्रूपमस्य ॥

भ्रमेश्च डूः ॥ ६८ ॥

भ्रमतेश्च डूः स्यात्। भ्रूर्नेत्रयोरुपरि रेखा। शोभने भ्रुवौ यस्याः सा सुभ्रूः। संबोधने ऽम्बार्थनद्योर्ह्रस्वः। पा° ७. ३. १०७.। नेयङुवङ्स्थानावस्त्री। पा° १. ४. ४. ५.। इत्यतो वाग्रहणस्य सिंहावलोकितन्यायेनानुवृत्तस्य व्यवस्थितविभाषात्वान्न नदीसंज्ञाभावः। हा पितः क्वासि हे सुभ्रु बह्वेवं विललाप सः। ६. ११.। इति भट्टिः। विमानना सुभ्रु कुतः पितुर्गृहे। कु° सं° ५. ४३.। इति कालिदासः। भ्रुवोर्भंगो भ्रूभंगो भ्रुभंगो भ्रभंगश्चेति रूपत्रयं। भ्रुकुंसादीनामकारो वा। पा° ६. ३. ६१. ३.। इत्यकारह्रस्वौ। पक्षे दीर्घ एवावतिष्ठते। एतत्सर्वमिको ह्रस्व इत्यत्र भागवृत्तिः॥ चकारादग्रेरपि डूः। अग्रे गच्छतीत्यग्रेगूः सेवकः॥

दमेर्डोसिः ॥ ६९ ॥

दमु उपशमे॥ अतो डोसिः। डित्वाट्टिलोपः। दोर्बाहुः। दोषौ। दोषः। दोर्दंडेन शराः शरैररिशिरस्तेनापि भूमंडलमिति सुबंधुः। दोर्भ्यां चरति दौष्कः। दोष उपसंख्यानमिति ठक्। इणः षः। पा° ८. ३. ३९.। इति षत्वं॥

पणेरिज्यादेश्च वः ॥ ७० ॥

पणेरिजिः स्यादादेश्च वकारादेशः। पदांतकार्यं। वणिक् पण्यविक्रयी। वणिजौ। वणिजः। मरकत पतितो ऽसि पामरे वणिजि। स्वार्थे ऽणि नैगमो वाणिजो वणिगित्यमरः॥

वशः कित् ॥ ७१ ॥

वश कांतौ॥ अत इजिः कित्स्यात्। ग्रह्यादिसूत्रेण। पा° ६. १. १६.। संप्रसारणं। उशिगग्नौ घृते ऽपि च॥

भृजः उच्च ॥ ७२ ॥

भृजी भर्जने॥ अस्मादिजिः कित्स्यात्। धातोरुकारांतादेशः। भुरिक् स्याद्वसुंधरा। भुरिजौ। भुरिजः॥

त्रसिसह्योरुरिन् ॥ ७३ ॥

त्रसु मोक्षणे। षह मर्षणे॥ आभ्यामुरिन्। त्रसुरिर्वज्रं॥ सहुरिरादित्यः पृथिवी च॥

सुयुरुवृञो युच् ॥ ७४ ॥

षुञ् अभिषवे। यु मिश्रणे। रु शब्दे। वृञ् वरणे॥ एभ्यो युच्। सवनश्चंद्रमाः॥ यवनो म्लेच्छविशेषः॥ रवणः कोकिलः। रवणः शब्दनो नांदीवादी नांदीकरः समावित्यमरः॥ वरणो वरुणो वृक्षभेदश्च। टाप्। वरणा नदी॥

अशे रश च ॥ ७५ ॥

अशू व्याप्तौ॥ अस्मायुच् रशादेशश्च धातोः। रशना कांची। जिह्वावाची तु रसनाशब्दो दंत्यसकारवानेव। स्वादयतीति नंद्यादित्वात् ल्युः। पा° ३.१.१३५.। इति कलिंगः। रसना कांचिजिह्वयोरिति तु धरणिः। रस आस्वादने चौरादिकः। ततो नंद्यादित्वात् ल्युरिति धातुप्रदीपटीका कलिंगश्च। अजयकोशे कांच्यामपि दंत्यवान्। रसनं निस्वने स्वादे रसना कांचिजिह्वयोः। रादि° १२.। धरणिश्चैवं। एवं च रसनाशब्दोऽत्र कैश्चित् दंत्यवानिष्यते। व्यथितसिंधुमनीरशनैः शनैरमरलोकवधूजघनैः। किरा° ३.११.। इति भारविः॥

उन्देर्नलोपश्च ॥ ७६ ॥

उन्दी क्लेदने॥ अतो युच् नलोपश्च। ओदनोऽस्त्री भक्तं। अन्नेन व्यंजनं। दध्नोपसिक्त ओदनो दध्योदनः। पा° २.१.३४.॥

गमेर्गश्च ॥ ७७ ॥

गमेर्युच् स्यात् गकारश्चांतादेशः। गगनमाकाशं॥

बहुलमन्यत्रापि ॥ ७८ ॥

बहुलं युच् स्यात्॥ द्युत दीप्तौ। द्योतनो दीपकः॥ स्यंदनो रथः। स्यंदनं तु स्रुतौ नीरे। नांत° ७४.। इति विश्वः॥ नयनं लोचनं॥ चंदनोऽस्त्री मलयजे॥ रुच दीप्तौ। रोचना। गोपूर्वात् गारोचना गोपित्तसंभवं द्रव्यं। गोरोचना चंदनीयद्रव्यं॥ अस्यतेरसनः पीतसालः। प्रियविमानितमानवतीरुषां निरसनैरसनैरवृथार्थता। ६.४७.। इति माघः। वृंदावने तु विकसितकंदलदशनैर्घोषति दरीमुखैश्च कंदलदशनैरिति तालव्यवानपि। स चाश्नोतेः॥ अत सातत्यगमने राजपूर्वः। राजातनः क्षीरिकायां पियाले किंशुकेऽपि च।

नांत° १५२.। इति विश्वः ॥ श्रवणा नक्षत्रं। पुंस्यपि। शोभां समुन्नतिपूर्णां प्राप्य श्रवणायोगतः। तद्विच्छेदाद्गुणैर्हीनः शक्रो ऽपि निपतत्यधः। श्रावणी पौर्णमासी। एवमादयो ऽन्ये ऽपि द्रष्टव्याः ॥

रंजेः क्युन् ॥ ७९ ॥

रंजेः क्युन् ॥ रजनं कुसुंभं। गौरादित्वाद्रजनी हरिद्रा रात्रिश्च। ल्युटि प्रत्यये रंजनं। राज्ञा प्रकृतिरंजनात्। ४. १२.। इति रघुः ॥ बाहुलकात् कृपेरपि क्युन्प्रत्ययो लत्वाभावश्च। कृपे रो लः। पा° ८. २. १८.। इत्यत्र न्यासः। कृपणाः। कृपणेन समो दाता न कश्चिद्भुवि विद्यते। अस्पृशन्नेव वित्तानि यः परेभ्यः प्रयच्छतीति व्यासः ॥

भूसूधूभ्रस्जिभ्यश्छंदसि ॥ ८० ॥

एभ्यश्चतुर्भ्यश्छंदसि क्युन् भवति ॥ भुवनं लोकः। बहुलवचनाद्भाषायामपि प्रयुज्यते। शशिना च निशा निशया च शशी शशिना निशया च यथा गगनं। भवता च सभा सभया च भवान् भवता सभया च तथा भुवनमिति सर्वस्वं। विष्टपं भुवनं जगदित्यमरः। पात्रादित्वात्। पा° २. ४. १७. ४.। त्रिभुवनं त्रिजगती ॥ सुवन आदित्यः ॥ धुवनो वह्निः। निधुवनं सुरतक्रीडा ॥ संप्रसारणादिकार्यं। भृज्जनमंबरीषं ॥

कॄपॄवृजिमंदिनिधाञः क्युः ॥ ८१ ॥

कॄ विक्षेपे। पॄ पालनादौ। वृजी वर्जने। मदि स्तुत्यादौ। डुधाञ् निपूर्वः ॥ एभ्यः क्युः। इत्त्वरपरत्वे। किरणो रश्मिः ॥ उत्वं रपरत्वं च। पुरणः समुद्रः ॥ वृजनमंतरिक्षं ॥ मंदनं स्तोत्रं ॥ आतो लोपः। निधनं मरणं। बाहुलकात्केवलादपि क्युः। धनं द्रव्यमिति ॥

धृषेर्धिष च संज्ञायां ॥ ८२ ॥

ञिधृषा प्रागल्भ्ये ॥ अतः क्युर्धिषादेशश्च धातोः। धिषणो गुरुः। धिषणास्त्रिदशाचार्ये धिषणा धीश्च संमता। णांत° ४७.। इति विश्वः। धिषणा मनीषा ॥ संज्ञाधिकारे पुनः संज्ञाग्रहणं प्रायेणोणादीनां यौगिकत्वसूचनार्थं ॥

कृंतेर्घुरश्च ॥ ८३ ॥

घुरणः शब्दः ॥

वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च ॥ ८४ ॥

पृषदादयो ऽतिप्रत्ययांता निपात्यंते शतृवच्चैषां कार्यं भवति ॥ पृषु सेचने। गुणाभावः। नुमागमः। नपुंसकत्वात्सुलोपः। पृषन्मृगे च विंदौ च। पृषती। पृषंति। पृषंति विंदुपृषता इत्यमरः। स्त्रियां ङीप्। पृषती। स्थूलपृषतीमनड्वाहीमालभेतेति रुद्रमित्रः ॥ बृह वृद्धौ। बृहद्विपुलं। त्रिलिंगः। बृहती क्षुद्रवाताकी छंदोभेदो महत्यपीत्यनेकार्थे ऽमरः ॥ मह पूजायां। नुम्। सांतमहतः संयोगस्य। पा° ६.४.१०.। इति दीर्घः। महान्। पृथ्वादित्वान्महिमा। स्त्रियां ङीप्। महती। महती नारदवीणापि सा भवेत्सप्ततंत्रिका। अवेक्षमाणं महती मुहुर्मुहुः।१.१०.। इति माघः ॥ गमेर्जगादेशः। जगत्स्याद्विष्टपे क्लीबं वायौ ना जंगमे त्रिष्विति रुद्रकोशः। जगदाख्या स्मृता वाते विष्टपे जंगमे ऽपि च। जगती भुवने ख्याता छंदोभेदे जने ऽपि च। तांत° १४०.। इति विश्वः। अमरश्चानेकार्थवर्गे। जगती त्रिजगती ॥ वर्तमानग्रहणं भूते ऽपि दृश्यंत इति शंकानिरासार्थं प्रपंचार्थमित्युणादयो बहुलमित्यत्र न्यासः ॥

संश्चत्तृपद्वेहत् ॥ ८५ ॥

एते ऽतिप्रत्ययांता निपात्यंते ॥ संचिनोतेः सुट्। इकारलोपः। संश्चत्कुहकः। भृशादित्वात् क्यङ्। संश्चायते। संपूर्वात् श्चयतेः संश्चदिति सुभूतिचंद्रः ॥ तृप प्रीणने। तृपत् छत्रं ॥ विहंति गर्भमिति विपूर्वाद्धंतेष्टिलोपे वेरेकारादेशश्च। वेहद्गर्भोपघातिनी गौरिति न्यासः। वेहतौ। वेहतः। पोटायुवतीति। पा° २.१.६५.। समासः। गोवेहत् ॥ पृथग्योगकरणं शतृवत्कार्यनिवृत्त्यर्थं ॥

छंदस्यसानच् शुजृभ्यां ॥ ८६ ॥

शु गतौ। जॄ वयोहानौ ॥ आभ्यां छंदसि विषये ऽसानच्। शवसानः पंथाः ॥ जरसानः पुरुषः ॥ बाहुलकात् दॄ विदारणे। दरसानो घोत्वं ॥ तॄ प्लवनादौ। तरसानो नौका ॥ वृञ् वरणे। वरसानो दारिक इत्यन्ये ॥

ऋंजिवृधिमंदिसहिभ्यः कित् ॥ ८७ ॥

ऋजि भर्जने। वृधु वृद्धौ। मदि स्तुत्यादौ। षह मर्षणे ॥ एभ्यो ऽसानच् किद्भवति। ऋंजसानो मेघः। इदित्वादत्र नलोपाभावः ॥ वृधसानः पुरुषः ॥ मंदसानो ऽग्निर्जीवश्च ॥ सहसानो यज्ञो मयूरश्च ॥

अर्तेर्गुणः शुट् च ॥ ८८ ॥

ऋ गतौ ॥ अस्मादानच्। धातोर्गुणः प्रत्ययस्य शुडागमश्च। अर्शसानो ऽग्निः ॥

सम्यानच् स्तुवः ॥ ८९ ॥

ष्टुञ् स्तुतौ ॥ अतः सम्युपपद आनच् स्यात्। संस्तवानो भवेद्वाग्मी ॥

युधिबुधिदृशः किच्च ॥ ९० ॥

युध संप्रहारे। बुध बोधने। दृशिर् प्रेक्षणे॥ एभ्य आनच् किद्भवति। युधानो रिपुः॥ बुधान आचार्यः॥ दृशानो लोकपालकः॥ बाहुलकात् कृपेर्-प्यानच्। कृपे रो ल इत्यत्र रक्षितः। कृपाणः खड्गः। दृढतरनिबद्धमुष्टेः कोशनिषण्णस्य सहजमलिनस्य। कृपणस्य कृपाणस्य च केवलमाकारतो भेदः॥ रिपुरुधिरधुनीषु स्नातकस्तत्कृपाणः॥ पणेर्णिच्च। पाणाणः ॥

मुचियुधिभ्यां सन्वच्च ॥ ९१ ॥

मुमुचानः ॥ युयुधानः ॥

हुर्च्छेः सनो लुक् छलोपश्च ॥ ९२ ॥

हुर्च्छतेः सनंतादानच्। सनो लुक् छकारस्य च लोपः। जुहुराणश्चंद्रमाः॥

श्वितेर्दश्च ॥ ९३ ॥

श्वेततेः सनंतादानच् स्यात्। सनो लुक् तकारस्य च दकारः। किदित्यनुवृत्तेर्न गुणः। शिश्विदानः पापकर्मेति विशेष्यनिघ्नो ऽमरः ॥

तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ ॥ ९४ ॥

शंसिप्रभृतिभ्यः क्षदिप्रभृतिभ्यश्च यथाक्रमं तृन्तृचौ स्यातां। तौ चानिटौ संज्ञायां विषये॥ शंसु स्तुतौ। शंस्ता स्तोता। अप्त्रादिसूत्रे नप्तृप्रभृतिपाठात्तृन्तृचोरौणादिकयोर्ग्रहणं। तेनात्र न दीर्घः। शंस्तारौ। शंस्तारः॥ शास्ति विनयति सत्त्वान्। शास्ता बुद्धः। शास्तारौ॥ प्रशास्ता राजा। प्रशास्तारौ। प्रशास्तारः॥ क्षद संवृताविति सौत्रो धातुः। क्षत्ता। क्षत्ता स्यात्सारथौ द्वाःस्थे वैश्यायामपि शूद्रज इति नाममाला॥ क्षुदिर्। क्षोत्ता मुसलः॥ णीञ् उत्पूर्वः। उन्नेता ऋत्विक्। एवमन्ये ऽपि ॥

बहुलमन्यत्रापि ॥ ९५ ॥

अन्यत्रापि बहुलं तृन्तृचौ स्यातां ॥ मन ज्ञाने । मंता विद्वान् ॥ हन । हंता चोरः ॥ दिश । उपदेष्टा गुरुः ॥ धाञ् । धाता प्रजापतिः । प्रपंचार्थमिदं पूर्वेणैव सिद्धत्वात् ॥

नप्तृनेष्टृत्वष्टृहोतृपोतृभ्रातृजामातृमातृपितृदुहितृ ॥ ९६ ॥

नप्त्रादयो दश तृन्तृजंता निपात्यंते ॥ पत्लृ गतौ । न पतंत्यनेनेति नञः प्रकृतिभावः । अच्छब्दलोपः । नप्ता पौत्रो दौहित्रश्च । नप्तुः पुत्रः प्रनप्ता स्यात् । स्त्रियामृन्नेभ्यो ङीप् । नप्त्री पौत्री सुतात्मजा । स्त्रियामपि स्वस्रादिपाठात् नप्तेति क्व चित् ॥ नयतेः षुक् । नेष्टा ऋत्विक् ॥ त्विषि दीप्तौ । इतो ऽत्वं । त्वष्टा सूर्यः ॥ हु दाने । होता यजमानः ॥ पुनातेः पोता विष्णुः ॥ भ्राजतेर्जकारलोपः । भ्राता सहजः । सुभ्राता । युवादित्वात् । सौभ्रात्रमेषां हि कुलानुसारि । १६. १. । इति रघुः ॥ जायां माति मिनोति मार्जयति वा । जामाता दुहितुः पतिः ॥ मान पूजायां । नलोपः । माता जननी । स्वस्रादित्वान्न टाप् । अभ्यर्हितत्वात् । पा° २. २. ३४. ३. । मातापितरौ । मातुर्मातरश्च पितरीत्यात्वं । सहस्रेण पितुर्माता गौरवेणातिरिच्यते । गर्भधारणपोषणाभ्यां तेन माता गरीयसीति स्मृतिः ॥ पा रक्षणे । आकारस्येत्वं । पातीति पिता । तातस्तु जनकः पिता । अम° २. ६. १. २८. । अर्थदाता भयत्राता यश्च कन्यां प्रयच्छति । जनयिता चोपनेता पंचैते पितरः स्मृताः ॥ दुहेरिडागमः । गुणाभावः । दुहिता सुता । विदादित्वादञि दौहित्रः ॥

सुञ्यसेर्ऋन् ॥ ९७ ॥

असु क्षेपणे ॥ अतः सुञ्युपपद ऋन् यणादेशश्च । स्वसा भगिनी । स्वसुश्छः । पा° ४. १. १४३. । स्वस्रीयो भागिनेयः ॥

यतेर्वृद्धिश्च ॥ ९८ ॥

यती प्रयत्ने ॥ अस्मादृन् धातोर्वृद्धिश्च । याता । भार्यास्तु भ्रातृवर्गस्य यातरः स्युः परस्परमित्यमरः । यतेः पूर्वेणैव सिद्धे वचनं वैचित्र्यार्थं ॥

नञि च नंदेः ॥ ९९ ॥

नंदतेर्नञ्युपपद ऋन् धातोर्वृद्धिश्च । न नंदति न तुष्यति । ननांदा ।

स्वस्रादिनिपातनान्नञो नलोपाभावः। के चिदिह वृद्धिं नानुवर्तयंतीति चंद्रः। तेषां वृद्ध्यभावे ननंदा। तथा च शब्दार्णवः। ननांदा च स्वसा पत्युर्ननंदा नंदिनी च सा। शासि ननांदृः ॥

दिवेर्ऋः ॥ १०० ॥

दीव्यतेर्ऋः स्यात्। अनङादिकार्यं। देवा देवरको मतः ॥

नयतेर्डिच्च ॥ १०१ ॥

नयतेर्ऋप्रत्ययो भवति डित्। डित्वाट्टिलोपः। ना। नरौ। नरः। शार्ङ्गरवादिषु नृनरयोर्वृद्धिश्चेति पाठात् नारी सीमंतिनी वधूः। अम° २.६.१.२.॥

सव्ये स्थश्छंदसि ॥ १०२ ॥

तिष्ठतेः सव्य उपपदे छंदस्यृः स्यात्स च डित्। तत्पुरुषे कृति। पा° ६.३.१४.। इति सप्तम्या अलुक्। स्थास्थिन्स्थृनां। पा° ८.३.९७.१.। इति षत्वं। सव्येष्ठा सारथिः ॥

अर्तिसृधृधम्यश्यवितृभ्यो ऽनिः ॥ १०३ ॥

ऋ सृ गतौ। धृञ् धारणे। धमिः सौत्रः। अम गतौ। अश भोजने। अव रक्षणे। तॄ प्लवनतरणयोः ॥ एभ्यो ऽष्टभ्यो ऽनिः स्यात्। अरणिः स्यात् द्वयोर्मथ्यदारुण्यग्निसमिंधन इत्यमरः ॥ सरणिः पंथाः। शारणिः पथि चामर इत्यजयः। तालव्यदंत्यभेदेन द्विविधः। एवं च शॄ हिंसायमिति के चित्पठंति॥ सर्तेपर्यंतादपि बहुलवचनादनिः। कृदिकारादिति ङीष्। सारणीषु परमंशु शोभत इति चंद्रः॥ धरणिः क्षितिः॥ धमनिः सिरा ॥ अमनिर्गतिः॥ अश्यते भुज्यते राज्यमिंद्रेणानयेत्यशनिर्वज्रं ॥ अवनिर्मही। हिनु मीनानि। पा° ८.४.१५—१६.। इत्यत्रास्यापि ग्रहणात् णत्वं भवति। प्रावणिरित्ति॥ तरणिः सूर्यनौकयोः। तरणिस्तरणो भानौ कुमार्योषधिभेदयोः। णांत° ७३.। इति विश्वः। स्त्रियां नौस्तरणिस्तरिरित्यमरः। वैपूर्वादैतरणिः प्रेतनदी॥ बाहुलकात् रंज रागे। अतो ऽप्यनिः। नलोपः। रजनियामिनी। आवर्तमाना ददृशे दिवापि रजनाविवेत्यभिनंदः। कृदिकारादिति ङीष्। रजनी नीलिकादारुहरिद्रायामिनीषु च। नांत° १२७.। इति विश्वः॥ तथा दृणातेरप्यनिः। दरणिर्द्वयोरिति शब्दार्णवः ॥

आङि शुषेः सनश्छंदसि ॥ १०४ ॥

शुष्यतेः सन्नंतादाङ्युपपदे छंदस्यनिः। हलंताच्च। पा० १.२.१०.। इति किन्त्वादिकार्यं। आशुशुक्षणिरग्निर्वातश्च ॥

कृषेरादेश्च धः ॥ १०५ ॥

कृष विलेखने ॥ अस्मादनिरादेर्धकारादेशश्च। धर्षणिर्बंधकी। कृदिकारादिति ङीष्। धर्षणी। धृषेरनिप्रत्ययेन सिद्धे वैचित्र्यार्थं ॥

अदेर्मुट् च ॥ १०६ ॥

अदेरनिस्तस्य मुडागमश्च। अद्मनिर्वह्निः ॥

वृतेश्च ॥ १०७ ॥

वर्ततेरनिः। वर्तनिः पंथाः। कृदिकारादिति ङीष्। वर्तन्येकपदीति चेत्यमरः ॥ चकारान्मुडागमो ऽप्यत्रेति के चित्। वर्त्मनिरिति गोवर्धनः ॥

क्षिपेः किच्च ॥ १०८ ॥

क्षिपतेरनिः किद्भवति। क्षिपणिरायुधं ॥

अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः ॥ १०९ ॥

अर्च पूजायां। शुच शोके। हु दाने। सृप्लृ गतौ। छद अपवारणे पर्यंतः। छर्द वमने ॥ एभ्यः षड्भ्य इसिः स्यात्। अर्चिर्ज्वाला। ज्वालाभासोर्न पुंस्यर्चिरित्यमरः। नयनमिव सनिद्रं घूर्णते दैपमर्चिः। ११. १८.। इति माघः। इदंतो ऽप्यर्चिशब्दः। तथा च रूपरत्नाकरः। रत्ननिधमनिकालान्यर्चिं तुंडिः पुरंध्रिरिति॥ शोचिर्दीप्तिः। रोचिः शोचिरुभे क्लीब इत्यमरः॥ हविर्हवनीयं ॥ सर्पिर्घृतं॥ इस्मन्त्रन्क्विषु च। पा० ६.४.९७.। इति ह्रस्वत्वं। छदिः पटलं। अथ पटलं छदिरित्यमरः। छदिषे हितानि। छदिरुपधिबलेर्ढञ्। पा० ५.१.१३.। छादिषेयाणि तृणानि ॥ छर्दिर्वमनव्याधिः। इदंतो ऽपि छर्दिशब्दः। विषपुरीषछर्द्यनुसरणामरक्तपलाशकृच्छ्राणि। मंदिरं सक्थि च नपुंसकं। ७९.। इति वररुचिलिंगकारिका। छर्द्यतीसारशूलवानिति चिकित्साशास्त्रं। छर्दौ चरं भारसर इति गोवैद्यकं॥ बाहुलकादवतेरप्याङ्पूर्वादिसिः। आविः प्राकाश्ये। ऊर्यादित्वाद्गतिसंज्ञा। आविःकृतमाविष्कारः। वाह-

पीमद्विशंकमयाविश्चक्षुषो ऽभवद्साविव रागः। १०.९९.। इति माघे व्यवहितप्रयोगः प्रमादज इति भागवृत्तिः। उपसर्गप्रतिरूपकत्वात्समाधानीय इत्युपाध्यायसर्वस्वं ॥

वृंहेर्नलोपश्च ॥ ११० ॥

वृहि वृद्धौ॥ अस्मादिसिः। नकारस्य लोपः। वर्हिर्ना कुशशुष्मयोरिति कोशः। वर्हिषां चोपनेत्री। कु॰ सं॰ १. ६१.। इति कालिदासः ॥

द्युतेरिसिन्नादेश्च जः ॥ १११ ॥

द्युत दीप्तौ॥ अस्मादिसिन् स्यादादेर्जकारादेशश्च। ज्योतिर्ना भास्करे ऽग्नौ च क्लीवं भद्योतदृष्टिष्विति रुद्रकोशः। ज्योतिरधिकृत्य कृतो ग्रंथ इत्यधिकृत्य कृते ग्रंथे। पा॰ ४.३.८७.। इत्यण्। संज्ञापूर्वको विधिरनित्य इति वृद्ध्यभावः। ज्योतिषं गणितशास्त्रमिति सुभूतिः। तदधीते तद्वेद। पा॰ ४.२.५९—६०.। इत्यत्रार्थ उक्थादिपाठात् ठक्। ज्योतिषिको गणकः ॥

वसौ रुचेः संज्ञायां ॥ ११२ ॥

रोचतेर्वसुपूर्वात्संज्ञायामिसिन्। वसुरोचिर्यज्ञः॥ बाहुलकात्केवलादपि रुचेरिसिन्। रोचिर्ज्वालेति धातुप्रदीपिका ॥

भुवः कित् ॥ ११३ ॥

भवतेरिसिन्प्रत्ययः स्यात् स च कित्। भुविः समुद्रः ॥

सहेर्धश्च ॥ ११४ ॥

सहतेरिसिन् धकारश्चांतादेशः। सधिरनड्वान् ॥

पिवतेस्थुक्च ॥ ११५ ॥

पिवतेरिसिन् थुगागमश्च धातोः। पाथिश्चक्षुःसमुद्रयोः ॥

जनेरुसिः ॥ ११६ ॥

जनी प्रादुर्भावे॥ अस्मादुसिः स्यात्। जनुर्जननं॥ पचिवचीत्यत्र न्यासकृता बाहुलकान्मनेरप्युसिः प्रत्ययो दर्शितः। मनुस्। नभोंगिरोमनुषां वत्युपसंख्यानं। पा॰ १.४.१८.२.। इति मनुष्वत् ॥

मनेर्धश्छंदसि ॥ ११७ ॥

मन्यतेश्छंदस्युसिः स्यात् धकारश्चांतादेशः । मधुः पवित्रद्रव्यं ॥

अर्त्तिपॄवपियजितनिधनितपिभ्यो नित् ॥ ११८ ॥

ऋ गतौ । पॄ पालनपूरणयोः । टुवप बीजतंतुसंताने । यज देवपूजादौ । तनु विस्तारे । धन धान्ये । तप संतापे ॥ एभ्यः सप्तभ्य उसिर्नित्स्यात् । अरुरा-दित्यो व्रणश्च । विध्यत्यरुस्तुद इत्यरुंतुदः ॥ परुर्ग्रंथिः । ग्रंथिर्ना पर्वपरुषी इत्यमरः ॥ वपुः शरीरं । वपुर्भव्याकृतौ देहे । सांत° ३३. । इति विश्वः ॥ यजुर्वेदः ॥ तनुः शरीरं । वपुषे तनुषे ऽनंगमिति सुबंधुः ॥ धनुः शरासनं । धनुः पिया-लद्रुमे राशिभेदे शरासने चापि धनुर्भवेत् । सांत° ४१. । इति विश्वः । धनु-रस्त्रियामित्यमरः । धनुषी । धनुषः । एवं च धनुर्वंशविशुद्धो ऽपि निर्गुणः किं करिष्यतीति सकारांतेनापि संगच्छते । तदस्य प्रहरणमस्य । पा° ४. ४. ५७. । इति ठक् । धानुष्कः ॥ तपुः सूर्याग्निशत्रुषु ॥ बाहुलकाददेरप्युसिप्रत्ययः । प्रादुः प्राकाश्ये । प्रादुष्यं विदुः प्रादुर्भावं ॥

एतेर्णिच्च ॥ ११९ ॥

इण् गतौ । अस्मादुसिः स्यात्स च णित् । आयुर्जीवनं । आयुषी । आ-यूंषि । जटापूर्वात् जटायुः पक्षिराजः । संपातिर्वाहुणिः स्यातो जटायुश्च जटा-युषीति शब्दार्णवः । स्वर्गादित्वाद्यत् । आयुष्यं तरते पत्युरिति स्मृतिः । अच-तुरत्यच् । पा° ५. ४. ७७. । पुरुषायुषं । पुरुषायुषजीविन्यो निरातंका निरीतयः । १. ६३. । इति रघुः ॥

चक्षेः शिच्च ॥ १२० ॥

चक्षिङ् ॥ अस्मादुसिः स्यात् स च शिद्भवति । शित्त्वात्सार्वधातुकत्वा-त्ख्याञादेशाभावः । चष्टे रूपमनुभवंत्यनेनेति चक्षुर्नयनं । शेष इति लक्षणं चाधिकारश्चेति । चक्षुषा गृह्यते रूपमिति शेषे । पा° ४. २. ९२. । इत्यत्र सूत्रे वृत्तिः ॥

मुहेः किच्च ॥ १२१ ॥

मुह वैचित्ये ॥ अस्मादुसिः कित् । मुहुः पुनःपुनः । अव्ययं । पुंमुहुसोः प्रतिषेधो वक्तव्यः । पा° ८. ३. ४१. १. । इति षत्वाभावः । मुहुस्कामा ॥

बहुलमन्यत्रापि ॥ १२२ ॥

अन्यत्रापि बहुलमुसिः स्यात् स च ञिद्वति । आचक्षुः । परिचक्षुः ॥ बहुलवचनात् ल्युट् । विचक्षणः पंडितः ॥

कॄगॄशॄवृचतिभ्यः ष्वरच् ॥ १२३ ॥

कॄ विक्षेपे । गॄ निगरणे । शॄ हिंसायां । वृञ् वरणे । चते याचने ॥ एभ्यः पञ्चभ्यः ष्वरच् । कर्वरो व्याघ्ररक्षसोः । निशायामपि कर्वरी । रांत° ६१.१ इति विश्वः । षित्वात् ङीष् । कर्वरी व्याघ्री राक्षसी च ॥ गर्वरो ऽहंकारः । तद्योगात् गर्वरो नायकः ॥ शर्वरी रात्रिः । अपि शार्वरो ऽधतमसे घातके ऽन्यवत् । विश्व° रांत° १६६.। इति ॥ वर्वरः प्राकृतो जनः । अर्वरी नदीचरेत्यपि दृश्यते ॥ चत्वरमंगणं व्याप्तं स्थंडिलेष्वपि च दृश्यते ॥

नौ सदेः ॥ १२४ ॥

निपूर्वात्सीदतेः ष्वरच् ॥ सदिरप्रतेरिति षत्वं । निषद्वरस्तु जंबालः । अम° १.२.३.१०। निषद्वरी रात्रिः ॥

॥ इति महोपध्यायज्ञातलीत्परनामधेयश्रीमदुज्ज्वलदत्तविरचितायामुणादिवृत्तौ द्वितीयः पादः ॥ २ ॥

छित्वरच्छत्वरधीवरपीवरमीवरचीवरतीवरनीवरगह्वरकट्वरसंयद्वराः ॥ १ ॥

छित्वरादय एकादश शब्दाः ष्वरच्प्रत्ययांता निपात्यंते ॥ छिदिर् द्वैधीकरणे। तकारो ऽंतादेशः। गुणाभावः। छित्वरो धूर्तः। छित्वरं छेदनद्रव्ये छित्वरो धूर्तवैरिणोः। रांत° १५७.। इति विश्वः॥ छद अपवारणे। छदते ऽपवारयतीति छत्वरो गृहकुंजयोः॥ डुधाञ्। पा पाने। मा माने। एषामीत्वमंत्यस्य। धीवरः कैवर्तः। धीवरी मत्स्यघातिनीति कोशः॥ पीवरः स्थूलः॥ मीवरो हिंसकः॥ चिनोतेर्दीर्घत्वं। चीवरं भिक्षुकप्रावरणं॥ तीरयतेर्गुणाभावो रेफलोपश्च। तीवरो जातिविशेषः स्यात्॥ नयतेर्गुणाभावः। नीवरः परिव्राट्॥ गाहू विलोडने। ह्रस्वत्वं। गह्वरं गहनं॥ कट वर्षादौ। कट्वरं व्यंजनं॥ यमेर्दकारांतादेशः। संयद्वरो नृपः। पदेः संपद्वर इति पुरुषोत्तमदेवः॥ बाहुलकात् हु दान उपपूर्वः। उकारलोपः। उपह्वरो रथः॥ स्त्रियां छित्वरीत्यादि बोद्धव्यं॥

इणषिञ्जिदीङुष्यविभ्यो नक् ॥ २ ॥

इण् गतौ। षिञ् बंधने। जि जये। दीङ् क्षये। उष दाहे। अव रक्षणे॥ एभ्यो नक् स्यात्। इनो राज्ञि प्रभौ सूर्ये। इनः सूर्ये नृपे पत्यौ। नांत° १.। इति विश्वः। सह इनेन वर्तत इति सेना। सेनयाभियात्यभिषेणयति॥ सिनः कणः॥ जिनो बुद्धः। जिनः स्यादतिवृद्धे ऽपि बुद्धे चार्हति जित्वरे। विश्व° नांत° १.॥ दीनो दुर्गतः॥ उष्णमीषत्तप्तं॥ ज्वरत्वरेत्यूठ्। ऊनमसंपूर्णं। सर्वस्वे तु ऊनयतेरूनमिति साधितं॥

फेनमीनौ ॥ ३ ॥

एतौ निपात्येते। स्फायतेः फेशब्दादेशः। स्फायतेः फेनो डिंडीरः। फेनः सलिलविकारः। फेनायते नदी॥ मीञ् हिंसायां। मीनो राश्यंतरे मत्स्ये। विश्व° नांत° १०.॥

कृषेर्वर्णे ॥ ४ ॥

कृषतेर्वर्णे वाच्ये नक्। कृष्णो नीलो हरिः कृष्णा पिप्पली द्रौपदी तथा। वाच्यवन्मेचके कृष्णो भवेत्कृष्णोऽर्जुने हरौ ॥ व्यासकोकिलयोर्ध्वाङ्क्षे कृष्णं मरिचलोहयोः। कृष्णा तु द्रौपदीनीलीहारहूरासु दृश्यते। णांत° ११. इति विश्वः। कार्ष्णिः। इञ् बाह्वादित्वात्॥ घृ सेचने। बाहुलकादतोऽपि भवति। टाप्। घृणोति धातुप्रदीपटीका ॥

बंधेर्ब्रधिबुधी च ॥ ५ ॥

बंध बंधने। अतो नक्। ब्रध बुध इत्येतावादेशौ स्तः। ब्रध्नो भास्करः॥ बुध्नो मूलं। बुध्नः शिफायां रुद्रे च। नांत° १३.। इति विश्वः। अवाप्यबुध्नाग्रनितंबभागा इति भारविः ॥

धापॄवस्यज्यतिभ्यो नः ॥ ६ ॥

डुधाञ्। पॄ पालनादौ। वस निवासे। अज गतौ। अत सातत्यगमने॥ एभ्यो नः। धाना भृष्टयवे स्त्रिय इत्यमरः॥ पर्णं पत्रं। सुपर्णः पन्नगाशनः। पर्णः स्यात्किंशुके पत्र इत्यमरः। सिध्मादित्वात्पर्णलः। पिच्छादित्वात्पर्णिलः॥ वस्नो मूल्यमवक्रय इत्यमरः। वस्नो मूल्ये वेतने स्यात्। नांत° १२.। इति विश्वः। वस्नक्रयविक्रयाट्ठन्। पा° ४.४.१३.। वस्निकः। तद्धरति वहत्यावहतीत्यधिकृत्य वस्नद्रव्याभ्यां ठन्कनौ। पा° ५.१.५१.। वस्निकः। आर्हीयठगधिकारे सोऽस्यांशवस्नभृतयः। पा° ५.१.५६.। माहिषः॥ अजेर्वीभावः। वेनः प्रजापतिः। तस्यापत्यं वेनाच्छंदसीति कुर्वादिपाठात् ण्यः। वैन्यः पृथुः। वेनस्यापत्यं वैन्यः पृथुरिति विष्णुपुराणं॥ अत्न आदित्यः॥ श्रु श्रवणे। बाहुलकादतोऽपि नः। श्रोणः पंगुरित्यमरटीका ॥

लक्षेरुट् ॥ ७ ॥

लक्षेश्चुरादिण्यंतान्नः स्यात्तस्याउडागमश्च। लक्षणं चिह्नं। तत्र भवं। लाक्षणिकं। लक्षणं नाम्नि चिह्ने च सौमित्रे चापि लक्षणः। विश्व° णांत° ४३.। लक्षणा सारसी। महापुरुषमिव प्रकटमीनमकरशंखलक्षणा इति कादंबरीप्रयोगः। चकारान्मुडागमः। लक्ष्मणं नाम्नि चिह्ने च रामभ्रातरि लक्ष्मणः। लक्ष्मणा हंसयोषायां सारस्यां चैव लक्ष्मणा। लक्षेर्युटि साधनं परमते ॥

वनेरिच्चोपधायाः ॥ ८ ॥

वन संभक्तौ ॥ अस्मान्नः स्यात् । उपधाया इत्वं । वेन्ना नदी ॥

सिवेष्टेर्यू च ॥ ९ ॥

सीव्यतेर्नः स्यात् । टिभागस्य यूआदेशः । सामर्थ्याद्गुणः । स्यून आदित्यः ॥ बाहुलकात्केवलो ऽपि नप्रत्यय ऊआदेशो गुणः स्यात् । स्योन इति । च्छ्वोः शूडनुनासिके च । पा° ६.४.१९. । इत्यत्र वृत्तिः ॥

कृवृजृषिद्रुपन्यनिस्वपिभ्यो नित् ॥ १० ॥

कृ विक्षेपे । वृ वरणे । जॄ वयोहानौ । षिञ् बंधने । द्रु गतौ । पन स्तुतौ । अन प्राणने । ञिष्वप शये ॥ एभ्यो ऽष्टधातुभ्यो नो निद्भवति । कर्णः श्रोत्रं क्षत्रियविशेषश्च । कर्णः पृथासुते ज्येष्ठे सुवर्णालौ श्रुतावपि । विश्व° णांत° १४. । कर्णललाटात् । पा° ४.३.६५. । इति कन् । कर्णिका तालपत्रं स्यात् । अम° २.६.३.५. ॥ वर्णो ब्राह्मणादिः । वर्णो द्विजादौ शुक्लादौ स्तुतौ रूपयशोक्षरे । विश्व° णांत° १५. । शुक्लादिश्च ॥ जर्णश्चंद्रः । जर्णश्चंद्रे च वृद्धे चेति विश्वः ॥ सेना वाहिनी । हस्त्यादिसाधनं । सह इनेन वर्तत इति व्युत्पत्तौ प्रपंचार्थं ॥ द्रोणो मानविशेषश्च काको ऽर्जुनगुरुस्तथा । द्रोणः कृपीपतौ कृष्णकाके स्यादाढके ऽपि च । विश्व° णांत° ९. । गौरादित्वात् ङीष् । द्रोणी जलसेचनी । द्रोणी काष्ठांबुवाहिन्यां गवां घासभुजिस्थितौ । णांत° १०. । इति विश्वः ॥ पन्नो नीचैर्गतिः । पन्नगः सर्पः ॥ अन्नमोदनः । अदेर्निष्ठायामन्न इति निर्देशादन्नमित्यदो जग्धिः । पा° २.४.३६. । इति सूत्र एवं चानिग्रहणं प्रपंचार्थमिति ॥ स्वप्नो निद्रा । स्वपेरपि स्वपो नन् । पा° ३.३.९१. । इति सिद्धत्वात्प्रपंचार्थः । अथवानेन वर्तमानकालार्थः स्वपेश्चाभावार्थः ॥

धेट इच्च ॥ ११ ॥

धेटो नः स्यादिकारश्चांतादेशः । धेनः सिंधुर्नदी धेना ॥

तृषिशुषिरसिभ्यः कित् ॥ १२ ॥

ञितृष पिपासायां । शुष शोषणे । रस शब्दे ॥ एभ्यो नः कित्स्यात् । तृष्णा लिप्सापिपासयोः । णांत° २२. । इति विश्वः ॥ शुष्णः सूर्यो वह्निश्च ॥ रस्नं द्रव्यं ॥

सुञो दीर्घश्च ॥ १३ ॥

सुनोतेर्नः स्याद्धातोर्दीर्घश्च । सूना जंतुवधस्थानं । सूना च गलशुंडिकेति नांत ऽमरः ॥

रमेस्त च ॥ १४ ॥

रमेर्ण्यंतान्नप्रत्ययः स्यात्तकारश्चांतादेशः । रमयति हर्षयतीति । रत्नं स्वजातिश्रेष्ठे ऽपि रत्नं माणिक्यमिष्यते । न रत्नमन्विष्यति मृग्यते हि तत् ॥ जातौ जातौ यदुत्कृष्टं तद्धि रत्नं प्रचक्षते । अश्वरत्नं । गजरत्नं । स्त्रीरत्नं दुष्कुलादपि । चाणाक्यशतकं १६. ॥

रास्नासास्नास्थूणावीणाः ॥ १५ ॥

एते नप्रत्ययांता निपात्यंते ॥ रसतेरुपधाया दीर्घः । रास्ना गंधद्रव्यं ॥ षस स्वप्ने । पूर्ववत् दीर्घः । सास्ना गोगलकंबलः ॥ तिष्ठतेरूत्वं प्रत्ययस्य च णत्वं । स्थूणा गृहस्तंभः ॥ वी गतौ । गुणाभावो णत्वं च । वीणा वल्लकी । सत्यापपाशेति णिच् । वीणयोपगायति । उपवीणयति ॥

गादाभ्यामिष्णुच् ॥ १६ ॥

गै शब्दे । डुदाञ् ॥ आभ्यामिष्णुच् । आद्गुणः । गेष्णुर्गायनः । देष्णुर्दाता । सुदेष्णुर्विराभार्या ॥ एष्णुगयं प्रत्यय इति का चिद्वृत्तिः । तदाप्यातो लोपे तदेव रूपं । स्वरे तु विशेषः ॥

कृत्यशूभ्यां क्स्नः ॥ १७ ॥

कृती वेष्टने । अशूङ् व्याप्तौ ॥ आभ्यां क्स्नः स्यात् । कृत्स्नं निरवशेषं त्रिषु ॥ अक्ष्णामखंडं । व्रश्चभ्रस्जेत्यादिना । पा° ८.२.३६. । षत्वं ॥

तिजेर्दीर्घश्च ॥ १८ ॥

तिज निशाने ॥ अतः क्स्नो दीर्घत्वं च धातोः । कुत्वादिकार्यं । तीक्ष्णं तिग्मलोहयोः । तीक्ष्णं सामुद्रलवणे तीक्ष्णः स्यात्तीव्रपूरुषे । तीक्ष्णं क्षारे च तिग्मात्मत्यागिनोर्वाच्यवत् । णांत° १३. । इति विश्वः ॥

श्लिषेरच्चोपधायाः ॥ १९ ॥

श्लिष आलिंगने ॥ अतः क्स्नो ऽकारश्चोपधायाः । श्लक्ष्णं सुकुमारं त्रिषु । मुंडमिश्रेति । पा° ३.१.२१. । णिच् । श्लक्ष्णयति ॥

यजिमनिशुंधिदसिजनिभ्यो युच् ॥ २० ॥

यज देवपूजादौ। मन ज्ञाने। शुंध शुद्धौ। दसु उपक्षये। जनी प्रादुर्भावे ॥ एभ्यो युच् स्यात्। यज्युरध्वर्युः ॥ मन्युः शोकः ॥ शुंध्युरग्निः ॥ दस्युस्तस्करः ॥ जन्युः शरीरी ॥ निरनुनासिकत्वादनादेशो न भवति ॥

भुजिमृङ्भ्यां युक्त्युकौ ॥ २१ ॥

भुज। मृङ् ॥ आभ्यां यथाक्रमं युक्त्युकौ। भुज्युर्भाजनं ॥ मृत्युः स्त्रीपुंसयोरंते। मृत्युर्मरणादैवयोः। यांत° १२.। इति विश्वः। कंदर्पो दर्पकः कामः शिखो मृत्युजरान्वित इति कोशांतरं ॥

सर्तेरयुः ॥ २२ ॥

सृ गतौ ॥ अस्मादयुः स्यात्। सरयुर्नदी। तनुर्धेनुरुरु चंचुः प्रियंगुः सरयुः कुडुरिति वाचस्पतिकोशः। ऊङुतः। पा° ४. १. ६६.। इत्यूङि सरितः सरयूशिप्रासरस्वतीचंद्रभागाद्या इति गोपालितः। चक्रे त्रिदिवनिःश्रेणी सरयूरनुयायिनां। १५. १००.। इति रघुः। सर्तेरयूरिति पारायणे दृश्यते ॥

पानीविषिभ्यः पः ॥ २३ ॥

पा रक्षणे। णीञ् प्रापणे। विष्लृ व्याप्तौ ॥ एभ्यः पः स्यात्। पांति रक्षंत्यस्मादात्मानमिति पापं किल्बिषं। तद्योगात्पापः पुरुषः ॥ नेपः पुरोहितः। बाहुलकाद्गुणाभावे नीपं दृष्ट्वा हरितकपिशं। मेघ° २१.। इति कालिदासः। नीपो धूलीकदंबे स्यान्नीलाशोके च बंधुनि। पांत° ५.। इति विश्वः। कृपणा इव नवनीपकोपशोभितः ॥ वेष्पः पानीयं ॥

च्युवः किच्च ॥ २४ ॥

च्युङ् गतौ ॥ अस्मात्पः कित्स्यात्। च्यवंते भाषंते ऽनेनेति च्युपो वक्त्रं। च्यवतिरत्र भाषणे ॥

स्तुवो दीर्घश्च ॥ २५ ॥

ष्टुञ् स्तुतौ ॥ अतः पो धातोर्दीर्घश्च। स्तूपो भूमिसमुच्छ्रायश्चैत्यं च ॥ एतत्सूत्रं सतीवृत्तौ न दृश्यते। सर्वस्वे तु ष्टुप स[मुच्छ्राय] इत्यस्मात् घञि स्तूप इति साधितं। अतो ऽनार्षमिदमिति लक्ष्यते ॥

षुशृभ्यां निच्च ॥ २६ ॥

षुञ् अभिषवे । शॄ हिंसायां ॥ आभ्यां पः स्यात्स च निद्भवति । कि-दित्यनुवृत्तेश्च कित् धातोर्दीर्घत्वं च । सूपो व्यंजनभेदे स्यात्सूपकारे ऽपि कीर्तितः । पांत° ३. । इति विश्वः ॥ बहुलवचनादुत्वं रपरत्वं च । हलि च । पा° ८. २. ७७. । इति दीर्घत्वं । शूर्पमस्त्री प्रस्फोटने मानविशेषे ऽपीत्यमरः ॥

कुयुभ्यां च ॥ २७ ॥

कु शब्दे । यु मिश्रणे ॥ आभ्यां पः स च किद्भवति धातोर्दीर्घत्वं च । कुर्वंति तृप्ता मंडूका अस्मिन्निति कूपमुदकपानं । पात्रेसंमितादित्वात्कूपमंडूकः ॥ यूपो यज्ञस्तंभः । बहुव्रीहौ प्रकृत्या पूर्वपदं । पा° ६. २. १. । इत्यत्र वृत्तौ निद्ग्रहणं दीर्घग्रहणं चानुवर्त्य यूपशब्दो व्युत्पादितः ॥

खष्पशिल्पशष्पवाष्परूपपर्पतल्पाः ॥ २८ ॥

सप्तैते पप्रत्ययांता निपात्यंते ॥ खनतेर्नकारस्य षत्वं । खष्पो बलात्कारः । खष्पः क्रोधबलात्काराविति विश्वः ॥ शील समाधौ । ह्रस्वत्वं । शिल्पं कौशलं ॥ शसु हिंसायां । निपातनात् षत्वं । शष्पं बालतृणं प्रोक्तं शष्पं स्यात्प्रतिभाक्षयः ॥ वाधृ लोडने । अंत्यस्य षत्वं । वाष्पमूष्मणि चाश्रुणि । वाष्पो नेत्रजलोष्मणोरिति कोशांतरं ॥ रौतेर्दीर्घत्वं । रूपमाकृतिः । रूपं स्वभावे सौंदर्ये नाणके पशुशब्दयोः । पांत° १. । इति विश्वः ॥ पॄ पालनादौ । पर्पं गृहं बालतृणं च । तेन चरति । पर्पादिभ्यः ष्ठन् । पा° ४. ४. १०. । पर्पिकः । पर्पिकी । पर्पिकं ॥ तल प्रतिष्ठाकरणे । चुरादिणिचो ऽनित्यत्वात् णिजभावः । तल्पं शय्याट्टदारेषु पांते ऽमरः ॥ बाहुलकाच्चमेरपि पः । चंपा नगरी । पुरी चंपा तु मालिनीति विश्वः ॥ पातेर्ह्रस्वत्वं मुट् च । पंपा नदीति पुरुषोत्तमदेवः । अन्ये तु पर्पशब्दस्थाने पंपाशब्दं पठंति ॥

स्तनिहृषिपुषिगदिमदिभ्यो णेरित्नुच् ॥ २९ ॥

स्तन गद देवशब्दे चुरादिणयंतौ । हृष तुष्टौ । पुष पुष्टौ । गदिरुक्त एव । मदी हर्षग्लेपनयोरिति घटादिः ॥ एभ्यो णयंतेभ्य इत्नुच् । अयामंतेति । पा° ६. ४. ५५. । णेरयादेशः । स्तनयित्नुर्बलाहकः ॥ हर्षयित्नुः सुवर्णं ॥ पोषयित्नुः पिको मतः पोषकश्च ॥ गदयित्नुः शब्दः कामुकश्च वावदूकश्च ॥ मदयित्नुर्मदिरा ॥

कृहनिभ्यां क्नुः ॥ ३० ॥

करोतिहंतिभ्यां क्नुः स्यात्। ककारः कित्कार्यार्थः ॥ कृनुः शिल्पी ॥ अनुदात्तोपदेशेत्यादिना। पा° ६. ४. ३७.। अनुनासिकलोपः। हनुः स्यात् व्याधिप्रहृत्योः ॥

गमेः सन्वच्च ॥ ३१ ॥

गमेः क्नुः सन्वत्कार्यं च ॥ जिगनुः प्राणाः। पूर्ववदनुनासिकलोपः ॥

दाभाभ्यां नुः ॥ ३२ ॥

ददातिभातिभ्यां नुः स्यात्॥ दानुर्दाता विक्रांतश्च ॥ भानुरर्को दीप्तिश्च। भानू रश्मिदिवाकरावित्यमरः। स्वःपूर्वात्स्वर्भानू राहुः। चित्रभानू रवौ वह्नौ बृहद्भानुस्तु पावके ॥

वचेर्गश्च ॥ ३३ ॥

वचेर्नुः स्याद्गकारश्चांतादेशः॥ वग्नुर्वाचालः ॥

धेट इच्च ॥ ३४ ॥

धयतेर्नुः स्यादिकारश्चांतादेशः ॥ धयति तामिति धेनुर्नवप्रसूता गौः। स्त्रियां कन्। धेनुका हस्तिनी मतेत्यमरः ॥

सुवः कित् ॥ ३५ ॥

सूतेर्नुः कित्स्यात्। सूनुः पुत्रे ऽनुजे रवौ। नांत° ११.। इति विश्वः॥

जहातेर्द्वे अंतलोपश्च ॥ ३६ ॥

ओहाक् त्यागे ॥ ततो नुः स्यात्। द्वित्वमंत्यलोपश्च धातोः। जह्नुर्नाम ऋषिः कश्चिदपत्यं तस्य जाह्नवी ॥

स्थो णुः ॥ ३७ ॥

तिष्ठतेर्णुः स्यात्॥ स्थाणुः स्यात्कीलशूलिनोः। स्थाणुः कीले स्थिरे हरे ॥

अजिवृरीभ्यो निच्च ॥ ३८ ॥

अज गतौ। वृङ् संभक्तौ। री गतिरेषणयोः ॥ एभ्यो णुर्नित्स्यात्। अजेर्वीभावः। वेणुर्नृपांतरे वंशे। णांत° २१.। इति विश्वः॥ वर्णुर्नददेशभेदयोः॥

यस्य वर्णो वुक्। पा° ४.२.१०३.। इत्यत्र सूत्रे ग्रहणं॥ रेणुर्द्वयो रजस्यपि। रेणुर्द्वयोः स्त्रियां धूलिरित्यमरः। हेमरेणुः सुरेणुः स्यादित्युत्तररत्नं। त्रसरेणुः सुरेणुः स्यादित्युत्तररत्नकांडं ॥

विषेः किच्च ॥ ३९ ॥

विष्लृ व्याप्तौ॥ अतो नुः स्यात्स च कित्। विष्णुर्नारायणः। वैष्णवो यस्य सेवकः। सर्वं विष्णुमयं जगदिति। के चित् विश प्रवेशन इत्यस्य ग्रहणमिच्छंति। तथा च विष्णुपुराणं। यस्माद्विष्णुमयं सर्वं यच्चराचरमुच्यते। तस्माद्गीयते [विष्णुः स] विशधातोः प्रवेशनात् ॥

कृदाधाराचिंकलिभ्यः कः ॥ ४० ॥

डुकृञ्। डुदाञ्। डुधाञ्। रा ला दाने। अर्च पूजायां। कल गतौ॥ एभ्यः कः। बहुलवचनान्न ककारस्येत्संज्ञा। कर्को धवलघोटकः। कर्कः कर्केतने वह्नौ शुक्लाश्वे दर्पणे घटे। कांत° २८.। इति विश्वः॥ दाको यजमानः॥ धाको ऽनडुानाधारश्च॥ राका पौर्णमासी। राका तु सरिदंतरे। कच्छूनवरजःकन्यापूर्णेंदुपूर्णिमासु च। कांत° ४७.। इति विश्वः। एषु त्रिषु के ऽण इति ह्रस्वो न भवति बहुलवचनादेव॥ अर्कः सूर्यार्कपर्णयोः। अर्को ऽर्कपर्णे स्फटिके रवौ ताम्रे दिवस्पतौ। कांत° २७.। इति विश्वः॥ कल्कं किल्विषदंभयोः। कल्कः पापाशये दंभे विट्किट्टयोरपि। कांत° ४२.। इति सः॥ बाहुलकाद्रमेरपि कः। रंको दुर्गतः। रंकस्तु कृपणे मंदे। कांत° ४१.। इति च। कपिलिकादित्वाल्लत्वं। टाप्। लंका राक्षसपुरी। लंका रक्षःपुरीशाखाशाकिनीकुलटासु च। विश्व° कांत° ४६.। इति। शाखा च॥ तथा फलेरपि। फल्को विशोधितांके स्यादिति गोवर्धनः ॥

सृवृभूशुषिमुषिभ्यः कक् ॥ ४१ ॥

सृ गतौ। वृञ् वरणे। भू सत्तायां। शुष शोषणे। मुष स्तेये॥ एभ्यः कक्। सृक उत्पलवातयोः। सृको बाणानिलोत्पले। विश्व° कांत° २७.॥ वृकः श्वापदकाकयोः। वृकः काके च पेचक इति विश्वः। स्वार्थे वृकाट्टेण्यण्। पा° ५.३.११५.। वार्केण्यः। बहुषु तद्राजस्येत्यादिना। पा° २.४.६२.। लुक्। वृकाः॥ भूकं छिद्रं। भूकं छिद्रे च काले च। भूकं जलनिर्गमविवरं॥ शुष्को नीरसः॥ मुष्को ऽण्डः। मुष्को ऽण्डकोषे संघाते। तयो-

गादूषसुषीति। पा° ५. २. १०७.। मुष्करः॥ बाहुलकाद्वतिमवतिभ्यां च कक्। ज्वरत्वरेत्यादिनोडादिकार्ये। बाहुलकाद्गुणः। ओको राशिस्थानं॥ मूको वचनवर्जितः। ओको राशिस्थाने। मूको वाग्दीने च॥

शुकवल्कोल्काः ॥ ४२ ॥

शुकादयः कप्रत्ययांता निपात्यंते॥ शुभ दीप्तौ। अंत्यस्य लोपः। शुको व्याससुते कीरे शुकं स्याद्ग्रंथिपर्णक इति धरणिः॥ वल संवरणे। वल्कं वल्कलमस्त्रियामित्यमरः॥ उष दाहे। षकारस्य लत्वं। टाप्। ओषतीत्युल्का ज्वालाविभावसोरिति सुभूतिचंद्रः॥

इणभीकापाशल्यतिमर्चिभ्यः कन् ॥ ४३ ॥

इण् गतौ। ञिभी भये। कै शब्दे। पा पाने। शल गतौ। अत सातत्यगमने। मर्च इति सौत्रो धातुः॥ एभ्यः कन्। एके मुख्यान्यकेवलाः। अम° ३. ४. १. १६.। एकं तु केवले श्रेष्ठ इतरस्मिंस्तु वाच्यवत्। कांत° ३७.। इति विश्वः॥ भेको मंडूकमेघयोः। कांत° ३६.। इति सः। शिली गंडूपदी भेकीत्यमरः॥ काको वायसः॥ पिबति स्तनमिति पाकः। पाकः शिशौ जरानिष्ठा-पचनक्लेदनेषु। कांत° ३४.। इति सः॥ शल गतौ। शल्कं वल्कलं॥ अत्कः पथिकः शरीरावयवश्च॥ मर्कः शरीरवायुः॥ बाहुलकात् शो तनूकरणे। षो ऽंतकर्मणि। आभ्यामपि कन्। शाकं साकमिति वर्णदेशना। शाको मात्रादौ द्वीप इति तालव्यादौ नानार्थामरमाला॥

नौ हः ॥ ४४ ॥

ओहाक् त्यागे॥ अतो निशब्द उपपदे कन् स्यात्। निहाका गोधिका समे इत्यमरः॥

नौ सदेर्डिच्च ॥ ४५ ॥

षद्लृ विशरणे॥ अतो नौ कन् स च डित्। डित्वात् टिलोपः। सदिरप्रतेरिति षत्वं। निष्को ऽस्त्री हेम्नि तत्पले। निष्कः साष्टसुवर्णशते निष्को दीनारकर्षयोः। कांत° ४४.। इति विश्वः॥

स्यमेरीट् ॥ ४६ ॥

स्यमु शब्दे॥ अतः कन् तस्य चेडागमः। स्यमीको वल्मीको वृक्षभेदश्च। ह्रस्व इडागमो भवतीति के चित्। तेषां स्यमिकः॥

अज्ञियुधूनीभ्यो दीर्घश्च ॥ ४७ ॥

अज गतिक्षेपणयोः। यु मिश्रणे। धूञ् कंपने। णीञ् प्रापणे ॥ एभ्यः कन्नेषां दीर्घत्वं च। तत्सामर्थ्याद्गुणो न भवति। अजेर्वीभावः। वीकः स्याद्वातपक्षिणोः ॥ यूका षोकोदनी। यूकाभयेन न हि केशविमोक्षणं स्यादिति शृंगारतिलकं। यूकालिक्षं। क्षुद्रजंतवः। पा° २. ४. ८.। इत्येकवद्भावः ॥ धूको वायुः ॥ नीको वृक्षविशेषः स्यादिति सर्वस्वं ॥

ह्रियो रश्च लो वा ॥ ४८ ॥

ह्री लज्जायां ॥ अतः कन् धातोर्दीर्घत्वं च रस्य च लो वा। ह्रीका ह्लीका त्रपा मता ॥

शकेरुनोंतोंत्युनयः ॥ ४९ ॥

शक्लृ शक्तौ ॥ अत उन उंत उंति उनि इत्येते चत्वारः प्रत्ययाः स्युः। शकुनः शकुंतः शकुंतिः शकुनिः पक्षिनामानि। शकुनं च शुभाशंसानिमित्ते शकुनः खगे। नांत° ४६.। इति विश्वः। शकुंतौ भासपक्षिणावित्यमरः। शकुंतिः शकुनिः पक्षिसामान्ये। शकुंतलाभरतेन। १. ३०.। इति विदग्धमुखमंडनं ॥

भुवो क्किच् ॥ ५० ॥

भू सत्तायां ॥ अतो क्किच्प्रत्ययः स्यात्। भवंतिर्वर्तमानः कालः। कृदिकारादिति ङीष्। भवंती लटोऽन्याचार्यसंज्ञा। तथा चास्तिर्भवंतीपरः प्रयोक्तव्य इति भाष्यं ॥ बहुलवचनात्कमेरपि प्रत्ययादिलोपे कुशब्दादेशः। कुंतिः। इतो मनुष्यजातेः। पा° ४.१.६५.। इति ङीष्। कुंती ॥ अवतेश्च। अवंतिः। अवंती। अवंतिनगरीनाथं द्रष्टुमिच्छामि सत्वरमिति सर्वस्वं ॥ तथा वदेश्च। वदंतिः। वदंती। किंवदंती जनश्रुतिः। अम° १.१.५.७. ॥

कन्युच् क्षिपेश्च ॥ ५१ ॥

क्षिपतेः कन्युच्प्रत्ययः स्यात्। चकाराद्भुवनेरपि ॥ क्षिपण्युर्वसंतः ॥ भुवन्युः स्वामिसूर्ययोः ॥

अनुङ् नदेश्च ॥ ५२ ॥

णद अव्यक्ते शब्दे॥ अतश्चानुङ्प्रत्ययः स्यात्। चकारात् क्षिपेश्च॥ नदनुर्मेघः॥ क्षिपणुर्वातः॥

कृवृदारिभ्य उनन् ॥ ५३ ॥

कृ विक्षेपे। वृञ् वरणे। दॄ विदारणे॥ एभ्य उनन्। करुणो वृक्षभेदः स्यात्करुणा च कृपा मता॥ करुणास्तु रसे वृक्षे कृपायां करुणा मता॥ णांत° ३१.। इति विश्वः। करुणा शीलमस्येति कारुणिकः॥ वरुणो दिक्पतौ तरौ। इंद्रवरुणेति ङीषानुकौ। वरुणानी॥ दारुणं भीषणं॥ वृ वरणे इत्यपि पारायणं। वरुणशब्दस्य च वलीववकारत्वेनाख्याततवात्॥

त्रो रश्च लो वा ॥ ५४ ॥

तरतेरुनन् स्यात्। रेफस्य वा लकारादेशः॥ तरुणातलुनौ यूनि। तरुणो वृक्षभेदो युवा च। गौरादित्वात्तरुणी तलुनी समे। तलुनी युवती समे इत्यमरः॥

क्षुधिपिशिमिथिः कित् ॥ ५५ ॥

क्षुध बुभुक्षायां। पिश अवयवे। मिथ सौत्रो धातुः॥ एभ्य उनन् कित्स्यात्। क्षुधुनो म्लेच्छजातिः॥ पिशुनौ खलसूचकौ नांत ऽमरः। पिशुनं कुंकुमे क्रूरे सूचके त्वभिधेयवत्। विश्व° नांत° ४५.॥ मिथुनं राशियुग्मयोः॥

फलेर्गुक् ॥ ५६ ॥

फल निष्पत्तौ॥ अस्मादुनन् गुगागमश्च धातोः। फल्गुनो ऽर्जुनः। गौरादित्वात् ङीष्। फल्गुनी। उत्तरपदा च। उत्तरफल्गुनी। पूर्वफल्गुनी। अण् च। फाल्गुनी पौर्णमासी। फाल्गुनः पार्थः॥

अशेर्लश च ॥ ५७ ॥

अश भोजने॥ अस्मादुनन् लशादेशश्च धातोः। लशुनमौषधमहाकंदः॥

अर्जेर्णिलुक्च ॥ ५८ ॥

अर्जेर्ण्यंतादुनन् णेश्च लुक्॥ अर्जुनः पार्थशुक्लयोः। अर्जुनः ककुभे पार्थे

कार्तवीर्यमयूरयोः । विश्व° नांत° ८३. । स्त्रियां गौरादित्वात् ङीष् । अर्जुनी सौरभेयी स्यादित्यमरः ॥

तृणाख्यायां चित् ॥ ५९ ॥

अर्जयतेरेव तृणाख्यायामुनन् चिद्भवति । अंतोदात्तो ऽर्जुनस्तृणं । फिषो ऽंत उदात्त इत्यधिकृत्यार्जुनस्य तृणाख्या चेत् । १. १७. । इति फिट्सूत्रं ॥

अर्तेश्च ॥ ६० ॥

अर्तेरुनन् चित्स्यात् ॥ अरुणः सूर्यकुष्ठयोः ॥ अरुणो व्यक्तरागे ऽर्के संध्यारागे ऽर्कसारथौ । अरुणातिविषायां स्यादूक्ते वाच्यवदिष्यते । णांत° ३०. । इति विश्वः ॥

अजियमिशीङ्भ्यश्च ॥ ६१ ॥

अज गतिक्षेपणयोः । यम उपरमे । शीङ् स्वप्ने ॥ एभ्य उनन् स्यात्स च कित् । अजेर्वी भावः । वीयते गम्यते ऽत्रेति वयुनं देवमंदिरं ॥ यमुना नदीभेदः ॥ शयुनो ऽजगरः । पृथग्योगो वैचित्र्यार्थः ॥

वृतॄवदिहनिकमिकषिभ्यः सः ॥ ६२ ॥

वृ वरणे । तॄ प्लवनतरणयोः । वद व्यक्तायां वाचि । हन हिंसागत्योः । कमु कांतौ । कष सिषेति दंडकः ॥ एभ्यः षड्भ्यः सः । वर्षं संवत्सरे वृष्टौ जंबूद्वीपे घने ऽपि च । प्रावृट्काले च वर्षाः स्युः । षांत° ४. । इति सः । वर्षः स्याद्वरिषो ऽपि चेति चंद्रः । मूर्धरेफा विकल्प्यंते छंदोभंगभयादिनेति सः ॥ तर्षः प्लवसमुद्रयोः ॥ वत्सो बालो वत्सं वक्षः । वत्सस्तर्णकपुत्रादिवर्षे वत्सं तु वक्षसि । सांत° ६. । इति विश्वः । श्रीवत्सो विष्णुहृदयरोमावर्तविशेषः । ततः श्रीवत्सलांछनः ॥ हंसो निर्लोभसूर्ययोः । हंसो विहगभेदे स्यादर्के विष्णौ हयांतरे । निर्लोभनृपतौ हंसः शरीरमरुदंतरे । सांत° ८. । इति विश्वः ॥ कंसो भाजनदैत्ययोः । स्यात्कंसस्तैजसद्रव्ये कंसः पात्रे च दृश्यते । दृष्टः कंसो विशेषेण दैत्यदानवभेदयोरिति शाश्वतः । कसि गतिशातनयोरित्यस्मात्पचाद्यचि कंस इति धातुप्रदीपटीका ॥ कक्षो वनभुजामूले । कक्षौ च तृणवीरुधावित्यमरः । जंतोरवयवे कक्षः कच्छवीरुत्तृणादिषु । कक्षा स्यात्परिधानस्य पश्चादंचलपल्लव इति सः ॥ बाहुलकात् राजतेरपि सः । कपिलि-

कादित्वाद्वा लत्वं। राज्ञा लाजा रंजनद्रव्यं॥ तथा यु मिश्रणे योषा स्त्री-त्यनागमः। जुष परितर्के जोषयति योषा जोषेति चंद्रेण च चवर्गादिरुक्तः॥

प्लुषेरच्चोपधायाः ॥ ६३ ॥

प्लुष दाहे॥ अतः सः। उकारस्याकारः। प्लक्षो द्वाःपार्श्वपर्कटयोः। प्लक्षो द्वीपविशेषे स्यात्पर्कटीगर्दभांडयोः। पिप्पले द्वारपार्श्वे च गृहस्य परिकीर्तितः। क्षांत॰ ७.। इति विश्वः॥

मनेर्दीर्घश्च ॥ ६४ ॥

मन ज्ञाने॥ अतः सो धातोर्दीर्घश्च। मांसं पिशितमुद्दिष्टं। सिध्मादित्वान्मांसलः॥

अशेर्देवने ॥ ६५ ॥

अशू व्याप्तौ॥ अतो देवने वाच्ये सः। व्रश्चभ्रस्जेत्यादिना षत्वादिकार्यं। अक्षो रथावयवे विभीतके च। अक्षाणि पंडितजना विदुरिंद्रियाणि। अक्षः कर्षे तुषे चक्रे शकटव्यवहारयोः। आत्मज्ञे पाशके चाक्षं तुत्थे सौवर्चलेंद्रिये। क्षांत॰ २.। इति सः॥

स्नुव्रश्चिकृत्यृषिभ्यः कित् ॥ ६६ ॥

ष्णु प्रस्नवने। ओव्रश्चू छेदने। कृती छेदने। ऋषी गतौ॥ एभ्यः सः कित्स्यात्। स्नुषा वधूः॥ संप्रसारणादिकार्यं। वृक्षस्तरुः। वृक्ष वरणे। अतो ऽच्यावृणोतीति वृक्ष इति सिद्धे प्रपंचार्थं वृश्चिग्रहणं॥ कृत्समुदकं॥ ऋक्षं नक्षत्रं॥ बाहुलकात् मिष हिंसायां। अतो ऽप्याङ्पूर्वात्सः। आमिक्षा क्षीरवैकृतौ। ईक्षतेरामीक्षा। उभयोः सारासारं विद्वद्भिर्निरूपणीयं। आमिक्षीयं दधि क्षीरं पुरोडाश्यं तयौषधं। ५. १२.। इति भट्टिः॥ लिश गतौ। रुह जन्मनि। षत्वढत्वकुत्वादिकार्यं। लिक्षा यूकांडनी॥ रुक्षः पादपतातौ स्यात् त्रिष्वप्रेमण्यचिक्कणे। क्षांत॰ १२.। इति सः। गौरादित्वाद्रुक्षः॥

ऋषेर्जातौ ॥ ६७ ॥

ऋषतेर्जातौ सः। स च किद्भवति। ऋक्षो ऽद्रिभेदे भल्लूक इति च। पूर्वसूत्रेण सिद्धे जातौ दृष्टमिदं प्रपंचार्थं॥

उन्दिगुधिकुषिभ्यश्च ॥ ६८ ॥

उन्दी क्लेदने। गुध रोषे। कुष निष्कर्षे॥ एभ्यः सः कित् स्यात्। उत्सः प्रस्रवणं॥ गुत्सः स्तवकः स्तंबस्तृणादिनः। गुच्छः स्यात् स्तवके स्तंबे हारभेदे च दृश्यत इति चवर्गादिप्रकरणे धरणिकोशे। ककारांतो ऽप्ययं। स्तवके गुत्सगुत्सकावित्यचलकोशः॥ कुक्षो जठरं॥

गृधिपण्योर्दकौ च ॥ ६९ ॥

गृधु अभिकांक्षायां। पण स्तुत्यादौ॥ आभ्यां सः कित्स्यात् दकारककारौ चांत्यादेशौ यथाक्रमं। गृत्सः कामदेवः॥ पक्षो मासार्धः। पक्षो मासार्धके पार्श्वे ग्रहे साध्यविरोधयोः। केशादेः परतो वृंदे बले सखिसहाययोः। क्षांत० ५.। इति विश्वः। सविधौ पचिग्रहणेनैव सिद्ध इह ककारणं वैचित्र्यार्थं। गृत्स इत्यत्र गुणाभावः किदित्यनुवृत्तेः। गृधेरादिचतुर्थनिवृत्त्यर्थो दकारो विधीयते॥

अशेः सरन् ॥ ७० ॥

अशू व्याप्तौ॥ अतः सरन्। षत्वादिकार्यं। अक्षरं वर्णनिर्माणं वर्णमप्यक्षरं विदुः। अक्षरं न क्षरं विद्यादश्नोतेर्वा सरो ऽक्षरमिति स्मृतिः। वेदे पुनरक्षरशब्द उदके ऽपि वर्तत उणादयो बहुलमित्यत्र क्षत्रमित्रः। मोक्षे स्मृतमक्षरमित्यमरः॥

वसेश्च ॥ ७१ ॥

वसतेरपि सरन्॥ सः स्यार्धधातुके। पा० ७. ४. ४९.। इति तत्वं। वत्सरो ऽब्दः॥

संपूर्वाच्चित् ॥ ७२ ॥

वसतेः संपूर्वात्सरन् चित्स्यात्॥ संवत्सरो वत्सर एव। के चित्कंज्ञना इव संवत्सरफलदर्शिन इति सुबंधुः। सांवत्सरो गणकः। ऋगयनादित्वादणप्रत्ययः॥

कृधूमदिभ्यः कित् ॥ ७३ ॥

डुकृञ् करणे। धूञ् कंपने। मदी हर्षे॥ एभ्यः सरन् कित्स्यात्। बाहुलकादत्र षत्वाभावः। कृसरः स्यात्तिलौदनं। १६९.। इति हारावली॥

धूसर ईषत्पांडुरः। महिषधूसरितः सरितस्तट इति ज्ञानकोहरणो यमकं ॥ मत्सरः पिशुनः। मत्सरोऽन्यशुभद्वेषे तद्वत्कृपणयोस्त्रिष्वित्यमरः। अथ मत्सरः॥ असत्यपरसंपत्तौ मात्सर्ये कृपणे क्रुधि। मत्सरा मक्षिकायां च। रांत° १२३.। इति विश्वः। मत्सरा मक्षिका ज्ञेया भंभराली च सा मतेत्यन्यः ॥

पते रश्च लः ॥ ७४ ॥

पततेः सरन्। तद्रेफस्य च लत्वं। पत्सलः पंथाः ॥

तन्यृषिभ्यां क्सरन् ॥ ७५ ॥

तनु विस्तारे। ऋषी गतौ॥ आभ्यां क्सरन्॥ कित्त्वादनुनासिकलोपः। तसरः सूत्रवेष्टन इत्यमरः॥ ऋक्षर ऋत्विक्॥ कृधूमदिभ्यः किदित्यत्र न अपि कृतं वैचित्र्यार्थं ॥

पीयुक्वणिभ्यां कालन् ह्रस्वः संप्रसारणं च ॥ ७६ ॥

पीयुः सौत्रो धातुः। क्वण रण इति दंडके क्वणि पठ्यते॥ आभ्यां कालन् यथाक्रमं ह्रस्वत्वं संप्रसारणं च। पियालो वृक्षभेदः स्यात्। मृगाः पियालद्रुममंजरीणां। कु° सं° ३. ३१.। इति कालिदासः॥ कुणालो देशभेदः॥ बाहुलकाद्भजेरपि कालन्। न्यंक्वादित्वात्कुत्वं। भगालं नरमस्तकं। भगालं नरकपालं। इनिना भगाली। चंडीकांतो भगाली च लेलिहानो वृषध्वज इति राजशेखरः ॥

कठिकषिभ्यां काकुः ॥ ७७ ॥

कठ कृच्छ्रजीवने। कष सिषेति दंडकधातुः॥ आभ्यां काकुः। कठाकुः पक्षी॥ कषाकुरग्निसूर्ययोः॥ कित्करणमुत्तरार्थं ॥

सर्तेर्दुक् ॥ ७८ ॥

सृ गतौ॥ अतः काकुर्धातोर्दुगागमश्च। सृदाकुर्वातसरितोः ॥

वृतेर्वृद्धिश्च ॥ ७९ ॥

वर्ततेः काकुर्वृद्धिश्च धातोः॥ वार्ताकुः प्रसिद्धैव। अर्थं सूपमुखस्य सूपगणिकावार्त्ताकुवार्त्ताकुत इति दारिद्र्यवर्णनं। वार्ताकुरेषा गुणास्पृयुक्तेति द्रव्यगुणः। वार्तिंगणास्तु वार्ताकुरिति कोशः। बाहुलकादुकारस्यात्वेत्वे।

वार्ताकवार्ताक्यौ। वार्ताकं पित्तलं किं चिदंगारपरिपाचितमिति वैद्यकशास्त्रं। वार्ताकी हिंगुली सिंहीत्यमरः ॥

पर्देर्नित्संप्रसारणमल्लोपश्च ॥ ८० ॥

पर्दतेः काकुः स च निङ्वति। धातो रेफस्य संप्रसारणमल्लोपश्च॥ पृदाकुर्व्याघ्रसर्पयोः। पृदाकुर्वृश्चिके व्याघ्रे चित्रके च सरीसृपे। कांत° १४५.। इति विश्वः॥

सृयुवचिभ्यो ऽन्युजागूजक्नुचः ॥ ८१ ॥

सृ गतौ। यु मिश्रणे। वच परिभाषणे॥ एभ्यो यथाक्रममन्युच् आगूच् अक्नुच् इति त्रयः प्रत्यया भवंति। सरण्युर्मेघवातयोः॥ यवागूः प्रसिद्धैव॥ वचक्नुर्विप्रवाग्मिनोः ॥

आनकः शीङ्भियः ॥ ८२ ॥

शेतेर्बिभेतेश्चानकः स्यात्॥ शयानको ऽजगरः॥ बिभेत्यस्मादिति भयानको भीष्मः ॥

आणको लूधूशिंघिधाञ्भ्यः ॥ ८३ ॥

लूञ् छेदने। धूञ्। शिंघि। धाञ्॥ एभ्य आणकः। लवाणकं दात्रं॥ धवाणको वातः॥ शिंघाणकः श्लेष्मा। पृषोदरादित्वादत्र वा ककारलोपः। शिंघाणः फेनडिंडीरो नक्रेतश्च पिच्छिल इति विक्रमादित्यकोशः। शिंघाणं काचपात्रे स्याल्लोहनासिकयोर्मले। णांत° ५५.। इति विश्वः। शिंघाणं नासिकामले। १६४.। इति हारावली॥ धाणको दीनारभागः ॥

उल्मुकदर्विहोमिनः ॥ ८४ ॥

एते शब्दा मुकविमिन्प्रत्ययांता निपात्यंते॥ उष दाहे। उषः षकारस्य लत्वं। उल्मुकं ज्वलदंगारं। १४४.। इति हारावली॥ दृणातेर्विः॥ दर्विः परिवेषणभांडं। दर्विः कोलादिविकृतिः। कृदिकारादिति ङीष्। दर्वीकरः सर्पः॥ जुहोतेर्मिनिः। होमी यजमानः। होमशब्दादिनिना सिद्धावत्र पाठः प्रपंचार्थः॥

ह्रियः कुक् रश्च लो वा ॥ ८५ ॥

ह्री लज्जायां॥ अतः कुक् स्याद्रेफस्य च वा लत्वादेशः। ह्रीकुर्लज्जावान्। ह्रीकुर्जतुत्रपुणी लाक्षादिश्च ॥

धूसर ईषत्पांडरः। महिषधूसरितः सरितस्तट इति ज्ञानकोहरयो यमकं ॥ मत्सरः पिशुनः। मत्सरोऽन्यशुभद्वेषे तद्वत्कृपणयोस्त्रिष्वित्यमरः। अथ मत्सरः॥ असत्परसंपत्तौ मात्सर्ये कृपणे क्रुधि। मत्सरा मक्षिकायां च। रांत° १२३.। इति विश्वः। मत्सरा मक्षिका ज्ञेया भंभराली च सा मतेत्यन्यः ॥

पते रश्च लः ॥ ७४ ॥

पततेः सरन्। तद्रेफस्य च लत्वं। पत्सलः पंथाः ॥

तन्यृषिभ्यां क्सरन् ॥ ७५ ॥

तनु विस्तारे। ऋषी गतौ॥ आभ्यां क्सरन्॥ कित्त्वादनुनासिकलोपः। तसरः सूत्रवेष्टन इत्यमरः॥ अक्षरः ऋत्विक्॥ कृधूमदिभ्यः किदित्यत्र न अपि कृतं वैचित्र्यार्थं ॥

पीयुक्वणिभ्यां कालन् ह्रस्वः संप्रसारणं च ॥ ७६ ॥

पीयुः सौत्रो धातुः। क्वण रण इति दंडके क्वणि पठ्यते॥ आभ्यां कालन् यथाक्रमं ह्रस्वत्वं संप्रसारणं च। पियालो वृक्षभेदः स्यात्। मृगाः पियालद्रुममंजरीणां। कु° सं° ३. ३१.। इति कालिदासः॥ कुणालो देशभेदः॥ बाहुलकाड्भेरपि कालन्। न्यंक्वादित्वात्कुत्वं। भगालं नरमस्तकं। भगालं नरकपालं। इनिना भगाली। चंडीकांतो भगाली च लेलिहानो वृषध्वज इति रत्नकोशः ॥

कठिकषिभ्यां काकुः ॥ ७७ ॥

कठ कृच्छ्रजीवने। कष सिषेति दंडकधातुः॥ आभ्यां काकुः। कठाकुः पक्षी॥ कषाकुरग्निसूर्ययोः॥ कित्करणमुत्तरार्थं ॥

सर्तेर्दुक्च ॥ ७८ ॥

सृ गतौ॥ अतः काकुर्धातोर्दुगागमश्च। सृदाकुर्वातसरितोः ॥

वृतेर्वृद्धिश्च ॥ ७९ ॥

वर्ततेः काकुर्वृद्धिश्च धातोः॥ वार्ताकुः प्रसिद्धैव। अर्धे सूपमुखस्य सूपशाकापाकावार्त्ताकुवार्त्ताकुत इति दारिद्र्यवर्णनं। वार्ताकुरेषा गुणास्तुप्युक्तेति द्रव्यगुणः। वार्तिंगणस्तु वार्ताकुरिति कोशः। बाहुलकादुकारस्याभावत्वे।

वार्ताकवार्ताक्यौ। वार्ताकं पित्तलं किं चिदंगारपरिपाचितमिति वैद्यकशास्त्रं। वार्ताकी हिंगुली सिंहीत्यमरः ॥

पर्देर्नित्संप्रसारणमल्लोपश्च ॥ ८० ॥

पर्दतेः काकुः स च निद्भवति। धातो रेफस्य संप्रसारणमल्लोपश्च॥ पृदाकु-र्व्याघ्रसर्पयोः। पृदाकुर्वृश्चिके व्याघ्रे चित्रके च सरीसृपे। कांत° १४५.। इति विश्वः॥

सृयुवचिभ्यो ऽन्युजागूजक्नुचः ॥ ८१ ॥

सृ गतौ। यु मिश्रणे। वच परिभाषणे॥ एभ्यो यथाक्रममन्युच् आगूच् अक्नुच् इति त्रयः प्रत्यया भवंति। सरण्युर्मेघवातयोः॥ यवागूः प्रसिद्धैव॥ वचक्नुर्विप्रवाग्मिनोः ॥

आनकः शीङ्भियः ॥ ८२ ॥

श्रोतेर्बिभेतेश्चानकः स्यात्॥ शयानको ऽजगरः॥ बिभेत्यस्मादिति भयानको भीष्मः ॥

आणको लूधूशिंघिधाञ्भ्यः ॥ ८३ ॥

लूञ् छेदने। धूञ्। शिंघि। धाञ्॥ एभ्य आणकः। लवाणकं दात्रं॥ धवाणको वातः॥ शिंघाणकः श्लेष्मा। पृषोदरादित्वादत्र वा ककारलोपः। शिंघाणः फेनडिंडीरो नक्रेतश्च पिच्छिल इति विक्रमादित्यकोशः। शिंघाणं काचपात्रे स्याल्लोहनासिकयोर्मले। णांत° ५५.। इति विश्वः। शिंघाणं नासिकामले। १९४.। इति हारावली॥ धाणको दीनारभागः ॥

उल्मुकदर्विहोमिनः ॥ ८४ ॥

एते शब्दा मुकविमिन्प्रत्ययांता निपात्यंते॥ उष दाहे। उषः षकारस्य लत्वं। उल्मुकं ज्वलदंगारं। १४४.। इति हारावली॥ दृणातेर्विः॥ दर्विः परिवेषणभांडं। दर्विः फोलादिविकृतिः। कृदिकारादिति ङीष्। दर्वीकरः सर्पः॥ जुहोतेर्मिनिः। होमी यजमानः। होमशब्दादिनिना सिद्धावत्र पाठः प्रपंचार्थः॥

ह्रियः कुक् रश्च लो वा ॥ ८५ ॥

ह्री लज्जायां॥ अतः कुक् स्याद्रेफस्य च वा लत्वादेशः। ह्रीकुर्लज्जावान्। ह्रीकुर्जतुत्रपुणी लाक्षादिश्च ॥

हसिमृग्रिण्वामिदमिलूपूधूर्विभ्यस्तन् ॥ ८६ ॥

हसे हसने। मृङ् प्राणत्यागे। गॄ निगरणे। इण् गतौ। वा गतिगन्धनयोः। अम गत्यादिषु। दमु उपशमे। लूञ् छेदने। पूङ् पवने॥ एभ्यो दशधातुभ्यस्तन्प्रत्ययो भवति। तितुत्रेत्यादिनेट्प्रतिषेधः। हस्तो तु पाणिनक्षत्रे इत्यमरः। हस्तो नक्षत्रभेदे स्यात्करेभकरयोरपि। कचात्परः कलापार्थे सप्रकोष्ठततांगुलौ। तांत° २८.। इति विश्वः। नक्षत्रे स्त्रीलिंगो ऽपि हस्तशब्दः। हस्ता नक्षत्रं। पुष्या हस्ता तथा ज्येष्ठेति ज्योतिषः। हस्तो नक्षत्रे पुंसि च। तथा च ज्योतिषवराहः। पुष्यो ऽथ हस्तः श्रवणः श्रविष्ठेत्यादि॥ मर्तो भूलोकः। अत्र भवो दिगादेराकृतिगणत्वाद्यत्। मर्त्यः॥ गर्तो ऽवटः। गर्तस्त्रिगर्तदेशे स्यादवटे च ककुंदरे। तांत° २३.। इति विश्वः॥ एतः कर्बुरः। स्त्रियां वर्णवाचित्वात् ङीप्नत्वे। पा° ४.१.३९.। एनी। एता॥ वातो वायुर्व्याधिश्च। पाशादित्वाद्यत्। वात्या। महावात्या प्रकुप्यतीति वराहः॥ अंतो नाशसमीपयोः। अंतः प्रांते ऽंतिके नाशे स्वरूपे च मनोहरे। तांत° ३१.। इति विश्वः। दिगादित्वादंत्यं॥ दंतो दशनः। वयसि दंतस्य दतृ। पा° ५.४.१४१.। सुदती युवती। दंतावलो हस्ती। दंतुरः। उरच्॥ लोतः स्यादश्रुचिह्नयोः॥ पोतो बालवहित्रयोः॥ वलि लोपः। दीर्घः। धूर्तः शठः। धूर्तः स्यात्खंडलवणे शठधत्तूरयोरपि। वि° तांत° २२.॥ बाहुलकात्तुसेरपि तन्। तूर्णादिषु निपातनात् दीर्घत्वं। तूस्तं पापं जटा च। मुंडमिश्रेति णिच्। तूस्तानि विनिहंति वितूस्तयति पंथानं वातः। तूस्तं धूलिरिति पुरुषोत्तमदेवः॥ छो छेदने। छातो दुर्बलः॥ म्लायतेरपि तन्। अभिपूर्वादभिम्लातः। नञ्समासे ऽनभिम्लातः। शिवादित्वादण्। आनभिम्लातः॥

नञ्याप इट्च ॥ ८७ ॥

आप्नोतेर्नञ्युपपदे तन्निडागमश्च। बाहुलकान्नञो नलोपाभावः। नापितः प्रसिद्ध एव। सेनांतलक्षणकारिभ्यः। पा° ४.१.१५२.। इत्यपत्ये ण्यः। नापित्यः॥

तनिमृङ्भ्यां किच्च ॥ ८८ ॥

तनोतेर्म्रियतेश्च तन्प्रत्ययः कित्स्यात्। ततं वीणादिकं वाद्यं। अम° १.१.७.४.। मृतं याचितमुच्यते। मृतं स्याद्याचिते मृत्यौ। तांत° ४.। इति विश्वः। नञ्समासे ऽमृतं पीयूषं॥

अंजिघृसिभ्यः क्तः ॥ ८९ ॥

अञ्जू व्यक्त्यादौ । घृ क्षरणदीप्त्योः । षिञ् बंधने ॥ एभ्यः क्तः । अक्तं परिमितं । अक्तं व्याप्ते च संकुल इति सः । व्यक्तं विस्पष्टं ॥ घृतं सलिलसर्पिषोरित्यनेकार्थे ऽमरः । घृतमाज्ये प्रदीप्ते च सलिले च घृतं मतं । वि° तांत° ३. । इति च । कारणे कार्योपचारादायुर्घृतं । घृतं घृणा धर्म इति प्रयोगः । त्रिमतविषयश्चायं धातुरिति तृज्वत् क्रोष्टुरित्यत्र भाष्यं ॥ सितं शुक्लं । सितं सितिम्ना सुतरां मुनेर्वपुः । १. २५. । इति माघः ॥ बाहुलकात् हुर्छेरपि क्तो धातोर्मुडागमः प्राक् । राल्लोपः । पा° ६. ४. २१. । इति छकारलोपः । चकारस्य निवृत्तिः । मुहूर्तं पुंनपुंसकं ॥ ऋ गतौ । ऋतं सत्यं । नञ्समासे ऽनृतं ॥ वस निवासे । वस्तं भाग इत्यणृगयनादिभ्यः । पा° ४. ३. ७३. । इत्यत्र न्यासः ॥

दुतनिभ्यां दीर्घश्च ॥ ९० ॥

दु गतौ । तनु विस्तारे ॥ आभ्यां क्तो धातोर्दीर्घश्च । दूतः प्रेष्यः । करोत्यभ्यधिकं कार्यं तमाहुर्दूतमुत्तमं । ८.१२७. । इति भट्टिः । स्त्रियां दूती । दूतवणिग्भ्यां चेति यत् । दूत्यं तद्भावकर्मणोरित्यमरः । व्यक्ता दौत्यमिति पुरुषोत्तमदेवः । कः प्रयाति तु दौत्येनेति हितोपदेशः । लिंगविशिष्टपरिभाषया दूतीनां कर्म दौत्यं ॥ तातस्तु जनकः पितेत्यमरः । तातो ऽनुकंपे जनके । तांत° १३. । इति विश्वः ॥ बाहुलकात् शीङ् स्वप्ने । शीता हलपद्धती रामपत्नी च ॥

जेर्मूट्चोदात्तः ॥ ९१ ॥

जि जये ॥ अतः क्तस्तस्य मूडागमश्च । तस्योदात्तत्वं धातोर्दीर्घश्च । जीमूतो मेघशैलयोरित्यमरः । जीवनं जलं मूत्रयति स्रवयतीति पृषोदरादित्वात्सिद्धेरनार्षमिदं सूत्रमिति पुरुषोत्तमदेवः ॥

लोष्टपलितौ ॥ ९२ ॥

एतौ क्तान्तौ निपात्येते ॥ लुनातेः क्तः । तस्य षुडागमो धातोर्गुणश्च । लोष्टं दलिः स्त्री लेष्टुर्ना स महान् दरणिर्द्वयोरिति शब्दार्णवः । सर्वस्वे तु लोष्टतेरेव धातोर्लोष्टशब्दो व्युत्पादितः ॥ पलितं केशपाशः । पलितौषधमिव तमो वृद्धवेश्यानामिति तमोवर्णने सुबंधुः । क्तविधौ पलिग्रहणेन सिद्धे प्रपंचार्थं ॥

हृश्याभ्यामितन् ॥ ९३ ॥

हृञ् हरणे। श्यैङ् गतौ॥ आभ्यामितन्। हरितश्येतौ वर्णभेदौ।- वर्णादनुदात्तादित्वात् ङीप्नत्वे। स्त्रियां हरिणी हरिता। श्येनी श्येता ॥

रुहे रश्च लो वा ॥ ९४ ॥

रुह जन्मनि। अस्मादितन् रेफस्य च वा लत्वं। रोहितो मृगमत्स्ययोरिति हारावली। लोहितो ऽंगारकः। रोहितं रुधिरे प्रोक्तमृजुशक्रशरासने। रोहितो मीनमृगयोर्भेदे रोहितकद्रुमे। लोहितं कुंकुमे रक्ते गोशीर्षे रक्तचंदने। लोहितं स्यान्नदे भौमे वर्णभेदे च वाच्यवत्। तांत° १०६.। इति विश्वः। ख्याते लोहितरक्ते कुंकुमे। रोहिणी लोहिनी। रोहिता लोहिता ॥

पिशेः किच्च ॥ ९५ ॥

पिशतेरितन् स्यात्स च कित्। पिशितं मांसं ॥

श्रुदक्षिस्पृहिगृहिभ्य आय्यः ॥ ९६ ॥

श्रु श्रवणे। दक्ष वृद्धौ। स्पृह ईप्सायां। गृह ग्रहणे। चुरादावंत्यौ ॥ एभ्य आय्यः स्यात्। श्रवाय्यो यज्ञपशुः॥ दक्षाय्यो गरुडो गृध्रश्च॥ अयामंतेति णेरयादेशः। स्पृहयाय्यः स्पृहयालुर्नक्षत्रं च॥ गृहयाय्यो गृहस्वामी ॥

दधिषाय्यः ॥ ९७ ॥

अयं शब्दो निपात्यते। दधिपूर्वात्स्यतेराय्यः षत्वं च। दधिषाय्यो घृतं॥

वृञ एण्यः ॥ ९८ ॥

वृञ् वरणे ॥ अस्मादेण्यः। वरेण्यः श्रेष्ठः। णोपदेशप्रयोजनं वरेण्ययतेः क्विप् णिलोपाल्लोपयलोपा वरेण् इति णत्वश्रवणं यथा स्यात्। अन्यथा पदांतस्येति प्रतिषेधात् णत्वं न स्यादिति पुरुषोत्तमदेवः। इह प्रावृष एण्यः। पा° ४.३.१७.। इत्यणो ऽपवादात् ज्ञापकादन्यतो ऽप्येण्यस्य सद्भावात् शुश्रूषेण्यो वरेण्य इत्यपि साधयंति केचिदित्यपि देववृत्तौ ॥

स्तुवः केय्यश्छंदसि ॥ ९९ ॥

स्तौतेश्छंदसि विषये केय्यः स्यात्। कित्वाद्गुणाभावे सत्युवङादेशः। स्तुवेय्यः स्यात्पुरंदरः ॥

राजेरन्यः ॥ १०० ॥

राजतेरन्यः स्यात्। राजन्यो वह्निः। क्षत्रियजातौ तु राजश्वशुराद्यदिति यत्। राजन्ये ऽत्यस्वरितः ॥

शॄरम्योश्च ॥ १०१ ॥

शृणाति। रमयति ॥ आभ्यामन्यः। शरण्यं रमण्यमिति। देववृत्तौ सूत्रमिदं न दृश्यते ॥

अर्तेर्निच्च ॥ १०२ ॥

ऋ गतौ॥ अतो ऽन्यः स च निद्भवति। अरण्यं विपिनं। हिमारण्ययोर्महत्त्वे ङीषानुकौ। महारण्यमरण्यानीत्यमरः ॥

पर्जन्यः ॥ १०३ ॥

अयं शब्दो निपात्यते॥ पृषु सेचने। पर्षति वृष्टिं ददातीत्यन्यप्रत्ययः। षकारस्य चवर्गीयो जकारः। पर्जन्यः शक्रमेघयोः ॥

वदेरान्यः ॥ १०४ ॥

वदान्यस्त्यागिवाग्मिनोः। वादि. २७.। इत्यजयकोशः। गतो वदान्यांतरमित्ययं मे मा भूत्परीवादनवावतारः। ५. २४.। इति रघुः ॥

अमिनक्षियजिवधिपतिभ्यो ऽत्रन् ॥ १०५ ॥

अम गतौ। णक्ष गतौ। यज देवपूजादौ। वधिः प्रकृत्यंतरं। पत्लृ गतौ॥ एभ्यः पंचभ्यो ऽत्रन्। अमत्रं भाजनं॥ नक्षत्रं तारका। नभ्राण्नपान्नवेदा इत्यपि। पा° ६. ३. ७५.। व्युत्पत्त्यंतरं॥ यजत्रमग्निहोत्रं॥ वधत्रमायुधं॥ पतत्रं वाहनं। पतत्रं च तनूरुहमित्यमरः ॥

गडेरादेश्च कः ॥ १०६ ॥

गड सेचने॥ अस्मादत्रन्। गकारस्य ककारः। कडत्रं। उलयोरैकत्वस्मरणात्कलत्रं श्रोणिभार्ययोः। अम° ३. ४. १८०. ॥

वृञश्चित् ॥ १०७ ॥

वृञो ऽत्रन् चित् स्यात्। वरत्रा चर्मरज्जुः ॥

सुविदेः कत्रन् ॥ १०८ ॥

सुपूर्वाद्विदेः कत्रन्। सुविदत्रं कुटुंबकं ॥

कृतेर्नुम् च ॥ १०९ ॥

कृती छेदने ॥ अतः कत्रन् धातोर्नुमागमश्च। कृंतत्रं लांगलं ॥

भृमृदृशियजिपर्विपच्यमितमिनमिहर्येभ्योऽतच् ॥ ११० ॥

भृञ् भरणे। मृङ् प्राणत्यागे। दृशिर् प्रेक्षणे। यज देवपूजादौ। पर्व पूरणे। डुपचष् पाके। अम गतौ। तमु कांक्षायां। णम प्रह्वत्वे शब्दे। हर्य क्लांतौ गतौ च॥ एभ्यो दशधातुभ्यो ऽतच् स्यात्। भरतो राजभेदे स्यान्नटे रामानुजे ऽपि च ॥ मरतो मृत्युः ॥ दर्शतः सोमसूर्ययोः ॥ यजत ऋत्विक् ॥ पर्वतो गिरिः। पर्वतस्येयमिति पार्वती दुर्गा। पर्वताच्च। पा° ४.२.१४३.। पर्वतीयः ॥ पचतो ऽग्निः ॥ अमतो रेणुः ॥ तमतस्तृष्णापरः ॥ नमतः प्रभुः ॥ हर्यतो ऽश्वः ॥ बाहुलकान्मलतेरतच्। गौरादिनिपातनादुपधाया दीर्घत्वं। ङीष्। मालती। तथा च प्रयोगः। वर्णानां च यथा विप्रस्तीर्थानां जाह्नवी यथा। सुराणां च यथा विष्णुः पुष्पाणां मालती तथा ॥

पृषिरंजिभ्यां कित् ॥ १११ ॥

पृषु सेचने। रंज रागे॥ आभ्यामतच् किद्भवति। पृषतो मृगो विंदुश्च। पृषंति विंदुपृषता इत्यमरः॥ रजतं द्रव्यशुक्लयोरित्यनेकार्थवर्गो ऽमरः ॥

खलतिः ॥ ११२ ॥

अयं शब्दो निपात्यते। स्खल संचलने॥ अस्मादतच्। प्रत्ययांतस्येत्वं। धातुसकारलोपः। खलतिर्निष्केशशिराः। युवा खलतिः। पा° २.१.६७.। युवखलतिः ॥

शीङ्शपिरुगमिवंचिजीविप्राणिभ्यो ऽथः ॥ ११३ ॥

शीङ्। शप। रु। गम। वंचु। जीव। अन प्राणने प्रपूर्वः॥ एभ्यः सप्तधातुभ्यो ऽथः स्यात्। शयथो ऽजगरः॥ शपथः प्रत्ययकरणं॥ रवथः कोकिलः॥ गमथः पथिकः॥ वंचथो धूर्तः॥ जीवथ आयुष्मान्॥ प्राणथो बलवान्॥ अथप्रत्ययो ऽयमिति भाष्यं। तदुक्तं। के पुनश्चङादयः। चङ्ङन-जिङ्ङनिवथङ्नङ इति ॥

उपसर्गे वसेः ॥ ११४ ॥

वसतेः सोपसर्गादथः ॥ आवसथो गृहं। आवसथे वक्रकवितानमित्याचार्यकोशः ॥ संवसथो ग्रामः ॥ बाहुलकात् दृप्रमिदमिभ्यश्च ॥ दरथो दिक्षु प्रसरणं गर्तश्च ॥ प्रमथः प्रांतिः ॥ दमथो दांतिः ॥ प्रमथस्तु प्रमः प्रांतिर्दांतिस्तु दमथो दम इत्यमरः ॥

भृञश्चित् ॥ ११५ ॥

भृञो ऽथः स्यात्स च चित्। भरथो लोकपालः ॥

रुविदिभ्यां ङित् ॥ ११६ ॥

रौतेर्विदेश्चाथः स च ङिद्भवति ॥ रुवथः श्वा ॥ विदथो योगी ॥

अत्यविचमितमिनमिरभिलभिनभितपिपतिपनिपणिमहिभ्यो ऽसच् ॥ ११७ ॥

एभ्यस्त्रयोदशधातुभ्यो ऽसच्प्रत्ययो भवति ॥ अतसो वातः। गौरादित्वात् ङीष्। अतसी उमेति यस्याः प्रसिद्धिः ॥ अवसो राजा ॥ चमसः पिष्टवर्तिः स्यात्। २१५.। इति हारावली। गौरादित्वाच्चमसी ॥ तमसो ध्वांतं ॥ नमसो ऽनुकूलं ॥ रभसो वेगहर्षयोः। तस्य भावो राभस्यं ॥ लभसो वाजिबंधनं ॥ नभस आकाशं ॥ तपसश्चंद्रमा इति शब्दार्णवः। तपसस्तापसस्तप इति देववृत्तौ प्रमादः ॥ पतसः पक्षी ॥ पनसः कंटकिफलं ॥ महसं ज्ञानं ॥ बाहुलकादमेरप्यसच्। तस्य णित्त्वं च। धातोस्तुगागमश्च। णित्त्वाद्वृद्धिः। तामरसं पद्मं ॥ श्यतेर्धुक्। साध्वसं प्रतिभादयः ॥ कक्तेः कीकादेशश्च। कीकसमस्थि ॥ तरतेस्तरसं मांसमिति नृवर्गे ऽमरः ॥

वेञस्तुट् च ॥ ११८ ॥

वेञ् तंतुसंताने ॥ अस्मादसच् तुडागमश्च। बाहुलकादात्वाभावः। वेतसो वृक्षभेदः स्यात् ॥

वहियुभ्यां णित् ॥ ११९ ॥

वहतियौतिभ्यामसच् तस्य णित्त्वं च ॥ वाहसो ऽजगरे स्यातो यावसस्तृणसंततौ ॥

वयश्च ॥ १२० ॥

वय गतौ॥ अतो ऽसच् स्यात्स च पित्॥ वायसः काकः॥

दिवः कित् ॥ १२१ ॥

दीव्यतेरसच् कित् स्यात्॥ दिवसं पुंनपुंसकं॥

कृशृशलिकलिगर्दिभ्यो ऽभच् ॥ १२२ ॥

कृ विक्षेपे। शृ हिंसायां। शल गतौ। कल गतौ। गर्द शब्दे॥ एभ्यः पंचभ्यो ऽभच् स्यात्। करभो मणिबंधादिकनिष्ठांते तयोष्ट्रके। विश्व° भांत° १०.॥ शरभः पशुराजः। अष्टपादूर्ध्वनयन ऊर्ध्वपादचतुष्टयः। सिंहं हंतुं समायाति शरभो वनगोचर इति महाभारते॥ शलभः पतंगः॥ कलभः करिशावकः॥ गर्दभः खरः॥

ऋषिवृषिभ्यां कित् ॥ १२३ ॥

ऋषी गतौ। वृषु सेचने॥ आभ्यामभच् कित्स्यात्। ऋषभवृषभौ श्रेष्ठौ तथा गोपतिवाचिनौ। त्रिधा बद्धो वृषभो रोरवीति। ऋग्वे° ४.५८.३.। त्रिषु स्थानेषु बद्धस्त्रिधा बद्धः कंठ उरसि शिरसि। वृषभो वर्षणादिति। रोरवीति शब्दं करोतीति भाष्यं॥

रुषेर्निल्लुष् च ॥ १२४ ॥

रुष हिंसार्थः। अस्मादभच् निद्भवति लुषादेशश्च धातोः। लुषभो मत्तदंतिनि। किदित्यनुवृत्तेरगुणः॥

रासिवल्लिभ्यां च ॥ १२५ ॥

रासृ शब्दे। वल्ल संवरणे॥ आभ्यामभच्। रासभः खरः॥ वल्लभो दयितः॥

जृविशिभ्य झच् ॥ १२६ ॥

जृ वयोहानौ। विश प्रवेशने॥ आभ्यां झच्। जरंतो महिषः॥ वेशंतः पल्वलं॥ कलिंगे च बाहुलकाद्वदेः किंशब्दोपपदे झचि गौरादित्वात् ङीषि किंवदंती जनश्रुतिरिति साधितं॥ अर्हतेरपि झच्। अर्हंतः क्षपणको जिन इति विक्रमादित्यकोशः॥

रुहिनंदिजीविप्राणिभ्यः षिदाशिषि ॥ १२७ ॥

रुह। टुनदि। जीव। अनिः प्रपूर्वः॥ एभ्य आशिषि झच्। स च षिद्भवति। रोहंतो वृक्षभेदः॥ नंदंतः पुत्रः॥ जीवंत औषधं॥ प्राणंतो वायुः॥ षित्त्वात् स्त्रियां ङीष्। रोहंतीत्यादिरूपचतुष्टयं ॥

तॄभूवहिवसिभासिसाधिगडिमंडिजिनंदिभ्यश्च ॥ १२८ ॥

एभ्यो दशधातुभ्यो झजाशिषि विषये। स च षिद्भवति॥ तरंतः समुद्रः। तरंती नौका॥ भवंतः कालः॥ वहंतो वायुः॥ वसंत्यत्र मदनोत्सवा इति वसंत ऋतुभेदः॥ भासंतः सूर्यः॥ साधंतो भिक्षुः॥ गडिमंडी पर्यंतौ। तत्र गडेर्घटादित्वान्मित्त्वे मितां ह्रस्वः। अयामंतेति णेरयादेशः। गडयंतो जलदः॥ मंडयंतो भूषणं॥ जयंतः शक्रपुत्रः स्यात्। स्त्रियां जयंती पुष्पभेदः। विजयंतः शक्रः। तस्येदमित्यण्। वैजयंतः शक्रप्रासादः। ङीप्। वैजयंती पताका॥ नंदंतो नंदकः। अनाशिष्यपि यथा स्यादिति नंदेः पुनरुपादानं ॥

हंतेर्मुट् हि च ॥ १२९ ॥

हंतेर्झच्। धातोर्हिशब्दादेशः। प्रत्ययस्य मुडागमः॥ हेमंत ऋतुभेदः स्यात्। षिदित्यनुवृत्तेः स्त्रियां हेमंती। कथं हैमन्य ओषधयः। हेमंतशब्दपर्यायो हेमन्शब्दो ऽपि विद्यत इति सर्वत्राण् च तलोपश्च। पा° ४. ३. २२.। इत्यत्रोक्तं ॥

भंदेर्नलोपश्च ॥ १३० ॥

भदि कल्याणे। अतो झच् धातोर्नकारस्य च लोपः। भदंतः प्रव्रजितः॥

ऋच्छेरः ॥ १३१ ॥

ऋच्छ गतौ॥ अस्मादरप्रत्ययः स्यात्। ऋच्छरा वेश्या। अरन्निति प्रमाद इति पारायणीयं॥ बाहुलकाद्वदेरप्यरः। वदरः॥ कंदेर्नलोपश्च। कदरो विट्खदिरः। रलयोरैक्यात्कदलः। गौरादित्वात् स्त्रियां ङीष्। वदरी। कदरी। कदली॥ मंदरकंदरशीकरकोटरशबरसमरवर्वरवर्करकर्परपिंजरांबराडंबरजर्जरवल्लरकर्करनखरतोमरप्रभृतयो ऽपि बहुलवचनादेव साधनीयाः ॥

अर्तिकमिभ्रमिचमिदेविवासिभ्यश्चित् ॥ १३२ ॥

एभ्यः षड्भ्यो धातुभ्यो ऽरप्रत्ययश्चित्स्यात्॥ अररं कपाटं॥ कमरः

कामुकः ॥ भ्रमरः षट्पदः । भ्रमरः कामुके ऽपि स्यात् । २३४. । इति हारावली ॥ चमरो मृगभेदो बालव्यंजनं च । बाहुलकात् दीर्घत्वं च । चामरं चमरे ऽपि चेति भागुरिः ॥ देवरः पत्युः कनिष्ठभ्राता ॥ वसतेपर्यंतादरः । वासरं पुंनपुंसकं । अह्नो वासरसंगे । १३. २. । इति भट्टिर्भाषासमावेशः ॥

कुवः क्ररच् ॥ १३३ ॥

कु शब्दे ॥ अतः क्ररच् । कुररः पक्षिभेदः स्यात् । चक्रंद शीता कुररीव भूयः । १४. ६८. । इति शीताविलापे रघुः ॥

अंगिमदिमंदिभ्य आरन् ॥ १३४ ॥

अगि गत्यर्थः । मदी हर्षे । मदि स्तुत्यादौ ॥ एभ्य आरन् । अंगारं पुंनपुंसकं । अंगारो ऽलातभौमयोः । विश्व° रांत° १८८. ॥ मदारो वराहः ॥ मंदारः पारिजातकः । अम° २. ४. २. ६. । मंदेर्बहुलवचनादारुप्रत्ययो ऽपि भवति । पारिभद्रे तु मंदारुर्मंदारः पारिजातक इति शब्दार्णवः ॥

गडेः कड् च ॥ १३५ ॥

गडेरारन् कडादेशश्च धातोः । कडारः पिंगलः ॥

शृंगारभृंगारौ ॥ १३६ ॥

एतौ निपात्येते । शॄ हिंसायां । डुभृञ् ॥ आभ्यामारन् नुम् गुक् ह्रस्वश्च धातोर्यथाक्रमं । शृंगारो गजभूषायां रते नाट्यरसे ऽपि चेति शाश्वतः । पुंसः स्त्रियां स्त्रियाः पुंसि संभोगं प्रति या स्पृहा । स शृंगार इति ख्यातः क्रीडारत्यादिकारक इति सुवर्णरेखः ॥ भृंगारः कनकालुका । अम° २. ८. १. ३२. । स्त्रियां भृंगारी प्रसिद्धैव । भृंगारी चीरीका चीरी झिल्ली स्यात् झिल्लिका स्त्रियां ॥

कंजिमृजिभ्यां चित् ॥ १३७ ॥

कजि सौत्रो धातुः । मृजूष् शुद्धौ ॥ आभ्यामारन् चित्स्यात् । कंजारो मयूरो व्यंजनं च ॥ मृजेर्वृद्धिः । मार्जारो बिडालः । स्त्रियां मार्जारी । मार्जारीव शुनीव गृहिणी वाच्या किमन्यो जन इति दारिद्र्यवर्णनं ॥

कमेः किदुच्चोपधायाः ॥ १३८ ॥

कमु कांतौ ॥ अस्मादारन् कित्स्यादुकारश्चोपधायाः । चिदित्यनुवृत्तेरंतो-

दात्तत्वमिति न मु ने। पा° ८. २. ३.। इत्यत्र सूत्रे न्यासः। कुमारो युवराजे स्याच्छिशुषड्ढ्रक्रयोरपि॥ कुमारश्च। पा° ६. २. २६.। इत्यत्र स्वरसूत्रे न्यासकृता कुमार क्रीडन इत्यस्मात्पचाद्यचि कुमारशब्दो व्युत्पादितः। तदुपायांतरं दृष्टव्यं॥

तुषारादयश्च ॥ १३९ ॥

किदिति वर्तते। तुषारादयो निपात्यंते॥ तुष तुष्टौ। आरन्। तुषारं हिमं॥ कासृ शब्दकुत्सायां। कासारः सरः॥ सहेः सहार आम्रभेदः॥ कुष तर्केति चौरादिकत्वात्तर्कारः। डीप् तर्कादित्वात्तर्कारी॥

दीङो नुट् च ॥ १४० ॥

दीङ् क्षये॥ अस्मादारन् प्रत्ययस्य नुडागमश्च। दीनारः सुवर्णाभरणं। सूत्रमिदं सूतीवृत्तौ देववृत्तौ च न दृश्यते॥

सर्तेरपः षुक् ॥ १४१ ॥

सृ गतौ॥ अस्मादपः स्यात् षुगागमश्च धातोः। सर्षपो व्रीहिभेदः स्यात्। पृषोदरादित्वादिकारसहितो ऽपि रेफः साधुः। सरिषपः कटुस्नेहः कदंबः सर्षपो ऽपि चेति चंद्रव्याख्यानं॥

उषिकुटिदलिकचिखजिभ्यः कपन् ॥ १४२ ॥

उष दाहे। कुट कौटिल्ये। दल विदारणे। कच बंधने। खज मंथे॥ एभ्यः पंचभ्यः कपन्। उषपो वह्निसूर्ययोः॥ कुटपो मानभांडं॥ दलपः प्रहरणं॥ कचपं शाकपात्रं॥ खजपं घृतं॥

क्वणेः संप्रसारणं च ॥ १४३ ॥

क्वण शब्दार्थः॥ अतः कपन् धातुवकारस्य संप्रसारणं च। कुणपं मृतभेदः स्यात्। कुणपं स्वादतीत्यर्थे प्रेष इत्यनेन सूत्रेणापि कृते कौणपो राक्षसः ख्यातः॥

कपश्चाक्रवर्मणस्य ॥ १४४ ॥

क्वणतेरेव चाक्रवर्मणस्याचार्यस्य मतेन कपप्रत्ययः संप्रसारणं च। कुणपः स एव। स्वरे तु विशेषः॥

विटपपिष्टपविशिपोलपाः ॥ १४५ ॥

चत्वारो ऽमी कपप्रत्ययांता निपात्यंते॥ विट शब्दे। विटपो लता-

द्विपर्णसंचयः। विटपो ऽस्त्रियां स्तंबे ऽपीत्यमरः॥ विशतेर्बादेः षत्वं। प्रत्ययस्य तुट्। षत्वादिकार्यं। पिष्टपं भुवनं। त्रिपिष्टपः स्वर्गः॥ विशतेरेव प्रत्ययादेरित्वं। विशिपं मंदिरं॥ वलतेः संप्रसारणं। उलपं कोमलं तृणं॥ मंडपशब्दस्यात्र प्रमादजः पाठः। मडि भूषायां। मंडः। तं पिबति। मंडप इत्युपाध्यायसर्वस्वे व्युत्पादितत्वात्॥

वृतेस्तिकन्॥१४६॥

वृतु वर्तने॥ अस्मात्तिकन्। वर्त्तिका पक्षिभेदे स्यात्। श्येनो वर्त्तिकामुल्लापयते॥ वर्तका शकुनो प्राचां। पा॰ ७. ३. ४५. १.। इत्यकारस्येत्वे ऽविधेये वार्त्तिकारंभाद्वृतेण्वुल् वर्तिकेति च व्याख्यातत्वादस्यानार्षता लक्ष्यते॥

कृतिभिदिलतिभ्यः कित्॥१४७॥

कृती छेदने। भिदिर् विदारणे। लत सौत्रः॥ एभ्यस्तिकन् कित्स्यात्। कृत्तिका नक्षत्रं। स्त्रीभ्यो ढक्। पा॰ ४.१.१२०.। कार्त्तिकेयः॥ भित्तिका भित्तिरेव॥ लत्तिका गोधा। अवपूर्वादवलत्तिका॥

इष्यशिभ्यां तकन्॥१४८॥

इषु इच्छायां। अशू व्याप्तौ॥ आभ्यां तकन् कित्स्यात्॥ मृदस्तिकन्। पा॰ ५.४.३९.। इति ज्ञापकादनित्यत्वेन प्रत्ययस्यात्कात्। पा॰ ७.३.४४.। इतीत्वं न भवति। इष्टका तु प्रसिद्धैव। इष्टकेषीकामालेत्यादिना पूर्वपदह्रस्वत्व इष्टकचितं। पक्वेष्टकचितं॥ अष्टका पितृदैवत्ये सा च वैदिककर्मविशेषः। व्रीह्यादित्वादिनिः। अष्टकी॥ बाहुलकान्मस्यतेरपि तकन्। मस्तकं न स्त्रियां शीर्षे॥ डुधाञ्। धातकं। गौरादित्वात् ङीष्। धातकी धातृपुष्पिका। अम॰ २.४.४.१२.॥

इणस्तशत्तशसुनौ॥१४९॥

इणो धातोस्तशन्तशसुनौ प्रत्ययौ भवतः। नकारः स्वरार्थः। उकार उच्चारणार्थः॥ एतशो ब्राह्मणः॥ अत्वसंतस्येति। पा॰ ६.४.१४.। दीर्घः। एतशाः स एव। एतशसौ। एतशसः॥

वीपतिभ्यां तनन्॥१५०॥

वी गत्यादिषु। पत्लृ गतौ॥ आभ्यां तनन्। वेतनं भृतिः। वेतनादिभ्यो जीवतीति ठक्। वैतनिकः कर्मकरः॥ पत्तनं पुरभेदनं। अम॰ २.२.१.॥

दृदलिभ्यां भः ॥ १५१ ॥

दृ विदारणे। दल विकशने ॥ आभ्यां भः। दर्भः कुशः ॥ दल्भः स्यादृषिचक्रयोः ॥

अर्तिगृभ्यां भन् ॥ १५२ ॥

ऋ गतौ। गृ निगरणे ॥ आभ्यां भन्। इयर्तीत्यर्भः शिशुः। संज्ञायां कन्। अर्भकः स एव ॥ गर्भो जठरतत्स्ययोः। गर्भादप्राणिनीति तारकादित्वादितच्। गर्भिताः शालयः। प्राणिनि तु गर्भिणी ॥

इणः कित् ॥ १५३ ॥

एतेर्भन् किद्भवति ॥ इभो हस्ती। दंडादित्वाद्यः। इभ्य ईश्वरः ॥

असिसंजिभ्यां क्थिन् ॥ १५४ ॥

असु क्षेपणे। षंज संगे ॥ आभ्यां क्थिन्। अस्थि कीकसं। अस्थिनी। अस्थीनि ॥ कित्त्वान्नलोपः। सक्थि ऊरुदेशः कीकसं च। सक्थि क्लीबे पुमानूरुरित्यमरः। सक्थिनी। सक्थीनि ॥

प्लुषिकुषिशुषिभ्यः क्सिः ॥ १५५ ॥

प्लुष दाहे। कुष निष्कर्षे। शुष शोषणे ॥ एभ्यः क्सिः। प्लुक्षिर्वह्निः ॥ कुक्षिर्जठरं ॥ शुक्षिर्वातः ॥ भवार्थे दृतिकुक्षीति। पा° ४. ३. ५६.। ढञ्। कौक्षेयमसिमुपम्य चकारापनसं मुखं। ४. ३१.। इति भट्टिः ॥

अशेर्नित् ॥ १५६ ॥

अशू व्याप्तौ ॥ अतः क्सिर्निद्भवति। अक्षि नयनं। अक्षिणी। अक्षीणि। अक्ष्णा काणः। पा° २. १. ३०.। अव्ययीभावे शरत्प्रभृतिभ्यः। पा° ५. ४. १०७.। इत्यत्र सूत्रे प्रतिपरसमनुभ्योऽक्ष्ण इति वार्त्तिकेन टच् समासांतः। प्रत्यक्षं। परोक्षं। समक्षं। अन्वक्षं। परोक्षमित्यत्र तु परोक्षे लिट्। पा° ३. २. ११५.। इति निपातनादुत्वं। पंचमीतत्पुरुषोऽयं ॥

इषेः क्सुः ॥ १५७ ॥

इच्छतेः क्सुप्रत्ययः स्यात् ॥ इक्षुर्मधुतृणं स्मृतमित्युत्पलिनी ॥

अवितृस्तृतंत्रिभ्य ईः ॥ १५८ ॥

अव रक्ष पालने। तॄ प्लवने। स्तृञ् आच्छादने। तंत्रि कुटुंबधारणे। चुरादिपर्यंतः॥ एभ्य ईप्रत्ययः। अवीर्नारी रजस्वला॥ तरीर्नावि च भांडे च वस्त्रादिस्थितिहेतुके॥ स्तरीर्धूमः॥ णिलोपः। तंत्रीर्वीणादेर्गुणः॥

यापोः कित् द्वे च ॥ १५९ ॥

या प्रापणे। पा पाने॥ आभ्यामीः कित्स्यात् द्वित्वं च धातोः। ययी-रश्वः॥ पपीः स्यात्सोमसूर्ययोः। ययीपप्यावुभौ पुंसीत्यरुपादत्तः। शसि। ययीन्। पपीन्। ङौ। ययी। पपी॥

लक्षेर्मुट् च ॥ १६० ॥

लक्ष दर्शनांकनयोः। चुरादिपर्यंतः॥ अस्मादीप्रत्ययः। अस्य मुडागमः। णिलोपः। लक्ष्मीः पद्मा विभूतिश्च। कृदिकारादिति ङीषि लक्ष्मीत्यपि भवतीति दुर्घटे रक्षितः। लक्ष्म्या अश्वेति पामादिपाठात् नप्रत्ययो ऽकारांतादे-शश्च। लक्ष्मणः सुमित्रापुत्रो लक्ष्मणा सारसप्रिया॥

॥ इति महोपाध्यायजाजलीत्यपरनामधेयश्रीमदुज्ज्वलदत्तविरचितायामुणादिवृत्तौ तृतीयः पादः ॥ ३ ॥

वातप्रमीः ॥ १ ॥

अयं शब्दो निपात्यते ॥ वातशब्द उपपदे माङ् मान इत्यस्माद्धातोरीप्रत्ययः । स च किदित्यनुवृत्तेः किद्भवति । आतो लोपः । वातवत् प्रमाति प्रक्षिपतीति । वातप्रमीर्वातमृग इत्यमरः । वातमृगसाहचर्यान्नपुंस्त्वमस्येति के चित् । शसि वातप्रमीन् । ङौ तु वातप्रमी । अमि वातप्रमीं । योषिति वातप्रमीः समीरमृग इति गोपालितो वातपालितः । तदा तु शसि वातप्रमीरिति ङौ च नदीसंज्ञायां वातप्रम्यामिति । कृदिकारादिति ङीषि वातप्रमीति सुलोपो ऽपि भवतीति दुर्घटे रक्षितः । वातप्रमीः स्त्रीपुंसयोरिति सुभूतिचंद्रः । द्विचतुःषट्पदोरगाः । अम° ३. ६. ३७. । इति पुंस्त्वमस्य । चांद्रलिंगानुशासने ऽप्येतदेव व्यवस्थितमिति ॥ वश कांतौ । बाहुलकादतो ऽपीप्रत्ययो भवति संप्रसारणं च । उशीर्वांछा । तत्कुशला नरा अस्मिन्नित्युशीनरो जनपद इति सर्वस्वे व्युत्पादितं ॥

ऋतन्यंजिवन्यंज्यर्पिमद्यत्यंगिकुयुकृशिभ्यः कत्निच्यतुजलिजिष्णुजिष्ठजिसन्स्यनिथिनुल्यसासानुकः ॥ २ ॥

ऋ गतौ । तनु विस्तारे । अन्जू व्यक्तादौ । वनु याचने । अन्जू स एव । ऋ गतौ पर्यंतः । मदी हर्षे । अत सातत्यगमने । अगि गत्यर्थः । कु शब्दे । यु मिश्रणे । कृश तनूकरणे ॥ एभ्यो द्वादशधातुभ्यः कत्निच् यतुच् अलिच् इष्णुच् इष्ठच् इसन् स्यन् इथिन् उलि अस आस आनुक् इत्येते द्वादश प्रत्यया भवंति यथासंख्यं । कत्नीति ककारः कित्कार्यार्थः । धातोर्यणादेशः । बद्धमुष्टिः करो रत्निः सो ऽरत्निः प्रसृतांगुलिः ॥ तन्यतुर्वायू रात्रिश्च ॥ अंजलिः । तौ युतावंजलिः पुमानित्यमरः ॥ वनिष्णुरयाचनं ॥ अंजिष्ठो भानुः । के चिदंजतेरिष्णुच्प्रत्ययमिच्छंति । तेषामंजिष्णुरित्युदाहरणं ॥ अर्तिह्रीत्यादिना पुक् । अर्पिसो ऽग्रमांसं ॥ मत्स्यो मीनः ॥ अतिथिर्ना गृहागते । अम° २. ७. ३३. । अतिथी च स्त्रियामित्याहुः । बाहुलकादतो लोपे तिथिरित्यपि भवतीति वर्णविवेकः ॥ अंगुलिः करशाखा । रलयोरेकत्वस्मरणात् कृदिति च

ङीप्। अंगुरीवोरुगच्छता। अंगुलिशब्दस्यार्थे ऽगुलशब्दो ऽस्ति। तेन भूमेरप्यर्धमंगुलमिति सिध्यतीति तत्पुरुषस्यांगुलेः। पा° ५.४.८६.। इत्यत्र रक्षितः॥ कवसः संनाहः कंटकशातिश्च। केचिदच्प्रत्ययमिच्छंति। कवचं वर्म॥ यवासो दुरालभा॥ कृशानुरग्निः॥

शः करन्॥ ३॥

शृ हिंसायां॥ शतः करन्। उत्तरसूत्रे किद्ग्रहणात्ककारस्यात्र नेत्संज्ञा। शर्करा खंडविकृतिर्मृद्विकारे ऽपि वर्तते। चूर्णखंडे स्यात्। २०८.। इति हारावली॥

पुषः कित्॥ ४॥

पुष्यतेः करन् स च कित्॥ पुष्करं गगनपद्मवारिषु। पुष्करादिभ्यो देश इतीनिः। पुष्करिणी प्रसिद्धैव॥

कलंश्च॥ ५॥

पुष्यतेः कलन् कित्स्यात्। पुष्कलं प्रत्यग्रं॥

गमेरिनिः॥ ६॥

गच्छतेरिनिः। स च भविष्यति गम्यादयः। पा° ३.३.३.। इति भविष्यदर्थे। गमिष्यतीति गमी पथिकः॥

आङि णित्॥ ७॥

गच्छतेराङ्पूर्वादिनिः। स च णिद्भवति। णित्वाद्वृद्धिः। आगमिष्यतीत्यागामी॥

भुवश्च॥ ८॥

भवतेरिनिः। स च णिद्भवति। भविष्यतीति भावी॥

प्रे स्थः॥ ९॥

तिष्ठतेः प्रपूर्वादिनिर्णिच्च सः। णित्वादातो युक्। प्रस्थायी गंतुमनाः॥

परमे कित्॥ १०॥

तिष्ठतेः परमशब्द उपपद इनिः कित्स्यात्। हलदंतात्। पा° ६.३.९.। इत्यलुक्। स्थास्थिन्स्थॄणामिति षत्वं। परमेष्ठी पितामहः॥

मंथः ॥ ११ ॥

मंथ विलोडने ॥ अत इनिः कित्स्यात्। मथिन्। पथिमथ्यृभुक्षामात् इतो ऽत्सर्वनामस्थाने। पा॰ ७.१.८५.८६.। इत्येते विधयो यथाक्रमं। मंथाः। मंथानौ। मंथानः। मंथा मंथनदंडे च वज्रे वाते ऽपि च स्मृतः ॥

पतस्थ च ॥ १२ ॥

पत्लृ गतौ॥ अस्मादिनिस्थश्चांतादेशः। पूर्ववदात्वादिकं। पंथाः। पंथानौ। पंथानः। अपंथानं तु गच्छंतं सोदरो ऽपि विमुंचति। पथतः पचाद्यचि पथः। पथौ। पथाः। अदंतः पथशब्दो भारते पुंल्लिंगे दृश्यते। वाटः पथश्च मार्गश्चेति सुभूतिचंद्रः॥ इह ऋभवः क्षियंति वसंत्यस्मिन्नित्यन्येभ्यो ऽपि दृश्यते। पा॰ ३.२.१०१.१.। इति डः। ऋभुक्षः स्वर्गः। सो ऽस्यास्तीतीनिः। सिद्धमृभुक्षिन्निति। अत्रापि पूर्ववदात्वादिकं। ऋभुक्षाः। ऋभुक्षाणौ। ऋभुक्षाणः ॥

खजेराकः ॥ १३ ॥

खज मंथे॥ अस्मादाकप्रत्ययः। खजाकः पक्षिणि ख्यातः खजाका दर्विरुच्यते ॥ बाहुलकान्मंदेरप्याकप्रत्ययः। मंदाकानि स्रोतांसि। तान्यस्याः संति। मंदाकिनी वियद्गंगेति पारायणं। मंदमकितुं गंतुं शीलमस्या इति मंदाकिनीत्यपि व्युत्पत्त्यंतरं ॥

वलाकादयश्च ॥ १४ ॥

आकप्रत्ययांता निपात्यंते ॥ वल संवरणे। वलाका बकपंक्तिः स्याद्बलाका विसकंठिका। वलाकां कामुकीमाहुर्वलाकश्च बको मत इति शाश्वतः॥ मन ज्ञाने। मनाका हस्तिनी॥ पूञ् पवने। पवाका वात्या॥ शलाकांजनयष्टिका॥ पटाकः पक्षी॥ पिटतेर्गुणाभावः। शिवादित्वादण्। पैटाकः पक्षी॥ पताका वैजयंती ॥

पिनाकादयश्च ॥ १५ ॥

आकप्रत्ययांता निपात्यंते ॥ पा रक्षणे। धातोरित्वं नुम् च। पातीति पिनाकः। क्लीबपुंसोः पिनाकः स्याच्छूलशंकरधन्वनोरित्यनेकार्थे ऽमरः॥ तड आघाते। तडाका प्रभा॥ भदि कल्याणे। नलोपः। भदाकः कल्याणं॥ श्यैङ् गतौ। मुगागश्च। श्यामाकः॥ भा दीप्तौ नञ्पूर्वः। नभाकं नभः॥ पि-

पूल् संचूर्णने। पकारस्य पात्वं। धातोर्युगागमः। पिण्याकस्तिलकल्कः॥ तथा वृतेर्वृद्धिश्च। वार्ताकः। गौरादित्वाद्वार्ताकीति वर्णविवेकः॥ गुवतेः कुटादित्वाद्गुणाभावः। उवङ्। गुवाक इति धातुप्रदीपटीका॥

कषिदूषिभ्यमीकन्॥ १६॥

कष सिषेति दंडकः। दुष वैकृते पर्यंतः॥ आभ्यामीकन्। कषीका पक्षिजातिः॥ दूषीका नेत्रयोर्मलं। दोषो णौ। पा° ६.४.९०.। इत्यूत्वं। दूषिकापटलरुद्धलोचनेति गोपदंतः। दूषयतेश्च इरितीप्रत्ययः। दूषिः। कृदिति ङीष्। ततः स्वार्थे कः। पिचंडी दूषिका दूषी पिचोंडं तु दृशोर्मलमिति विक्रमादित्यकोशः॥

अनिहृषिभ्यां किच्च॥ १७॥

अन प्राणने। हृष तुष्टौ॥ आभ्यामीकन् कित्स्यात्। अनीकमस्त्रियां सैन्ये॥ हृषीकं विषयींद्रियं। अम° १.१.४.१७.। तदीश्वरो हृषीकेशो विष्णुः॥

चंकणः कंकण च॥ १८॥

कण शब्दार्थः॥ अस्माद्यङ्लुगंताद्दीकन् धातोः कंकणादेशश्च। घंटिकायां कंकणीका सैव प्रतिसरापि च। किंकिणी क्षुद्रघंटिकेति शब्दांतरं। उन्नालः किंकिणीनामिति भवभूतिः॥

शृपृवृञां द्वे रुक्चाभ्यासस्य॥ १९॥

शॄ पॄ वृञ्॥ एभ्य ईकन्। एषां द्विर्वचनमभ्यासस्य रुगागमश्च। शर्शरीको हिंस्रः॥ पर्परीको दिवाकरः॥ वर्वरीकः कुटिलकेशः॥

फर्फरीकादयश्च॥ २०॥

ईकनंता अमी निपात्यंते॥ स्फुर स्फुरणे। अस्माद्दीकन् धातोः फर्फरादेशश्च। फर्फरीकं किसलयं॥ दर्दरीकं वादित्रं॥ कर्करीकं शरीरं॥ तिमेर्मकारस्य उकारो ऽभ्यासस्य नुट् च। तिंतिडीको वृक्षजातिः। तेन संस्कृतमिति वर्तते। कोपधादण्। पा° ४.४.३—४.। तैंतिडीकं। तथा चंद्रः। सिंघानं ग्रहणी पुष्पं किंकिणीतिंतिडीकयोः। एवं तिंतिडाशब्दो ऽमरे न संगच्छते। उपदंशस्तृतीयायां। पा° ३.४.४७.। इति तितिडूयोपदंशं भुंक्त इति भाष्यप्रयोगात्। तिंतिडीत्यपि शब्दांतरमिति गोवर्धनः॥ चरेर्नुम्। चंचरीको भ्रमरः॥ मृङ् प्राणत्यागे।

मर्मरीको हीनजनः ॥ डुकृञ्। कर्करीका गलंतिका ॥ पुणतेः पुंडरीकं सितांभोजे सितपत्रे च भेषजे। व्याघ्रो ऽपि पुंडरीको ना पुंडरीको ऽग्निदिग्गज इति शाश्वतः ॥

ईषेः किद्ध्रस्वश्च ॥ २१ ॥

ईष गतौ ॥ अस्मादीकन् ह्रस्वश्च। कित्वाद्गुणाभावः। इषीका शरशलाका वीरणकाण्डिका च। इष्टकेषीति पूर्वपदह्रस्वत्वं च। इषीकतूलं। तस्मिन्नास्थदिषीकास्त्रं रामो रामावबोधितः। १२. २३. । इति रघुः ॥

ऋजेश्च ॥ २२ ॥

ऋज गतौ ॥ अस्मादीकन् कित्स्यात्। ऋजीक उपहतः ॥

सर्तेर्नुक्च ॥ २३ ॥

अत ईकन् कित्स्यात् नुगागमश्च। सृणीका लाला ॥

मृडः कीकन्कंकणौ ॥ २४ ॥

मृड सुखने ॥ अतः कीकन्कंकणौ प्रत्ययौ। मृडीको मृडः ॥ मृडंकणः शिशुः ॥ बाहुलकात्कायतेरपि कंकणप्रत्ययः। कायतीति कंकणः करभूषणं। अम° २. ६. ३. १. । इति ॥

अलीकादयश्च ॥ २५ ॥

कीकनंता अमी निपात्यंते ॥ अल भूषणादौ। अलीकं मिथ्या। विपूर्वात् व्यलीकं विप्रियं खेदश्च ॥ वल संवरणे। वलीकं पटलप्रांते ॥ वलतेर्मुगागमश्च। वल्मीकं पुंनपुंसकं ॥ वहतेर्वृद्धिश्च। वाहीको गोर्वाहश्च। सुप्रपूर्वादिणस्तुट् च। सुप्रतीको ऽग्निदिग्गजे ॥ एवमन्ये ऽपि ॥

कृतॄभ्यामीषन् ॥ २६ ॥

कृ विक्षेपे। तॄ तरणे ॥ आभ्यामीषन्। करीषो ऽस्त्री शुष्कगोमये ॥ तरीषो नौः ॥

शॄपॄभ्यां किच्च ॥ २७ ॥

आभ्यामीषन् कित्स्यात् ॥ इत्वरपरत्वे। शिरीषो वृक्षभेदः स्यात्। शि-

पूलृ संचूर्णने। पकारस्य पात्वं। धातोर्युगागमः। पिण्याकस्तिलकल्कः॥ तथा वृत्तेर्वृद्धिश्च। वार्ताकः। गौरादित्वाद्वार्ताकीति वर्णविवेकः॥ गुवतेः कुटादित्वाद्गुणाभावः। उवङ्। गुवाक इति धातुप्रदीपटीका॥

कषिदूषिभ्यमीकन्॥ १६॥

कष सिषेति दंडकः। दुष वैकृते पर्यंतः॥ आभ्यामीकन्। कषीका पक्षिजातिः॥ दूषीका नेत्रयोर्मलं। दोषो णौ। पा° ६.४.९०.। इत्यूत्वं। दूषिकापटलरुद्धलोचनेति गोपदत्तः। दूषयतेश्च इरितीप्रत्ययः। दूषिः। कृदिति ङीष्। ततः स्वार्थे कः। पिचंडी दूषिका दूषी पिचोंडं तु दृशोर्मलमिति विक्रमादित्यकोशः॥

अनिहृषिभ्यां किच्च॥ १७॥

अन प्राणने। हृष तुष्टौ॥ आभ्यामीकन् कित्स्यात्। अनीकमस्त्रियां सैन्ये॥ हृषीकं विषयींद्रियं। अम° १.१.४.१७.। तदीश्वरो हृषीकेशो विष्णुः॥

चंकणः कंकण च॥ १८॥

कण शब्दार्थः॥ अस्माद्यङ्लुगंताद्दीकन् धातोः कंकणादेशश्च। घंटिकायां कंकणीका सैव प्रतिसरापि च। किंकिणी क्षुद्रघंटिकेति शब्दांतरं। उत्तालः किंकिणीनामिति भवभूतिः॥

शृपॄवृञां द्वे रुक्चाभ्यासस्य॥ १९॥

शॄ पॄ वृञ्॥ एभ्य ईकन्। एषां द्विर्वचनमभ्यासस्य रुगागमश्च। शर्शरीको हिंस्रः॥ पर्परीको दिवाकरः॥ वर्वरीकः कुटिलकेशः॥

फर्फरीकादयश्च॥ २०॥

ईकनंता अमी निपात्यंते॥ स्फुर स्फुरणे। अस्मादीकन् धातोः फर्फरादेशश्च। फर्फरीकं किशलयं॥ दर्दरीकं वादित्रं॥ कर्करीकं शरीरं॥ तिमेर्मकारस्य उकारो ऽभ्यासस्य नुट् च। तिंतिडीको वृक्षजातिः। तेन संस्कृतमिति वर्तते। कोपधादण्। पा° ४.४.३—४.। तैंतिडीकं। तथा चंद्रः। सिंघानं ग्रहणी पुष्पं किंकिणीतिंतिडीकयोः। एवं तिंतिडाशब्दो ऽमरे न संगच्छते। उपदंशस्तृतीयायां। पा° ३.४.४७.। इति तिंतिड्योपदंशं भुंक्त इति भाष्यप्रयोगात्। तिंतिडीत्यपि शब्दांतरमिति गोवर्धनः॥ चरेर्नुम्। चंचरीको भ्रमरः॥ मृङ् प्राणत्यागे।

मर्मरीको हीनजनः ॥ डुकृञ्। कर्करीका गलंतिका ॥ पुणातेः पुंडरीकं सितांभोजे सितपत्रे च भेषजे। व्याघ्रो ऽपि पुंडरीको ना पुंडरीको ऽग्निदिग्गज इति शाश्वतः ॥

ईषेः किद्ध्रस्वश्च ॥ २१ ॥

ईष गतौ ॥ अस्मादीकन् ह्रस्वश्च। कित्त्वाद्गुणाभावः। इषीका शरशलाका वीरणाकाण्डिका च। इष्टकेषीति पूर्वपदह्रस्वत्वं च। इषीकतूलं। तस्मिन्नास्थदिषीकास्त्रं रामो रामावबोधितः। १२. २३.। इति रघुः ॥

ऋजेश्च ॥ २२ ॥

ऋज गतौ ॥ अस्मादीकन् कित्स्यात्। ऋजीक उपहतः ॥

सर्तेर्नुक्च ॥ २३ ॥

अत ईकन् कित्स्यात् नुगागमश्च। सृणीका लाला ॥

मृडः कीकन्कंकणौ ॥ २४ ॥

मृड सुखने ॥ अतः कीकन्कंकणौ प्रत्ययौ। मृडीको मृडः ॥ मृडंकणः शिशुः ॥ बाहुलकात्कायतेरपि कंकणप्रत्ययः। कायतीति कंकणः करभूषणं। अम° २. ६. ३. १.। इति ॥

अलीकादयश्च ॥ २५ ॥

कीकनंता अमी निपात्यंते ॥ अल भूषणादौ। अलीकं मिथ्या। विपूर्वात् व्यलीकं विप्रियं खेदश्च ॥ वल संवरणे। वलीकं पटलप्रांते ॥ वलतेर्मुगागमश्च। वल्मीकं पुंनपुंसकं ॥ वहतेर्वृद्धिश्च। वाहीको गौर्वाहश्च। सुप्रपूर्वादिणस्तुट् च। सुप्रतीको ऽग्निदिग्गजे ॥ एवमन्ये ऽपि ॥

कॄतॄभ्यामीषन् ॥ २६ ॥

कॄ विक्षेपे। तॄ तरणे ॥ आभ्यामीषन्। करीषो ऽस्त्री शुष्कगोमये ॥ तरीषो नौः ॥

शॄपॄभ्यां किच्च ॥ २७ ॥

आभ्यामीषन् कित्स्यात्॥ इत्त्वरपरत्वे। शिरीषो वृक्षभेदः स्यात्। शि-

रीषपुष्पाधिकसौकुमार्या। १.४१.। इति कुमारः॥ पुरीषं शकृत्। गवाश्वप्रभृतित्वान्मूत्रपुरीषं ॥

अर्त्तेर्नृत्तश्च ॥ २८ ॥

अर्त्त पर्त्त अर्त्तने॥ अत ईषन् स्यात्स च किदृतादेशश्च धातोः। अर्द्यते रसोऽस्मादित्यृतीषं पिष्टपचनमित्यमरः ॥

अंबरीषः ॥ २९ ॥

अयं शब्दो निपात्यते। अबि शब्दे॥ अस्मादीषन्। तस्यारुडागमः। अंबरीषमाकाशं स्वेदनी च। अंबरीषमिवाभाति मुखं ते महतात्मन। अंबरीषः पुमान् भ्राष्ट्रमिति गोपालितः। क्लीबेऽंबरीषं भ्राष्ट्रो नेत्यमरः ॥

कॄशॄपॄकटिपटिशौटिभ्य ईरन् ॥ ३० ॥

एभ्यः षड्भ्य ईरन् स्यात्॥ करीरो वृक्षभेदो वंशांकुरश्च॥ शीर्यत इति शरीरं प्राणिकायः॥ पूर्यतेऽनेनेति परीरं फलं॥ कटीरः कंदरो जघनदेशश्च॥ पटीरः कंदुकः कामः पटीरश्चंदनद्रुमः॥ शौटीरस्त्यागिवीरयोः। ब्राह्मणादित्वात् शौटीर्यं॥ हिडि गत्यनादरयोः। बाहुलकादतोऽपि च। हिंडत इतस्ततो गच्छतीति हिंडीरोऽब्धिकफः फेन इत्यमरः। दाडिमेऽपि च हिंडीरं। २७०.। इति हारावली॥ रूपरत्नाकर उपाध्यायसर्वस्वे च हिंडेरादेश्च उ इत्यभिधाय डिंडीर इत्यपि साधितं। तच्चिंत्यं॥ किर्मीरतूणीरजंबीरकुंभीरकुटीरादयोऽपि बाहुलकादेव बोद्धव्याः ॥

वशः कित् ॥ ३१ ॥

वश कांतौ॥ अस्मादीरन् कित्स्यात्। संप्रसारणादिकार्यं। उशीरं वीरणामूलं न स्त्री ॥

कशेर्मुट् ॥ ३२ ॥

कश इति सौत्रो धातुः॥ अस्मादीरन् तस्य मुडागमश्च। कश्मीरो देशभेदः। कश्मीरशब्दो गंतव्यपर्ययं व्यापितं। पा° ६.२.१३.। इत्यत्र स्वरसूत्रे पृषोदरादित्वात्साधितः सर्वस्वे त्वत्रैव सूत्रे। तत्पक्षांतरं द्रष्टव्यं ॥

कृञ उच्च ॥ ३३ ॥

करोतेरीरन् कित्स्यात् ऋकारस्योकारश्च ॥ कुरीरं मैथुनं ॥ कपिलिकादित्वाल्लत्वे कुलीरः कर्कटः ॥

घसेः किच्च ॥ ३४ ॥

घसेरीरन् कित्स्यात्। उपधालोपे कत्वं षत्वं च। क्षीरं पयः। क्षीरिणो वृक्षाः ॥

गभीरगंभीरौ ॥ ३५ ॥

एतौ निपात्येते॥ गच्छतेर्भकारांतादेशः। पक्षे नुमागमश्च। गभीरं गंभीरमगाधो गहनं च। कुर्वत्येव हि तूष्णीकां राजन् गंभीरवेपसः। लघवो घोषयंत्येव न तु कुर्वंति किं चनेति भागवृत्तिः। भवार्थे गंभीरात् ञ्यः। पा॰ ४.३.५८.। गांभीर्यं ॥

विषा विहा ॥ ३६ ॥

इमौ निपात्येते। षो ऽंतकर्मणि। ओहाक् त्यागे॥ आभ्यां विपूर्वाभ्यामाप्रत्ययः। विषा बुद्धिः॥ विहा स्वर्गः। स्वभावादनयोरव्ययत्वं ॥

पच एलिमच् ॥ ३७ ॥

पचेरेलिमच्प्रत्ययः। पचेलिमो वह्निरव्योः ॥

शीङो धुग्लग्वलञ्वालनः ॥ ३८ ॥

शीङ् स्वप्ने॥ अतश्चत्वारः प्रत्यया भवंति। शीधु मद्यं॥ शीलं स्वभावः॥ शैवलं जलनीली॥ शेवालं। शैवालमपि। बाहुलकाद्वकारस्य पकारः। शेपालं शैवलो न स्त्री शैवालो जलनीलिकेति शब्दार्णवः। शेवलसुपरीत्यर्थांतरे। पा॰ ५.३.८४. ॥

मृकणिभ्यामूकोकणौ ॥ ३९ ॥

मृङ् प्राणत्यागे। कण शब्दार्थः॥ आभ्यां यथाक्रममूकोकणौ॥ मरूको मृगः॥ काणूकः काकः ॥

वलेरूकः ॥ ४० ॥

वल संवरणे॥ अस्मादूकः। वलूकः पक्ष्युत्पलमूलं च ॥

उलूकादयश्च ॥ ४१ ॥

एते निपात्यंते ॥ वलेः संप्रसारणं । उलूकः । उलूकाविंद्रपेचकौ । सर्वस्वे तु ऊर्ध्वौ कर्णावस्यति पृषोदरादित्वात् दीर्घादिकमप्युलूक इति साधितं ॥ वदेर्यङ्लुगंतादूकः । वावदूकश्च वक्तरीति भागवृत्तिः । सर्वस्वे तु यजजपदशां । पा° ३.२.१६६.। इति बहुलवचनादन्यतो ऽपि भवत्यूकप्रत्यय इति कृत्वा वावदूक इति साधितं ॥ शमेन्नूको बुगागमश्च । शंबूको जलशुक्तिरसुरविशेषश्च । बाहुलकादुकप्रत्ययो बुगागमश्च । शंबूकः शंबुको ज्ञेयः पूर्वः कांतस्तु सर्वदा । ककारेण विना शेषो दृश्यते ग्रंथविस्तर इति शब्दार्णवः ॥ भल्ल परिभाषणे । भल्लूक ऋक्षः । पृषोदरादित्वाद्भल्लुक इत्यपि । तथा भलतेन्नूको वृद्धिश्च धातोः । भालूक इति शब्दार्णवः ॥ महेर्हकारस्य धकारः । मधूको वृक्षभेदः स्यात् ॥ तथा जंबूकबंधूकवास्तूकएलूकादयो ऽप्यत्रैव द्रष्टव्याः ॥

शलिमंडिभ्यामूकण् ॥ ४२ ॥

आभ्यामूकण् स्यात् । णित्वाद्वृद्धिः ॥ शालूकं मूलद्रव्यं ॥ मंडति वर्षासमयमिति मंडूको भेकः । पात्रेसमितादित्वात्कूपमंडूकः ॥

नियो मिः ॥ ४३ ॥

नयतेर्मिः स्यात् ॥ नयति चक्रमिति नेमिश्चक्रावयवः । नेमिः पृथिवी । समुद्रनेमिं पितुराज्ञयेति ॥ या प्रापणे । बाहुलकादतो ऽपि मिः । यामिः स्वसृकुलस्त्रियोः । जादि° १४.। इति चवर्गतृतीयादावजयकोशः ॥

अर्तेरूच्च ॥ ४४ ॥

अर्तेर्मिर्धातोरूकारादेशश्च ॥ ऊर्मिर्वा स्त्रियां तरंगः ॥

भुवः कित् ॥ ४५ ॥

भवतेर्मिः किद्भवति ॥ भवंति भूतान्यस्मिन्निति भूमिर्मही । अज्ञाते कः । पा° ५.३ ७३.। भूमिका । अन्यद्रूपैर्यदन्यस्य प्रवेशस्तत्र भूमिका । कृदिकारादिति ङीष् । भूमीपतिः ॥

अश्नोते रश्च ॥ ४६ ॥

अशू व्याप्तौ ॥ अतो मिः । धातो रशादेशः । रश्मिः किरणो रज्जुश्च ॥

दल्मिः ॥ ४७ ॥

दल विदारणे ॥ अतो मिः। दल्मिमिंद्रायुधं विदुः ॥

वीज्याज्वरिभ्यो निः ॥ ४८ ॥

वी गतौ। ज्या वयोहानौ। ज्वर रोगे ॥ पृषोदरादित्वात् णत्वं। वेणिः स्यात्केशविन्यासः। कृदिकारादिति ङीष्। प्रवेणी च स्त्रियामुभे इत्यमरः। तिस्रो वेण्यो ऽस्यामिति त्रिवेणिः। पूर्वपदादिति णत्वं ॥ ज्यानिः क्षतिः ॥ ज्वरत्वरेत्यादिनोठ्। जूर्णिः स्त्रीरोगः ॥ बाहुलकात् टुक्षु शब्दे। अतो ऽपि निः। क्षोणिः। कृदिकारादिति ङीष्। क्षोणी॥ डुक्रीञ्। क्रेणिः। क्रेणी। सस्यक्रेणी ॥

सृवृषिभ्यां कित् ॥ ४९ ॥

सरतेर्वृषेश्च निः कित्स्यात्॥ ऋवर्णाच्च। पा° ८.४.१.१.। इति णत्वं। सृणिः स्यादंकुशे पुमान्। आरक्षमग्नमवमथ्य सृणिं श्रिताग्रं। ५.५.। इति माघः। सृणिः स्त्रियामित्यमरे प्रमादपाठः। सृणिर्द्वयोरिति बोद्धव्यं॥ वृष्णिः क्षत्रियवैश्ययोः ॥

अंगेर्नलोपश्च ॥ ५० ॥

अगि गतौ॥ अतो निर्नलोपश्च धातोः। अग्निर्वह्निः। वृषाकप्यग्नीति। पा° ४.१.३७.। ङीप्। ऐकारान्तादेशः। अग्नायी हुतभुक्प्रियेत्यमरः॥

वह्निश्रिश्रुयुद्रुग्लाहात्वरिभ्यो नित् ॥ ५१ ॥

एभ्यो ऽष्टधातुभ्यो निप्रत्ययो भवति स च नित्॥ वह्निरग्निः॥ श्रेणिः पंक्तिः। निश्रेणिस्त्वधिरोहिणी। अम° २.२.१७.॥ श्रोणिः कटिप्रदेशः॥ योनिः। भगं योनिर्द्वयोरित्यमरः॥ द्रोणिः सेचनी जनपदविशेषे ऽपि॥ ग्लानिर्दौर्बल्यं॥ हानिरपचयः क्षयश्च। परिहाणिः। प्रहाणिः। कृत्यचः। पा° ८.४.२९.। इति णत्वं। यच्चोक्तमनमानेत्यादि। पा° ८.४.२९.१.। तत्परिगणनं तत्प्रमाद इत्यत्रैव रक्षितः॥ ज्वरत्वरेत्यादिनोठ्॥ तूर्णिर्मनः॥ बाहुलकात् शीङो ऽपि निप्रत्ययो ह्रस्वत्वं च। शिनिः क्षत्रियः॥ तथा म्लायतेरपि। म्लानिः। मा गान्म्लानिं मृणालीति। ९९.। सूर्यशतकं॥

घृणिपृश्निपार्ष्णिचूर्णिभूर्णि ॥ ५२ ॥

एते पंच निपात्यंते॥ घृ सेचने। निप्रत्ययः। गुणाभावः। घृणिः किरणः॥ स्पृशतेः सलोपः। पृश्निरल्पशरीरः॥ पृषेर्वृद्धिश्च। पार्ष्णिः पादतलं। उद्वेजयत्यंगुलिपार्ष्णिभागान्। १.११.। इति कुमारसंभवः॥ चरेरुपधाया उत्वं। चूर्णिः कपर्दकसंख्या। चूर्ण प्रेरणे। अशेषविद्यु तर्के चूर्णयति ध्वंसयति। अत इः। चूर्णिर्महाभाष्यं कपर्दकश्च। कृदिकारादिति ङीष्। चूर्णी कपर्दकशतमिति सुभूतिचंद्रः॥ बिभर्तेरुत्वं। भूर्णिर्धरणी॥ घूर्णिरप्यत्रेति रंतिदेवः॥

वृदृभ्यां विन् ॥ ५३ ॥

आभ्यां विन् स्यात्॥ वर्विर्घस्मरः॥ दर्विः सूपकारोपकरणद्रव्यं। स्त्रियां ङीष्। दर्वी। दर्वीकरो दीर्घपृष्ठो दंदशूको विलेशय इत्यमरः॥

जॄशॄस्तॄजागृभ्यः क्विन् ॥ ५४ ॥

जॄ वयोहानौ। शॄ हिंसायां। स्तॄञ् आच्छादने। जागृ निद्राक्षये॥ एभ्यः क्विन् स्यात्। किन्वादित्वं रपरत्वं च। जीर्विः पशुः॥ शीर्विर्हिंस्रः॥ स्तीर्विरध्वर्युः॥ जागृविर्नृपतिः॥

दिवो द्वे दीर्घश्चाभ्यासस्य ॥ ५५ ॥

दीव्यतेः क्विन्। द्विर्वचनं। अभ्यासस्य दीर्घः। वलि लोपः। दीदिविः स्वर्गभक्तयोः। दीदिविरस्त्रियामन्नं॥

कृविघृष्विच्छविस्थविकिकीदिवि ॥ ५६ ॥

एते क्विनंता निपात्यंते॥ डुकृञ्। कृविस्तंतुवायद्रव्यं॥ घृषु सेचने। घृष्विर्वराहः॥ छो। ह्रस्वत्वं च। छविर्दीप्तिः॥ तिष्ठतेर्ह्रस्वत्वं च। स्थविस्तंतुवायः॥ दीव्यतेः किकीपूर्वात्। स्मृतश्चाषः किकीदिवीरिति विक्रमादित्यकोशः। द्वितीयो ऽत्र दीर्घ इति वर्णविवेकः। जसि च। पा° ७.३.१०९.। इत्यत्र सूत्रे किकिपूर्वस्य दिवेर्धातोरिकारस्य दीर्घं कृत्वा किकिदीविर्व्याघ्र इत्युक्तं। बोपालितेन किकिदिवमहिकश्चाषः स्यादिति सर्वे ह्रस्वाः। मंत्रे तु चाषेण किकिदीविना। ऋग्वे° १०.९७.१३.। इति प्रयोगो ऽस्ति॥

पातेर्डतिः ॥ ५७ ॥

पा रक्षणे॥ अतो डतिः स्यात्। डित्वात् टिलोपः। पातीति पतिः

स्वामी। पतिना सिद्धे पृणाति पालयतीत्यर्थं डुविधानमिति पारायणं॥ बहुगणवतुडतीति। पा° १.१.२३.। वतुसाहचर्याड्डतिस्य डतेर्ग्रहणादस्य डतेर्संख्यात्वं। डति च। पा° १.१.२५.। इत्यत्र संख्याग्रहणानुवृत्तेरस्य षट्संज्ञाया अभावः। ततः पतय इति जसो लुक् न भवति ॥

शकेर्ऋतिन् ॥ ५८ ॥

शक्लृ शक्तौ॥ अस्मादृतिन्। शकृत् पुरीषं॥ बाहुलकात् यतेः कश्च। यकृत् कालखंडं। गवाश्वप्रभृतित्वान्मूत्रशकृत्। यकृन्मेदः॥

अमेरतिः ॥ ५९ ॥

अम गतौ॥ अस्मादतिः स्यात्। अमतिः कालः॥ बाहुलकात् वृततिर्व्रतती। मालतिर्मालती। स्थपतिरित्यादि ॥

वहिवस्यर्तिभ्यश्चित् ॥ ६० ॥

एभ्यो ऽतिश्चिद्भवति॥ वहतिः पवनः॥ वसतिर्गृहयामिन्योः स्त्रियामित्यमरः॥ अरतिः क्रोधः॥ बाहुलकादलतेरपि। अलतिर्गीतमात्रिका॥

अंचेः को वा ॥ ६१ ॥

अंचतेरप्यतिप्रत्ययः ककारश्चांतादेशो विकल्पेन॥ अंकतिर्वातः। अंचतिः स एव ॥

हंतेरंह च ॥ ६२ ॥

हंतेरतिः। अंहादेशश्च धातोः॥ हंति दुर्निमित्तमनयेत्यंहतिर्दानं। अंहतेरतिना सिद्धे निरुक्तार्थमेतत्। कलिंगास्तु अंहतेः क्तिनि ग्रहादित्वादिट्यंहितिशब्दमिच्छंति ॥

रमेर्नित् ॥ ६३ ॥

रमतेरतिर्निद्भवति॥ रमतिः कालकामयोः॥

सूङः क्रिः ॥ ६४ ॥

षूङ् सूतौ॥ अस्माद्धातोः क्रिप्रत्ययः स्यात्। गुणाभावः। सूरिः पंडितः। स्त्रियां सूरीति वर्णदेशना ॥

अद्रिशाद्रिभूशुभिभ्यः क्रिन् ॥ ६५ ॥

एभ्यः क्रिन्॥ अद्रिः पर्वतः। अद्रयो द्रुमशैलार्का इत्यमरः॥ शाद्रिः शर्करा ॥ भूरि प्रचुरं कांचनं। भौरिकः कनकाध्यक्षः। अम० २. ८. १. ७. ॥ शुभ्रिर्ब्रह्मा ॥

वंक्र्यादयश्च ॥ ६६ ॥

क्रिनंता एते निपात्यंते॥ वकि कौटिल्ये। वंक्रिर्वाद्यभेदो गृहदारु च॥ दुवप। संप्रसारणाभावः। वप्रिः क्षेत्रमिति नागवृत्तिः॥ अंह्रिरंघ्रिश्चरणः॥ तदिः सौत्रो धातुः। तंद्रिर्मोहः। विभज्य नक्तंदिवमस्ततंद्रिणा। कि० १. ९.। इति भारविः। कृदिकारादिति ङीष्। तंद्री॥ ञिभी। बाहुलकाद्गुणः। भेरिर्वाद्यविशेषः। रवः प्रगल्भाहतभेरिसंभव इति कुमारः। स्त्रियां भेरी। प्रोन्मादभेरीरवः ॥

राशदिभ्यां त्रिप् ॥ ६७ ॥

आभ्यां त्रिप्॥ रात्रिः क्षणदा। कृदिकारादिति ङीष्। रात्रीत्यपि। तिमिरपटलैरवगुंठिता रात्र्य इति॥ शात्रिः कुंजरः ॥

अदेस्त्रिनू ॥ ६८ ॥

अदेस्त्रिन् स्यात्॥ अत्रिर्मुनिभेदः। तस्यापत्यं। इतश्चानिञः। पा० ४. १. १२२.। इति ढक्। आत्रेयो मुनिरात्रेयी नदीभेदो रजस्वलेति धरणिः। गोवर्धनवृत्तौ तु अदेस्त्रिनिश्चेत्यदेस्त्रिन् स्यात्। नित्। चकारात्त्रिप्। निदिति वचनान्नकारस्य नेत्संज्ञा। अत्री। अत्रिणौ। अत्रिणः इति पापस्य नाम। अत्रिर्मुनिः। अदेस्त्रिन्निदिति पारायणीयं ॥

पतेरत्रिन् ॥ ६९ ॥

पतेरत्रिन् स्यात्॥ पतत्रिः। पतत्री। पतत्रयः। पक्षवाचकात्पतत्रशब्दान्मत्वर्थेनिना तु पतत्री। पतत्रिणौ। पतत्रिणः ॥

मृकणिभ्यामीचिः ॥ ७० ॥

आभ्यामीचिप्रत्ययः॥ मरीचिर्दीप्तिः॥ कणीचिः पल्लवी प्रोक्ता निनादेऽपि च दृश्यत इति रभसः ॥

श्वयतेश्चित् ॥ ७१ ॥

टुओश्वि ॥ अस्मादीचिश्चित्स्यात्। श्वयीचिर्व्याधिः ॥

वेञो डिच्च ॥ ७२ ॥

वेञ ईचिर्डिद्भवति ॥ वीचिस्तरंगः। नञ्समासे ऽवीचिर्नरकभेदः ॥

ऋहनिभ्यामूषन् ॥ ७३ ॥

ऋ। हन् ॥ आभ्यामूषन्। अरूषः सूर्यः ॥ हनूषो राक्षसः ॥

पुरः कुषन् ॥ ७४ ॥

पुर अग्रगमने ॥ अतः कुषन्। पुरुषः पुमान्। विभाषा पुरुषे। पा° ६. ३. १०६.। इति वा कोः कादेशः। कुपुरुषः। कापुरुषः। अन्येषामपि दृश्यते। पा° ६. ३. १३७. ॥ इति दीर्घः। पुरुषाः पूरुषा नराः। अम° २. ६. १. १. ॥

पॄनहिकलिभ्य उषच् ॥ ७५ ॥

एभ्यस्त्रिभ्य उषच् स्यात्॥ परुषं निष्ठुरं वचः ॥ नहुषो राजर्षिः। अधर्मादेव नहुषः प्रतिपेदे रसातलं। १. १४.। इति कामंदके। नहुषः खररोमा च शेषवासुकितक्षकाः इति विक्रमादित्यकोशे। नागराजविशेषे ऽपि नहुषः ॥ कलुषं पापं ॥

पीयेरूषन् ॥ ७६ ॥

पीय इति सौत्रो धातुः॥ अस्मादूषन्। बहुलवचनात्पक्षे गुणो ऽपि। स्मृतं पीयूषं पेयूषं नवक्षीरे ऽमृते ऽपि वा। सप्तरात्रप्रसूतायाः क्षीरं पयूषमुच्यत इति हारावली। पेयूषो ऽभिनवं पय इत्यमरः ॥ बाहुलकादंकेरप्यूषन्। अंकूषो नकुलः ॥

मस्जेर्नुम् च ॥ ७७ ॥

टुमस्जो शुद्धौ ॥ अत ऊषन् स्यान्नुमागमश्च धातोः स चाचो ऽन्त्यात्परः। सकारस्य जश्त्वं। दकारः। तस्य श्चुत्वं। जकारः। ततो जकारद्वयं। मंजूषा काष्ठमयं द्रव्यं ॥

गंडेश्च ॥ ७८ ॥

गंडेरप्यूषन् ॥ गंडूषो मुखपूरणं। २०६.। इति हारावली। गंडूषा

चमसी मसीत्यमरः। स्त्रियां लाक्षा च गंडूषा मंजूषा सह लिक्षयेति चंद्रगोमी। गंडूषो नापि कीर्तित इति वोपालितः॥

अर्तेररुः ॥ ७९ ॥

ऋ गतौ॥ अस्मादरुः। अररुरायुधं॥

कुटः किच्च ॥ ८० ॥

कुटतेररुः किद्वति॥ कुटरुर्वस्त्रगृहं। कित्प्रयोजनं चिंत्यं॥

शकादिभ्यो ऽटन् ॥ ८१ ॥

शक्नोत्यादिभ्यो ऽटन् स्यात्॥ शकटो ऽस्त्रियामित्यमरः। संक्रीडंति शकटानीति वृत्तिः। नडादित्वात् शाकटायनः॥ वृञ्। वरटः कीटभेदश्च वरटा हंसयोषिति॥ कंकिर्गत्यर्थः। कंकटः संनाहः॥ सृ गतौ। सरतीति सरटः कृकलासः॥ देवृ। देवटः शिल्पी॥ कंपतेर्नलोपश्च। कपटो माया॥ कर्कमर्ककर्पपर्पाणां सौत्रधातूनां कर्कटमर्कटकर्पटपर्पटाः॥ कक्ख हसने। कक्खटं कठिनमिति धातुप्रदीपः॥ चप सांत्वने। पृषोदरादित्वादेत्वं। चपेटचपटौ तले॥ मय गतौ। मयटः प्रसादे। मयटः। मयटौ॥ सर्वमिदं वर्णविवेके साधितं। एवमन्ये ऽपि करटादयो बोद्धव्याः॥

कृकदिकडिकटिभ्यो ऽंबच् ॥ ८२ ॥

उकृञ्। कदिकडी सौत्रौ धातू। कटे वर्षावरणयोः॥ एभ्यो ऽंबच्। करंबं व्यामिश्रं॥ कदंबो वृक्षभेदः॥ कडंबो ऽग्रभागः॥ कटंबो वादित्रं॥

कदेर्णित्पक्षिणि ॥ ८३ ॥

कदिः पूर्वोक्तः॥ अस्मादंबच् णिद्वति पक्षिणि वाच्ये। कादंबः कलहंसः स्यात्। अम° २.५.१.॥

कलिकर्द्योरमः ॥ ८४ ॥

कल संख्याने। कर्द कुत्सिते शब्दे॥ आभ्याममः। कलमः शालिभेदः॥ कर्दमः पंकपापयोः॥

कुणिपुल्योः किंदच् ॥ ८५ ॥

कुण शब्दोपकरणयोः। पुल महत्त्वे॥ आभ्यां किंदच्। कुणिंदः शब्दः॥

पुलिंदः शबरः ॥ बाहुलकादलतेरपि। अलिंदो भवनैकदेशः। यस्याममलिंदेषु न चक्रुरेव मुग्धांगना गोमयगोमुखानि। ३.४८.। इति माघः। प्रज्ञादित्वादणि दीर्घादिरप्ययं। गृहैकदेशे ऽप्यालिंद इत्यमरदत्तः ॥

कुपेर्वा वश्च ॥ ८६ ॥

कुप क्रोधे॥ अतः किंदच्। वा वकारो ऽंत्यादेशः। कुपिंदकुविंदौ तंतुवाये ॥

नौ षजेर्घथिन् ॥ ८७ ॥

षंज संगे॥ अतो निपूर्वात् घथिन्। घित्वात्कुत्वं। उपसर्गादित्यादिना। पा° ८.३.६५.। षत्वं। निषंगथिरालिंगकः ॥

उदयर्तेश्चित् ॥ ८८ ॥

उत्पूर्वादर्तेर्घथिन् चिद्वति। उदरथिः समुद्रः ॥

सर्तेर्णिच्च ॥ ८९ ॥

सर्तेर्घथिन् णिद्वति। सारथिर्यंता ॥

खर्जिपिंजादिभ्य ऊरोलचौ ॥ ९० ॥

खर्ज मार्जने। पिंज हिंसायां॥ खर्जादिपिंजादिभ्यो यथाक्रममूरऊलचौ प्रत्ययौ भवतः। खर्जूरो वृक्षभेदः स्यात्खर्जूरं रजते ऽपि च। स्त्रियां खर्जूरी॥ कृप्। कर्पूरो ऽस्त्री सुगंधिद्रव्यं। बाहुलकादत्र लत्वाभाव इति कृपे रो ल इत्यत्र वृत्तिः॥ धुनोतेः स्तुट् च। धुस्तूरः कनकाह्वयः। अम° २.४.२.५८.॥ वल्लूरशालूरमल्लूरकस्तूर्यादयः। एत ऊरांता निपात्यंते॥ वल्ल संवरणे। वल्लूरं शुष्कमांसे स्यादित्यमरः॥ शालूरो मंडूकः। एवं मल्लूरकस्तूरीप्र[भृतयो] ऽपि॥ पिंजादिभ्यः। पिंजूलं कुशवर्तिः॥ कचि दीप्तौ। कंचूलो ऽस्त्री स्त्रीगात्राभरणं॥ लंगेर्वृद्धिश्च। लांगूलं पुच्छं॥ तमेर्बुग्दीर्घत्वे। ताम्बूलं प्रसिद्धमेव॥ शॄ हिंसायां। शादेर्दगागमो वृद्धिश्च। शार्दूलो व्याघ्रः॥ दुनोतेः कुक् च। दुकूलं वस्त्रं॥ एवं कुसूलादयो ऽपि। कुस श्लेषणे। कुसूलो दंत्यसकारवानेव। कुसीदं च कुसूलं च मध्यदंत्यमुदाहृतं। शब्दभेद. १००.। इति ॥

कुवश्चट् दीर्घश्च ॥ ११ ॥

कु शब्दे ॥ अतश्चट्प्रत्ययो भवति दीर्घत्वं च धातोः। कूचः स्तनमतं-गते। स्त्रियां कूची चित्रलेखनिका ॥

समीणः ॥ १२ ॥

इणः सम्युपपदे चट् दीर्घश्च धातोः। समीचः समुद्रः। समीची हरिणी॥

सिवेष्टट् च ॥ १३ ॥

सीव्यतेश्चट्प्रत्ययष्टेत्त्वं च ॥ सूचो दर्भाङ्कुरः। स्त्रियां सूची प्रसिद्धैव। टित्त्वमनभ्युपगम्य गौरादित्वात्सूचीति महान्यासे ॥

शमेर्वन् ॥ १४ ॥

शमेर्वन्प्रत्ययः। शम्वो मुसललोहमुखं॥

उल्वादयश्च ॥ १५ ॥

वनंता एते निपात्यंते ॥ उच समवाये। चकारस्य लत्वं गुणाभावश्च। उल्वो गर्भः ॥ शुच शोके। पूर्ववत्सर्वं। शुल्वं ताम्रं ॥ नयतिवेत्योर्नुमागमो ह्रस्वत्वं च। निम्वो वृक्षभेदः॥ विम्वं मंडलमोषधिविशेषश्च। गौरादित्वात् ङीष्। विम्वी ओषधिविशेषः ॥ धन धान्ये। धन्वं धनुः। तद्योगाद्धन्वी धानुष्कः। के मम धन्विनो ऽन्ये। ३. १०.। इति कुमारसंभवः॥ त्रमु अदने। त्रम्वः कर्दमः। शिवादित्वात् त्राम्वः। तद्योगात्त्राम्ववान् ॥

स्थः स्तो ऽंबजवकौ ॥ १६ ॥

तिष्ठतेरंबजवकौ भवतो धातोश्च स्तादेशः ॥ स्तंबो गुच्छस्तृणादिन इत्यमरः ॥ स्तवकः पुष्पगुच्छः। तारकादित्वात्स्तवकितः ॥

शाशपिभ्यां ददनौ ॥ १७ ॥

शो तनूकरणे। शप आक्रोशे ॥ आभ्यां ददनौ। शादः कर्दमशष्पयोः। नडशादात् ड्वलच्। पा° ४.२.८८.। शाद्वलः ॥ पकारस्य बकारः। शब्दो निनादः। शब्दवैरेति। पा° ४.१.१७.। क्यङ्। शब्दायते शब्दं करोति। शाब्दिको वैयाकरणः ॥

अब्दादयश्च ॥ ९८ ॥

ददनंता अमी निपात्यंते ॥ अव रक्षणे । अब्दो ऽवसरमेघयोरित्यमरः ॥ कौतेर्नुम् । कुंदः पुष्पजातिः ॥ वृञो नुम् गुणाभावश्च । वृंदं समूहः ॥ कनी दीप्तौ । कंदं । कंदानि मूलसस्यानि विदुः कंदांस्तु शूकरान् ॥ तुंदेर्नुम् च । तुंदः स्थूलोदरं । तुंदपरिमृजः । तुंदिलः । तुंदी ॥ कंदतेरत्रैव निपातनात्ककंदो नृपविशेषः । तेन निर्वृत्ता काकंदी नगरी ॥

वलिमलितनिभ्यः कयन् ॥ ९९ ॥

एभ्यः कयन्प्रत्ययः ॥ वलयो ऽस्त्री हस्तभूषणं ॥ मलयः पर्वतः ॥ तनयः पुत्रः ॥ बाहुलकादामयगवयकिशलय इत्यादयो ऽपि दृष्टव्याः ॥

वृह्रोः षुग्दुकौ च ॥ १०० ॥

वृणोतिहरतिभ्यां कयन् यथाक्रमं धातोः षुग्दुगागमौ भवतः ॥ वृषय आश्रयः ॥ ह्रियते विषयैरिति हृदयं मनः । हृदयं लिखतीति हृदयस्य हृल्लेखयदण्लासेषु । पा° ६. ३. ५०. ५१. । हृल्लेखः । रावणांकपरिश्लिष्टा त्वं हृल्लेखकरी मम । २०. २२. । इति भट्टिः । वा शोके । हृच्छोकः । हृदयशोकः ॥

मिपीभ्यां रुः ॥ १०१ ॥

डुमिञ् । पीङ् पाने ॥ आभ्यां रुः । मेरुः सुमेरुर्हेमाद्रिः । अम° १. १. १. ४५. ॥ पीयते रसानिति पेरुरादित्यः ॥ बाहुलकात्पिबतेश्च । पारुः स एव । संवत्सरवपुः पारुः पेरुर्वासोर्दिनप्रणीरिति हट्टचंद्रः ॥

जन्वादयश्च ॥ १०२ ॥

रुप्रत्ययांता निपात्यंते ॥ जनी प्रादुर्भावे । नकारस्य तकारः । जत्रु स्कंधसंधिः । जत्रुणी । जत्रूणि ॥ शीङो ह्रस्वत्वं गुगागमश्च । शिग्रुः शोभांजनस्तरुः । विदादित्वादञि शैग्रवः ॥ तनेर्विपूर्वस्य । नकारस्य दकारः । वितद्रुर्नदी ॥ कवृ वर्णे । वकारस्य दकारः । कद्रुर्वर्णभेदः ॥ असु क्षेपणे । अस्रु नयनजलं । अश्नोतेरप्यश्रु तालव्यत्वात् । अश्रुत्वा अश्रुत्वाश्रु धरां त्यजतीति कीचकवधः । पंचमे पादे ऽश्वादयश्चेत्यपारायणीयं ॥ एवं चमूरुप्रभृतयो ऽप्यत्रैव दृष्टव्याः ॥

रुशादिभ्यां क्रुन् ॥ १०३ ॥

रु शब्दे । शदॢ शातने ॥ आभ्यां क्रुन् । रुरुर्मृगभेदः ॥ शातयतीति शत्रुः । निपातनाद्ध्रस्वत्वं च । प्रज्ञादौ शत्रुरिति पाठात् शत्रुरेव शात्रवः । विघ्नानं शात्रवान् रामं । ५. ८१. । इति भट्टिः ॥

जनिदाच्युसृवृमदिशमिनमिभृञ्भ्य इत्वन्त्वन्त्नप्क्रिन्शक्स्यठडटाटचः ॥ १०४ ॥

जनी प्रादुर्भावे । डुदाञ् । च्युङ् । सृ । वृञ् । मदि । शमु । णम । डुभृञ् ॥ एभ्यो नवभ्यो यथासंख्यं इत्वन् त्वन् त्नप् क्रिन् शक् स्य ठ उट अटच् इत्येते नवैव प्रत्यया भवंति । जनित्वौ मातापितरौ ॥ दात्वं यज्ञकर्म ॥ च्यौत्नं बलं ॥ सृपिरिंदुरंकुशश्च । सृवृपिभ्यां किदित्यत्रापि सृपिशब्दः साधितः ॥ वृश ओषधिः ॥ मत्स्यो मीनः । गौरादित्वात् ङीष् । मत्स्यस्य ङ्यामिति यलोपः । मत्सी । ङीषो ऽन्यत्र न यलोपः । मत्स्यान्या । यः प्रवर्तते । आद्युदात्तो ऽप्ययं साधितः ॥ शंठो ऽकृतदारः ॥ उित्वात् टिलोपः । नटो रंगोपजीवी ॥ भरटः कुलालः ॥

अन्येभ्यो ऽपि दृश्यंते ॥ १०५ ॥

अन्येभ्यो ऽपि धातुभ्य इत्वनादयो दृश्यंते ॥ पा पाने । पेत्वममृतं । कच बंधने । शक् । कच्छः कूलं ॥ सरटो वातः ॥ ध्यै । ध्यात्वं चिंता ॥ जुहोतेर्हौत्नो यजमानः ॥ लूञ् । लूनिर्व्रीहिः ॥ एवमन्ये ऽपि दृष्टव्याः ॥

कुसेरुंभोमेदेताः ॥ १०६ ॥

कुस श्लेषणे ॥ अस्मादुंभ उम ईद इत इत्येते चत्वारः प्रत्ययाः । कुसुंभं महारजने क्लीवमिति भाते ऽमरः ॥ कुसुमं पुष्पं ॥ कुसीदं वृद्धिजीविका । अम° २. ९. ४. ॥ कुसितो जनपदः ॥

सानसिवर्णसिपर्णसितंडुलांकुशचषालेल्वलपल्वलधिष्ण्यशल्याः ॥ १०७ ॥

दशैते निपात्यंते ॥ षणु दाने । असिप्रत्ययः । उपधावृद्धिः । सानसिर्हिरण्यं ॥ घृञो नुक् च । वर्णासिर्जलं ॥ पृ । पूर्ववत्सर्वं । पर्णासिर्जलगृहं ॥

तउ आघाते। तंडुलाः प्रसिद्धाः। गुणो ऽपि क्व चित् दोषायत इति भावः। तुषेणापि परित्यक्तस्तंडुलो न प्ररोहति॥ अकि लक्षणे। उशच्। अंकुशः सृणिः। अंकुशो ऽस्त्रीत्यमरः। संनिवेश्य कुशावत्यां रिपुनागांकुशं कुशं। १५. ९७.। इति रघुः। काशाकाशदशांकुशमिति तालव्यांते चंद्रगोमी॥ चष भक्षणे। आलच्। चषालो यूपकटकः। अम० २. ७. १८.॥ इल स्वप्ने। वलच्प्रत्ययः। गुणाभावः। इल्वलस्तारकाविशेषः। इल्वलास्तच्छिरोदेशे तारका निवसंति या इत्यमरः। पल। पल्वलमल्पसरः॥ जिधृषा। ष्यप्रत्ययः। अकारस्येकारः। धिष्ण्यं स्थाने च ऋक्षे च धिष्ण्यो ऽग्नौ धिष्ण्यमालय इति धरणिः॥ शलेर्यः। शल्यं वा पुंसि शंकुर्ना। अम० २. ८. २. ६१.। हृदि शल्यमिवार्पितं। ८. ८७.। इति रघुः॥

मूङ्शक्यविभ्यः क्लः॥ १०८॥

मूङ् बंधने। शक्लृ शक्तौ। अवि शब्दे॥ एभ्यः क्लप्रत्ययः। मूलं बुध्नो ऽंघ्रिनामकः। अम० २. ४. १. १२.॥ शक्लः प्रियंवद इत्यमरः। अम्लो रसविशेषः स्यादम्लो मुखस्य भावनं। वकाररहितो ऽपि मकारो ऽत्र। अम्लानवनशालानां पंक्तिरिति प्रलपात्॥

माछाससिसूभ्यो यः॥ १०९॥

माछाससिसृभ्यो यः॥ माया छद्म। अस्मायामेधेति। पा० ५.२.१२१.। विनिः। मायावी। व्रीह्यादित्वादिनिः। मायी। मायावान्। व्रजंति ते मूढधियः पराभवं भवंति मायाविषु ये न मायिनः। किरातार्जुनीय. १. ३०.। इति भारविः॥ छाया स्यादातपाभाव उत्कोचप्रतिबिंबयोः॥ सस्यं फले गुणे ऽपि च। सस्येन परिजातः। पा० ५. २. ६८.। सस्यको मणिः। सर्वगुणायुक्त इत्यर्थः॥ -वांतादेशः। सव्यं दक्षिणवामयोः॥ आहुलकादनितेरपि यः। अन्य इतरः। गहादित्वाच्छः। अवर्णन्यतीयास्यस्येति। पा० ६. ३. ९९.। च दुक्। अन्यदीयः॥ तथा सर्वादस्यतेरपि यः। समस्यार्थं इत्यत्र तु। अम० १.१.५.७.। समस्यशब्दं शकिसहोश्च। पा० ३. १. ९९.। इति चकारस्यानुक्तसमुच्चयार्थत्वात्साधयंतीति देवः॥

जनेर्यक्॥ ११०॥

जन जनने॥ अतो यक्प्रत्ययः। आत्मा वै पुत्ररूपेण जायते ऽस्यामिति

स्मृतः। जाया पत्नी। या जारवती तीवरजायेति गतप्रत्यागतं प्रश्नोत्तरजातिः। ये विभाषा। पा° ६. ४. ४३.। इत्यनेनैवात्वं। पक्षे जायेति संज्ञा गम्यते। जायाया निङ् समासांतः। पा° ५. ४. १३४.। युवजानिः। अन्यत्र जन्यं निर्वादयुद्धयोरिति रभसः॥

अघ्न्यादयश्च ॥ १११ ॥

यगंता अमी निपात्यंते॥ हंतेर्यक्। अडागमोपधालोपौ। अघ्न्यः प्रजापतिः। स्त्रियां टाप्। अघ्न्या माहेयीत्यमरः॥ संपूर्वाड्डाओ यक्। आतो लोपः। संध्या प्रसिद्धैव। संध्या सायंप्रतिज्ञयोरिति वासवदत्ताटीका। ईशानभूतिसंचय इव संध्योच्छलितः॥ कनी दीप्तौ। कन्या कुमारी। कन्यायाः कनीन च। पा° ४. १. ११६.। कानीनो व्यासकर्णयोः॥ बंध बंधने। बंध्याप्रसूता॥ कौतेर्डुक् च। कुड्यं भित्तिः॥ मनो ध च। मध्यं। मध्यान्मः। पा° ४. ३. ८.। मध्यमः। मां ध्यायतीति मह्यमिति धातुपारायणीयं॥ वहेर्वह्यं। तिकादित्वाद्वाह्यायनिः॥ एवमहल्याऽऽख्यकश्यप्रभृतयो द्रष्टव्याः॥

स्नामदिपद्यर्तिपृशकिभ्यो वनिप् ॥ ११२ ॥

स्ना। मदी। पद्। ऋ। पृ। शक्लृ॥ एभ्यः षड्भ्यो वनिप्। स्नावा रसिकः। स्नावानौ। स्नावानः॥ मद्वा शिवः॥ पद्वा पंथाः॥ अर्वा तुरगगर्ह्ययोरित्यमरः। अर्वाणौ। अर्वाणः। अर्वणस्त्रसावनञः। पा° ६. ४. १२७.। अच्छंदसि। अर्वंतौ। अर्वंतः। भाष्ये तु छांदसत्वमस्योक्तं। स्त्रियामर्वती॥ पर्व ग्रंथिः प्रस्तावश्च॥ शक्वा हस्ती। वनो र च। पा° ४. १. ७.। इति ङीब्रेफौ। शक्वरी नदी॥

शीङ्क्रुशिरुहिजिक्षिसृधृभ्यः क्वनिप् ॥ ११३ ॥

एभ्यः सप्तभ्यः क्वनिप्॥ शीवाजगरः। स्त्रियां शीवरी गोधा॥ क्रुश्वा शृगालः॥ रुह्वा वृक्षः॥ जयतेस्तुडागमः। जित्वा जेता जित्वरश्च॥ क्षित्वा वायुः॥ सृत्वा प्रजापतिः॥ धृत्वा विष्णुः॥ स्त्रियां जित्वरीत्यादि बोद्धव्यं॥

ध्याप्योः संप्रसारणं च ॥ ११४ ॥

ध्यै चिंतायां। प्यैङ् वृद्धौ॥ आभ्यां क्वनिप् संप्रसारणं च धातोः। हलः। पा° ६. ४. २.। इति दीर्घः। धीवा कर्मकारः। स्त्रियां धीवरी मत्स्याधानी॥ पीवा स्थूलः। पीवरी तरुणी॥

अदेर्ध च ॥ ११५ ॥

अदेः क्वनिप् धकारश्चांतादेशः ॥ अध्वा मार्गः । अध्वनो ऽलंगाम्यर्थे यदीनौ । अध्वन्यः । अध्वनीनः । अंतात्यंतेति । पा° ३.२.४८. । डः । अध्वगः ॥

प्र ईरशदोस्तुट् च ॥ ११६ ॥

ईर गतौ । शदॢ शातने ॥ आभ्यां प्रपूर्वाभ्यां क्वनिप् तुडागमश्च ॥ प्रेत्वा सागरः । प्रेत्वरी ॥ प्रशत्त्वा स एव । प्रशत्त्वरी नदी ॥

सर्वधातुभ्य इन् ॥ ११७ ॥

यथादर्शनमिन् स्यात् ॥ डुपचष् । पचिरग्निः ॥ तुडि । तुंडिः । तद्योगात्तुंडिभः ॥ वलतेर्वलिः । वलिभः ॥ वटिः । वटिभः । तुंडिवलिवटेर्भः । पा° ५.२.१३९. । महाराजो वलिः । वलीत्यपि स्त्रियां । तद्युक्तं मुखमस्येति वलीमुखः । तिसृणां वलीनां समाहारस्त्रिवलि त्रिवली च ॥ मण । मणिः । मणी । कंकणमणीजल्पाकयोर्वचः । स्थूलादित्वात्प्रशंसायां कन् । मणिकः । तदेव माणिक्यं । पक्वदाडिमबीजाभं माणिक्यं शिखरं विदुः ॥ वह्लिः । वह्लिका नाम क्षत्रिया जनपदश्च । कोपधादण् । पा° ४.२.१३२. । वाह्लिकं कुंकुमं ॥ यज । यजिः । अग्नौ द्विजान्देवयजीन्निहन्मः । २.३४. । इति भट्टिः ॥ कनी दीप्त्यादौ । बाहुलकात् चुकुदीर्घौ । कांचिः । समादधे कांचिमकुंचयं कचानित्यभिनंदः । स्त्रियां कांची दामनि बद्धघर्घरस्वेति गोवर्धनः ॥ गडि । गंडिः ॥ तड । तडिः ॥ गल । गलिर्वल्लवी ॥ ध्राडृ । ध्राडिः पुष्पचयः ॥ काशृ । काशिः । वृद्धेत्कोशलादित्वात् ञ्यङ् । काश्यो । काशयः क्षत्रियाः । तेषां निवासो ऽण् । काशयो देशः । काशिषु जातो भव इति ठञ्ञठौ । काशिकः । काशिका । काशिविषयांतःपातित्वाद्वाराणस्यास्तत्र भवत्वेन काशिषु भवेति सारसंग्रहवृत्तिः काशिका ॥ वासृ । वासिः काष्ठभेदिनी ॥ घट । घटिः । घटी । अघटिः कस्य चिन्नाम । आघटिस्थानं ॥ यती । यतिः । यतिर्वसिष्ठो यतिनां वरिष्ठः । यतीनां निवासो मठः ॥ मल मल्ल । मल्लिः । मल्ली च । कुटजमल्ली । संज्ञायां कनि मल्लिका ॥ केलृ । केलिः क्रीडा । केलिः प्रयोजनमस्येति कैलः । आसते ऽस्मिन्नित्यासः । कैलश्चासावासश्चेति कैलासः । कृष्णसर्पवन्नित्यसमासः ॥ वदि । वंदिः । वंदी च । ता एव वंदीस्त्रियः ॥ मसी परिमाणे । मसिः पत्रांजनं मेला । मेलानंदो मसिमणिः । २१२. । इति हारावली । तत्रैव स्त्रियां मसी

पात्रांजनं। मसिर्नापीति रभसकोशः। अरूपादन्नो ऽपि। इषुमृत्युमसयो द्वयोः॥ कुट। कोटिरग्रभागः। बाहुलकादत्र गुणः॥ जट। जटिः। धूर्जटिः॥ कट। कटिः॥ हल। हलिः॥ हिल। हेलिः। प्रहेलिः॥ बुध। बोधिः। महाबोधिः॥ पण। पणिः। त्रिपणिः पणयत्रोथिका। अम° २. २. २.॥ कलंते स्पर्धमाना भावंते ऽस्मिन्निति कलिर्विग्रहः। तत्कारणत्वात्कलिर्युगं॥ टुनदि। नंदिर्वृद्धिः। वितर्दिवेदिनंदय इति शबरस्वामी। आनंदे ऽपि च नंदिः स्त्री पुंसि स्याद्गणनायक इति वर्णविवेकः। आवश्यके णिनिः। ईशानानुचरो नंदी तु वात्स्यायनः। कृदिति ङीष्। नंदीमुखाः पितरः प्रीयंतामिति पारायणीयं॥

हृपिषिरुहिवृतिविदिछिदिकीर्तिभ्यश्च ॥ ११८ ॥

हरत्यादिसप्तभ्य इन् स्यात्॥ हरिर्विष्णावहाविंद्रे भेके सिंहे हये रवौ। चंद्रे कीरे प्लवंगे च यमे वाते हरिः स्मृतः। हरिहयो हर्यश्वः। हरिपोतो हरितः। संज्ञायां कन्। हरितको। गौरादित्वात् ङीष्॥ पेषिर्वज्रं॥ रोहिर्व्रती॥ वर्तिर्दीपोपकरणं॥ विद्यते पुण्यमस्यामिति वेदिः परिष्कृता भूमिः। अम° २. ८. १७.॥ छेदिर्वर्धकिश्छेत्ता च॥ कृत संशब्दने। इरादिकार्यं। कीर्तिः स्यात्पुण्ययशसोः॥

इगुपधात्कित् ॥ ११९ ॥

इगुपधाद्धातोरिन् कित्स्यात्॥ कृष विलेखने। कृषिः कर्षणं। कृषी। कृषिरभूत्फलवत्यजनंदने। रघु° १. ४.॥ ऋषी गतौ। ऋषिर्वसिष्ठादिः॥ रुचिर्दीप्तिः॥ शुचिः शुद्धिः॥ लिप उपदेहे। लिपिः। बाहुलकाद्वत्वं च। लिविः। दिवाविभानिशाप्रभेत्यादिना। पा° ३. २. २१.। टः। लिविं करोति लिविकरः॥ तूल निष्कर्षे। तूलिः। तूली कूर्चिका॥ एवमन्ये ऽपि द्रष्टव्याः। इगुपधात्किरिति प्रमादपाठः स्वरे विशेषादिति भाष्यं॥

भ्रमेः संप्रसारणं च ॥ १२० ॥

भ्राम्यतेरिन् कित्संप्रसारणं च॥ भृमिर्वातः। भ्रमिरित्यपि बाहुलकात्॥

क्रमितमिशतिस्तंभामत इच्च ॥ १२१ ॥

क्रमु पादविक्षेपे। तमु कांक्षायां। शतिस्तंभौ सौत्रौ॥ एभ्यश्चतुर्भ्य इन् कित्। एषामत इकारादेशः॥ क्रिमिः क्षुद्रजंतुः। पामादित्वात् क्रिमिणः।

यवादित्वात् क्रिमिमान्। कृमिरित्यपि संप्रसारणानुवृत्तेरिति केचित्। लुपंति कीटकृमयः परितस्तथैव इति सागरनंदी नागार्जुनप्रयोगश्च। कृमिभवं कार्मिमित्यादि वर्णविवेके विस्तरेण दर्शितं॥ तिमिर्मत्स्यभेदः स्यात्॥ श्चितिर्मेचकशुक्लयोः॥ स्तिभिः समुद्रः॥

मनेरुच्च ॥ १२२ ॥

मन्यतेरिन् किदुकारश्चाकारस्य॥ मन्यते जानातीति मुनिर्वसिष्ठादिः। मुनिरियं ब्राह्मणी। बह्वादित्वान्मुनी। मुनेर्भावः कर्म वा। इगंतादित्यण्। मौनं सर्वार्थसाधकं॥

वर्णेर्वलिश्चाहिरण्ये ॥ १२३ ॥

वर्णिः सौत्रो धातुः॥ अत इन् कित्। धातोर्वलिरित्ययमादेशः। करोपहारयोः पुंसि बलिः प्राण्यंगजे स्त्रियामित्यमरः। चतुर्थी तदर्थेति। पा° २.१.३६.। यज्ञवलिः। देववलिः। हिरण्ये तु वर्णिः सुवर्णं॥

वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ् ॥ १२४ ॥

एभ्यो दशभ्य इञ्॥ वासिश्छेदनवस्तुनि॥ वापिरुदकाधारः। स्त्रियां कृदिति ङीष्। वापी प्रसिद्धा॥ याजिर्यष्टा॥ राजिः पंक्तिः। ङीष्। राजी। वप्रकरणे ऽन्यत्रापि दृश्यते वप्रत्ययः। पा° ५.२.१०९.४.। राजीवं पद्मं। राजीवराजीवशलोलभृंगं। ४.१.। इति माघः॥ व्राजिर्वातालो॥ सादिः सारथिः॥ घातिः पक्षिबंधनी स्यात्। निवातिर्लोहघातिनी॥ वाशृ शब्दे। वाशिरग्निः॥ वदेर्ण्यंताद्वादिर्विद्वान्। बहुलवचनादण्यंतादपीञ्। वदंतीति वादयो वाचका इति भृवादिसूत्रे न्यासः॥ वृणोतेर्ण्यंताद्वारिर्गजबंधनी। जले तु क्लीबं। आवारिर्हट्टवेश्मस्विति शब्दार्णवः॥ बाहुलकाद्वञो ऽपि। हारिः पथिकसंहती। संप्रहारिः॥ खटतेः खाटिः शुष्कव्रणस्थानं। कुखाटिः स्यादसंग्रहः॥

णहो भश्च ॥ १२५ ॥

णह बंधने॥ अत इञ् भश्चांतादेशः। नाभिः स्यात् क्षत्रिये पुंसि नाभिः प्राण्यंगजे स्त्रियां। ङीष्। नाभी। पूर्वं नाभेः कायस्येति नात्र नाभिरेकदेशिनीति न्यासः। नाभिशब्दः पुंल्लिंगो ऽप्ययं प्राण्यंगे गतानुगमात्प्रयुज्यते।

तथा च किरातकाव्यं। समुच्छ्वसत्पंकजकोशकोमलैरुपाहितश्रीण्युपनीविनाभिभिः। ८. २४.। अत एव मृगनाभिर्मृगमदः कस्तूरी चेति मृगनाभिशब्दस्य पुंस्त्वमित्यमरकोशटीकायां दर्शितं। गवादिषु नाभि नभं चेति पाठाद्धितार्थे यत्। नभ्यं तैलं। सिध्मादित्वान्नाभिलः। अजिति। पा° ५. ४. ७५.। योगविभागेन ससमासांतः पद्मनाभः॥

कृषेर्वृद्धिश्छंदसि ॥ १२६ ॥

कृषतेरिञ् वृद्धिश्च धातोः॥ कार्षिरग्निः। भाषायां तु कृषिः॥

शॄः शकुनौ ॥ १२७ ॥

शृणातेः शकुनौ वाच्य इञ्॥ शारिः पक्षी। शारिका। शुकशारिकं। विभाषा वृक्षमृगेति। पा° २. ४. १२.। पक्ष एकवद्भावः। क्लीबत्वं। शारिस्तु पाशके पुंसि। परिणायेन शारीन्हंतीति शारिका वृत्तिः। शकुनेरन्यत्र शरिर्हिंस्रः। कपिलिकादित्वाल्लत्वं। शालिः। दुःसहो ऽपिशलिः। बाह्वादित्वादिञ्। आपिशलिः॥

कृञ उदीचां कारुषु ॥ १२८ ॥

कृञ उदीचां मतेन कारुषु वाच्येष्विञ्॥ कारिः शिल्पी। शिल्पिनो ऽन्यत्र करिः॥

जनिघसिभ्यामिण् ॥ १२९ ॥

जनी। घस्लृ॥ आभ्यामिण्। जनिवध्योश्चेतीणो वृद्धिप्रतिषेधः। जनिर्जननं॥ घासिरग्निः॥ बाहुलकात् शलतिपलतिभ्यां च। शालिपाली स्त्रियामुभे इति वाचस्पतिः॥ प्रत्ययांतरकरणं स्वरार्थं॥

अज्यतिभ्यां च ॥ १३० ॥

आजिः संग्रामः॥ आतिः शरातिपक्षी। शोभन आतिः स्वाती नक्षत्रं॥

पादे च ॥ १३१ ॥

पादे चोपपदे ऽज्यतिभ्यामिण्॥ पादस्य पदाज्यातिगोपहतेषु। पा° ६. ३. ५२.। इति पदादेशः। बहुलवचनादजेर्वीभावाभावः। पदाजिः पदातिः पदग उच्यते॥

अशिपणाय्यो रुडायलुकौ च ॥ १३२ ॥

अशू व्याप्तौ। पण व्यवहारे आय्यप्रत्ययांतः ॥ आभ्यामिण्। अनयोर्यथाक्रमं रुडायलुकौ च भवतः। राशिः पुंजः ॥ पाणिः करः ॥

वातेर्डिच्च ॥ १३३ ॥

वातेरिण्प्रत्ययो भवति डिच्च। डित्वात् टिलोपः ॥ वातीति विः पक्षी। स्त्रियां वीत्यपि। बहुवि ज्ञयति वनं। अटंति वयो ऽस्यामित्यटविः। पदस्य विः पदविः। कृदिति ङीष्। पदवी। वेञो डिचेत्युपाध्यायसर्वस्वं ॥

प्रे ह्वरतेः कूपे ॥ १३४ ॥

प्रपूर्वाद्धरतेः कूपे वाच्य इण्। स च डित्। प्रहिः कूपः। कूपादन्यत्र हरिः ॥

नौ व्यो यलोपः पूर्वस्य च दीर्घः ॥ १३५ ॥

व्येञ् संवरणे ॥ अस्मान्निपूर्वादिञ्। धातोर्यलोपः। निशब्दस्य दीर्घत्वं ॥ नीविर्वासोबंधनी। स्त्रियां ङीष्। नीवी। नीवीं प्रति प्रणिहिते तु करे प्रियेण। नीवी मूलधनमपीत्यमरः ॥ वसिवपियजिराजिव्रजिसदिहनिवाशिवादिवारिभ्य इञ् इयत इञ् इत्यत्रानुवर्तते। न त्विण्। उत्तरत्रोदात्तवचनात् ॥

समाने ख्यः स चोदात्तः ॥ १३६ ॥

ख्या प्रकथने ॥ अतः समान उपपद इञ् स चोदात्तः। समानस्य सभावः। टिलोपयलोपौ। सावनङादिकार्यं। सखा मित्रसहाययोः। सखायौ। सखायः। सखाल्पो ऽसखा। अल्पार्थे नञ्। यवालवणं व्यंजनं। किंचिल्लवणसहितमित्यर्थः। एवं च। तत्सादृश्यमभावश्च तदन्यत्वं तदल्पता। अप्राशस्त्यं विरोधश्च नञर्थाः षट् प्रकीर्तिताः ॥ सखिना वानरेंद्रेण वानरैश्च महाबलैरित्यादौ क्व चित् घिसंज्ञा ॥

आङि श्रिहनिभ्यां ह्रस्वश्च ॥ १३७ ॥

श्रिहनिभ्यामाङ्युपपद इञ्। स च डिद्भवति। आङो ह्रस्वश्च ॥ अश्रिः कोणः। स्त्रियः पाल्यश्रिकोटय इत्यमरः। सुप्रातसुश्वेति। पा० ५. ४. १२०। चतुरश्रः ॥ अहिः सर्पः। अहिर्वृत्रासुरे ऽपि च। हांत० ८.। इति विश्वः। अहिद्विषस्तद्भवता निशम्यतां। १. ४१.। इति माघः ॥

अच इः ॥ १३८ ॥

अजंताद्धातोरिः स्यात् ॥ लूञ्। लविश्छेदको लोहः ॥ पूञ्। पविर्वज्रं। वज्रोऽस्त्री हीरके पवावित्यमरः ॥ तॄ। तरिर्वस्त्रादिस्थापनभांडं। स्त्रियां तरी। तरीषु तत्रत्यमफल्गु भांडं। ३.७६.। इति माघः ॥ रु। रविर्मथनं ॥ कु शब्दे कु वर्णा इत्यतो वा कविः काव्यकर्ता। कविः काव्यकरे सूरौ कविर्वाल्मीकिशुक्रयोः। विश्व° वांत° २३.। विनयेन विना का श्रीः का निशा शशिना विना। रहिता सत्कवित्वेन कीदृशी वाग्विदग्धता। कवेर्भावः काव्यं। कर्म वा। अस्मिन्नर्थे ऽपि काव्यं। तद्योगात्काव्यं तद्वयोऽपि। स्त्रियां कवीत्यपि ॥ अर्तेररिः शत्रुः। कपिलिकादित्वादलिर्भ्रमरः। अलमलेरिव गंधरसावमू। ६.१२.। इति माघः। अलतेरजंतादिनिः। अली नांतो ऽपि। अलिर्मधुकरोऽली चेति शब्दार्णवः। मलिनिमालिनि माधवयोषितां। ६.४.। इति माघः। दलतेर्दलिः स्त्री लोष्टं लेष्टुर्ना स्यान्मलान्दरलिर्द्वयोरिति रंतिदेवः ॥ उखनखेति नखः। नखेनातिक्रामतीति नखयतेरेव इः। नखिः। शस्त्रेण पणितुं व्यवहर्तुं शीलमस्येति णिनिः। शस्त्रपाणी। नदीनां च नखीनां च शृंगिणां शस्त्रपाणिनां विश्वासो नैव कर्तव्यः स्त्रीषु राजकुलेषु चेति ॥ सूचयतेः सूचिः। यस्य वज्रमणेर्भेदे भिद्यंते लोहसूचय इति बालरामायणं ॥ इहेक इति वक्तव्ये ऽच इति वचनं संध्यक्षरादप्याचारक्विबंतादयथा स्यादिति भाष्यं ॥

खनिकष्यंज्यसिवसिवनिसनिध्वनिग्रंथिचरिभ्यश्च॥१३९॥

एभ्यो दशधातुभ्य इः स्यात् ॥ खनिर्द्रव्यस्थानं। पृषोदरादित्वात् दीर्घत्वे खानिरित्यपि। कोशः कृतः सकलसत्खानिरत्नखानिरिति विक्रमादित्यकोशः ॥ कषिर्हिंस्रः ॥ अंजिः प्रेषणिकः। कृदिकारादिति ङीष्। अंजी मंगलार्थः ॥ असिः खड्गः ॥ वसिर्वस्त्रं ॥ वनिरग्निः। धान्यवनिर्धान्यराशिः। वनु याचने। वनिं याच्ञामिच्छतीति क्यच्। वनीयति। तदंतात् ण्वुल्। वनीयकः प्रार्थक इति वर्णदेशना। गद्यरामायणकाव्ये तु कृपणा इव नवनीपकोपसेवितः पर्वत इति श्लेषाद्दोष्ठ्यपकारवानपि वनीपकशब्दः ॥ सनिरध्येषणा ॥ ध्वनिः शब्दः ॥ ग्रंथिः पर्व। ग्रंथिर्ना पर्वपरुषी इत्यमरः ॥ चरिः पशुः ॥ इञि सिद्ध इवचनं स्वरार्थं ॥

वृतेश्छंदसि ॥ १४० ॥

वृतेश्छंदसि इः स्यात्। वर्तिर्योगकर्मद्रव्यं ॥

भुजेः किच्च ॥ १४१ ॥

भुज पालने॥ अत इः किद्वति। भुजिरग्निः ॥

कॄगॄशॄपॄकुटिभिदिछिदिभ्यश्च ॥ १४२ ॥

एभ्यः सप्तभ्य इः स्यात्। स च किद्वति ॥ इत्त्वादिकार्यं। किरिर्वराहः॥ गिरिर्गोत्राक्षिरोगयोः। गिरिकाणः॥ शिरिर्हंता॥ पुरिर्नगरं नदी च॥ कुटिः शाला॥ भिदिर्वज्रं॥ छिदिः परशुः॥ बाहुलकात्तरतेः सन्वत्तुक् चाभ्यासस्य। तरतेरिप्रत्ययः स च कित्। सन्वत्कार्यमभ्यासस्य च तुगागमः। तित्तिरिः पक्षिभेदः स्यादिति प्राणिरजतादिभ्यो ऽञित्यत्र रक्षितः ॥

कुठिकंप्योर्नलोपश्च ॥ १४३ ॥

कुठि गतिप्रतिघाते। कपि चलने॥ आभ्यामिः किद्वति धातोर्नलोपश्च। कुठिः पर्वतवृक्षयोः॥ कपिर्वानरो वर्णनाम च। वृषः कपिरस्येत्यन्येषामपीति दीर्घः। वृषाकपिः शिवे विष्णौ पांते ऽमरः। कपिज्ञात्योर्ढक्। पा° ५. १. १२७.। कापेयं। वृषाकपायी श्रीगौर्योरिति यांते ऽमरः। कपिशकपिलौ लोमादिसिध्मादी ॥

सर्वधातुभ्यो मनिन् ॥ १४४ ॥

सर्वधातुभ्यो मनिन् स्यात्॥ क्रियते तदिति कर्म क्रिया। अर्धर्चादित्वात्कर्माणि कुरुते शुभं। कर्म व्याप्ये क्रियायां च पुंनपुंसकयोर्मतमिति रुद्रः। तद्युक्तात्कर्मणो ऽण्। पा° ५. ४. ३६.। कार्मणं। कर्मवेषाद्यत्। पा° ५. १. १००.। कर्मण्यं सौवीर्यं। कर्मण उकञ्। पा° ५. १. १०३.। कार्मुकं। तत्कार्मुकं कर्मसु यस्य शक्तिः। कि° ३. ४८.। इति भारविः॥ चरितं तदिति चर्म॥ भसितं तदिति भस्म। भूते ऽपि दृश्यंते॥ जनी। जन्मोत्पत्तिः॥ शॄ। शर्म सुखं॥ हि। हेम सुवर्णं॥ श्लिष। श्लेष्मा कफः। पामादित्वात् श्लेष्मणः। सिध्मादित्वात् श्लेष्मलः॥ तॄ। तर्म यूपाग्रं। तर्मणी। तर्माणि॥ ष्ठा। स्थाम बलं। स्थामनी। स्थामानि॥ डुदाञ्। दाम। दामनी। दामानि। दामा। दामानौ। दामानः। पक्षे टाप्। दामा। दामे। दामाः। न पुंसि दाम संदानमित्यमरः॥ छादेर्णिलोपः। इस्मन्निति ह्रस्वत्वं। छद्म माया॥ सुष्ठु त्रायत इति सुत्रामा। अन्येषामपि दीर्घत्वे सूत्रामेति वर्णविवेकः॥ उष दाहे। उष्मा बाष्पः॥

बृंहेर्नो ऽच्च ॥ १४५ ॥

बृहि वृद्धौ ॥ अतो मनिन् । नकारस्याकारः । रत्वं । ब्रह्म तत्त्वं तपो वेदो ब्रह्मा विप्रः प्रजापतिरित्यमरः । हनस्त च । पा° ३.१.१०८. । ब्रह्महत्या सुरापाणं स्तेयं गुर्वंगनागमः । महानिपातकान्याहुस्तत्संसर्गश्च पंचमं ॥

अशिशकिभ्यां छंदसि ॥ १४६ ॥

आभ्यां छंदसि मनिन् स्यात् ॥ अश्मा पाषाणः । भाषायामपि दृश्यते । अश्मानं दृषदं मन्ये मन्ये काष्ठमुलूखलं । अंधायाश्च सुतं मन्ये यस्य माता न पश्यतीति जिनेंद्रबुद्धिः ॥ शक्मेंद्रः ॥

हृभृधृसृस्तृशृभ्य इमनिच् ॥ १४७ ॥

एभ्यः षड्भ्य इमनिच् स्यात् ॥ हरिमा कालः ॥ भरिमा कुटुंबं ॥ धरिमा रूपं ॥ सरिमा वायुः ॥ स्तरिमा तल्पं ॥ शरिमा प्रसवः ॥ दीर्घादिरप्ययं प्रत्यय इति के चित् ॥

जनिमृङ्भ्यामिमनिन् ॥ १४८ ॥

आभ्यामिमनिन् ॥ जनिमा जन्म ॥ मरिमा मृत्युः ॥

वेञः सर्वत्र ॥ १४९ ॥

छंदसि भाषायां चेमनिन् ॥ वेमा पुंसि वायदंडः । अर्धर्चादित्वात्सामनी वेमनीति वृत्तिः ॥

नामन् सीमन् व्योमन् रोमन् लोमन् पाप्मन् ध्यामन् ॥ १५० ॥

सप्तामी मनिनंता निपात्यंते ॥ म्ना अभ्यासे । माभावः । म्नायते ऽनेनेति नाम संज्ञा । स्वार्थे भागरूपनामभ्यो धेयट् । पा° ५.४.३६.२. । नामधेयं च नाम च । अम° १.१.५.८. ॥ सिनोतेर्दीर्घत्वं । सीमावधिः । सीमानी । सीमानः । स्त्रियां डाबुभाभ्यामन्यतरस्यां । पा° ४.१.१३. । सीमा । सीमे । सीमाः ॥ व्येञ ओत्वमंतस्य । व्योम पुष्करं ॥ रौति रोम गात्रकेशः ॥ लूञ् । लोम स एव ॥ पिबतेः पुगागमः । पाप्मा पुंसि किल्बिषे ॥ ध्यायतेर्ध्यामा परिमाणं

तेजश्च ॥ बाहुलकायजयतेरपि। यक्ष्मा राजरोगः। राजयक्ष्मेव रोगाणामिति माघः ॥ षू प्रेरणे। सोमा चंद्रो यज्ञद्रव्यं च ॥ हु दानादनयोः। होमाहुतिः ॥ डुधाञ्। धाम तेजः स्थानं च ॥

मिथुने मनिः ॥ १५१ ॥

यत्रोपसर्गो धातुक्रियया संबद्धस्तन्मिथुनं। तत्र धातोर्मनिः स्यात् ॥ सुशर्मा राजविशेषः ॥ धृञ्। सुधर्मा क्षत्रियः ॥ एवमन्ये ऽपि। स्वरार्थमिदं ॥

सातिभ्यां मनिन्मनिणौ ॥ १५२ ॥

स्यत्यतिभ्यां यथाक्रमं मनिन्मनिणौ स्यातां ॥ स्यति दुःखयति दुरध्येयत्वात्। साम। सामनी। सामानि। अचतुरेति निपातनात् दधिपयआदित्वाद्वा ऋक्सामे ॥ आत्मा पुरुषः। आत्मने हितमात्मनीनं। आत्मन्विश्वजनेति। पा० ५. १. ९.। खः ॥

हनिमशिभ्यां सिकन् ॥ १५३ ॥

आभ्यां सिकन् स्यात् ॥ हंसिका हंसयोषिता ॥ मक्षिका भ्रमराली स्यात्। १२३.। इति हारावली ॥

कोररन् ॥ १५४ ॥

कौतेररन् स्यात् ॥ कवरः पाठकः। जानपदेत्यादिना। पा० ४. १. ४२.। ङीष्। कवरी केशविन्यासः ॥

गिर उडच् ॥ १५५ ॥

गिरतेरुडच् स्यात् ॥ गरुडस्तार्क्ष्यः। गरुता डीयत इति उपकरणे ऽन्यत्रापीति डप्रत्यये पृषोदरादित्वात्तलोपे गरुड इत्युपाध्यायसर्वस्वं। ततो ऽनार्षमिदं ॥

इन्देः कमिन्नलोपश्च ॥ १५६ ॥

इन्देः कमिन् स्यान्नलोपश्च धातोः ॥ इदं प्रत्यक्षप्रत्यवमर्शी सर्वनामसंज्ञकः ॥ इन्देरमिन्किञ्चेति सर्वस्वे सूत्रं दृश्यते ॥

कायतेर्डिमिः ॥ १५७ ॥

कै शब्दे ॥ अतो डिमिः स्यात्। इकार उच्चारणार्थः। उकारश्चिलो-

पार्यः। किं क्षेपे। पा° २. १. ६४.। इति समासे किमः क्षेपे। पा° ५. ४. ५७.। इति समासांतनिषेधे च। किंराजा यो न रक्षति प्रजां। किंसखा यो ऽभिद्रुह्यति ॥

सर्वधातुभ्यः ष्ट्रन् ॥ १५८ ॥

सर्वधातुभ्यः ष्ट्रन् स्यात्॥ वस। वस्त्रं। अर्धर्चादिरयं॥ असु। अस्त्रं॥ शसु। शस्त्रमायुधं॥ पत्लृ। पत्त्रं वाहनं॥ राजृ। षत्वादिकार्यं। राष्ट्रो देशः। अर्धर्चादिरयं। उष्ट्रो राष्ट्रो भ्राष्ट्र इति भागवृत्तिः॥ छद अपवारणे। णिलोपः। इस्मन्निति ह्रस्वत्वं। छत्त्रमातपत्त्रं। अर्धर्चादिरयं। गुरुवैगुण्याच्छादनाच्छत्त्रशील-श्छात्त्रः। छात्त्रगोमी छात्त्रोपासकः। गोमी गोमानुपासक इति धरणिः। गोमी निंद्यप्रशस्तयोरिति रुद्रकोशः। छात्त्रगोमिनौ। छात्त्रगोमिन इति। क्षुभ्नादित्वात् णत्वाभावः। मनोज्ञादित्वाच्छात्त्रकं॥ गम्लृ। राज्ञा निबद्धा सुचिरं तिष्ठति कालांतरं गच्छतीति पुत्रपौत्रादिकं व्याप्नोतीति वा गंत्री गंत्रिका। षित्वात् ङीष्॥ पिबतेः पात्त्रं स्यायोग्यमंत्रिणोः। अर्धर्चादिरयं। अपात्रः पात्रतां याति यत्र पात्रो न विद्यते॥ दंश दशने। षत्वादिकार्यं। दंष्ट्रा दंतः। मातरि षिच्च। पा° ४. २. ३६. २.। इति षित्वादेव ङीषि सिद्धे गौरादिषु मातामह-पितामह्योः पाठः षिल्लक्षणस्य ङीषो ऽनित्यत्वज्ञापनार्थं। तेन दंष्ट्रेति न षिल्लक्षणो ङीष्। अतष्टाबेव॥ ष्ट्रन्नित्येतावदेव सूत्रं सर्वधातुग्रहणमपारायणी-यमिति हट्टचंद्रः॥

अस्तिगमिनमिहनिविश्यशां वृद्धिश्च ॥ १५९ ॥

एभ्यः षड्भ्यः ष्ट्रन् भवत्येषां वृद्धिश्च॥ संयोगादिलोपः। षत्वादिकार्यं। आष्ट्रो नांतरीयं। अस्तो रोपधयो रेति। पा° ६. ४. ४७.। रत्वमत्र नास्ति संज्ञाया नियतवर्णत्वात्॥ गांत्रं शकटं॥ नांत्रं स्तोत्रं॥ हांत्रं मरणं॥ वैष्ट्रं विष्टपं॥ आष्ट्रमाकाशं। तितुत्रेतीट्प्रतिषेधो ऽत्र पूर्वत्रापि॥

दिवेर्द्युच्च ॥ १६० ॥

दीव्यतेः ष्ट्रन् द्युदादेशो वृद्धिश्च धातोः॥ द्यौत्रं ज्योतिः॥

उषिखनिभ्यां कित् ॥ १६१ ॥

आभ्यां ष्ट्रन् किद्भवति॥ उष्ट्रः पशुभेदः॥ जनसनेति। पा° ६. ४. ४२.। आत्वं। खात्रं खनित्रं जलाधारविशेषश्च ॥

सिविमुच्योष्टेरू च ॥ १६२ ॥

षिवु। मुच्लृ॥ आभ्यां ष्ट्रन् किद्वति। टेरूकारादेशः। सूत्रं तंतुः॥ मूत्रं प्रस्रावः। अम° २.६.२.१८.। तारकादित्वान्मूत्रितो मनुष्यः॥

अमिचिमिदिशसिभ्यः क्त्रः ॥ १६३ ॥

एभ्यश्चतुर्भ्यः क्त्रः स्यात्॥ अंत्रमुदरनाडी॥ चित्रमालेख्यं। चित्रा। चैत्रिकः। चैत्रः॥ मित्रं सुहृत्। नित्यं क्लीबलिंगं। अयं मित्रं। इयं मित्रं। शोभनानि मित्राण्यस्याः। सुमित्रा। बाह्वादित्वात्सौमित्रिर्लक्ष्मणः॥ शस्त्रमायुधं॥

पुवो ह्रस्वश्च ॥ १६४ ॥

पुवः क्त्रः स्यात्। धातोर्ह्रस्वत्वं॥ पुनाति पुरुषानिति पुत्रः स्यादात्मसंभवः। अनचि च। पा° ८.४.४७.। इति पक्षे द्वित्वं। पुन्नाम्नो नरकाद्यस्मात्पितरं त्रायते सुतः। तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवेति स्मृतिः। तथात्मासि त्वं जीव वत्सरशतं। आत्मा वै जायते पुत्रः। अस्मिन्पक्षे तकारद्वयं॥

स्त्यायतेर्ड्रट् ॥ १६५ ॥

स्त्यै शब्दसंघातयोः॥ अस्मात् ड्रट्। डित्वात् टिलोपः। टित्वात् ङीप्। वलि लोपः। स्त्री स्तनकेशवती। स्त्रियाः। पा° ६.४.७९.८०.। इतीयङ्। स्त्रियौ स्त्रिय इति। वाम्शसोः। स्त्रियं स्त्रीं। स्त्रियः स्त्रीः। अहो दैवस्य माहात्म्यं न मया दृष्टमीदृशं। यदेकाक्षरसंयुक्तो द्रोणराशिर्महान्कृत इति व्यासः॥

गुधृवीपचिवचियमिसदिक्षदिभ्यस्त्रः ॥ १६६ ॥

एभ्योऽष्टभ्यस्त्रः स्यात्॥ गुङ्। गोत्रं स्यान्नामवंशयोः। गोत्रा पृथ्वी॥ धर्त्रं गृहं॥ वेत्रं लताविशेषः॥ पक्त्रं गार्हपत्यं॥ वक्त्रं मुखं॥ यंत्रं कर्मकाष्ठं॥ सीदंति सज्जना यत्रेति सत्रं यज्ञः। सततं त्रायत इति सत्रमित्यपि सर्वस्वे व्युत्पत्त्यंतरं। दीर्घसत्रः॥ क्षद इति सौत्रः। क्षत्रं ब्राह्मणानंतरजातिः। क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः। रघु° २.५३.। इति पक्षांतरं। ष्ट्रनि सिद्धे स्त्रियां विशेषः॥

हुयामाश्रुभसिभ्यस्त्रन् ॥ १६७ ॥

एभ्यः पंचधातुभ्यस्त्रन् ॥ होत्रमाहुतिः ॥ यात्रा गमनं ॥ मात्रा मानविभूषयोः ॥ श्रोत्रं कर्णः ॥ भस्त्रा चर्मप्रसेविका ॥

गमेरा च ॥ १६८ ॥

गमेस्त्रन् धातोरांतादेशश्च ॥ गात्रं स्यादंगदेहयोः ॥

दादिभ्यश्छंदसि ॥ १६९ ॥

दाप् लवने। एवमादिभ्यश्छंदसि त्रन् स्यात् ॥ दात्रं धान्यादिच्छेदनसाधनं ॥ पात्रं तु भाजनं योग्यमित्यमरः ॥ क्षेत्रं केदारः। क्षेत्रं भूमिकलत्रयोः ॥ एवमन्येऽपि ॥

भूवादिगृभ्यो णित्रन् ॥ १७० ॥

त्रिभ्यो धातुभ्यो णित्रन् स्यात्। णित्वाद्वृद्धिः ॥ भावित्रं त्रैलोक्यं ॥ वादित्रं तूर्यादि ॥ गारित्रमोदनं ॥

चरेर्वृत्ते ॥ १७१ ॥

वृत्ते वाच्ये चरेर्णित्रन् ॥ चारित्रं वृत्तं। विनष्टचारित्रगुणा हितैषिणा इति बालरामायणे ॥ इत्रच्प्रत्यये चरित्रं वृत्तमेव। चरित्रव्यत्यासः खलि कथमयं केकयकुल इति मुरारिः ॥

अशित्रादिभ्य इत्रोत्रौ ॥ १७२ ॥

अशू व्याप्तौ। एवमादिभ्य इत्रः स्यात् ॥ अशित्रं चरुः ॥ कष। कषित्रं चर्मभेदः ॥ वहित्रं प्रसिद्धमेव ॥ वधित्रं मन्मथः ॥ धृञो धरित्री मही ॥ त्रैङ् पालने। एवमादिभ्य उत्रः। आदुणः। पा° ६.१.८७.। त्रोत्रं प्रहरणं ॥ लोत्रं चोरचिह्नं ॥ वृञ्। वरुत्रं प्रावरणं ॥

अमेर्द्विषति चित् ॥ १७३ ॥

अम गतौ ॥ अत इत्रो भवति द्विषति वाच्ये। स च चित् ॥ अमित्रः शत्रुः ॥ इत्र एवानुवर्तते नोत्रोऽस्वरितत्वात् ॥

आः समिण्निकषिभ्यां ॥ १७४ ॥

इणः संपूर्वात्कषेश्च निपूर्वादाप्रत्ययः ॥ समया निकषा समीपवाचकौ।

स्वरादिपाठादव्यये । अभित इत्यादिना । पा° २. ३. २. १. । द्वितीया । समया ग्रामं । निकषा ग्रामं ॥ बाहुलकात् दिविदुषिभ्यां च । दिवा । दोषा । स्वरादिपाठादव्यये । दिवातनं । दोषातनं । दिवाभूता रात्रिर्दोषाभूतमहरिति भाष्यं । अस्य चावव्ययप्रतिषेधः । स्वभावादधिकरणस्वभावात्रिमाविति के चित् । दिवाह्नीत्यर्थे दोषा नक्तं च रजनावित्यमरः ॥ तथा स्वदेर्धश्च । स्वधा पितृतृप्तिरित्यापिशलिः ॥

चितेः कणः कश्च ॥ १७५ ॥

चितेः कणप्रत्ययः कश्चांतादेशः । बाहुलकाद्गुणः ॥ चिक्कणं मसृणं स्निग्धमित्यमरः ॥

सूचेः स्मन् ॥ १७६ ॥

सूच पैशुन्ये । चुरादिः ॥ अतः स्मन् णिलोपश्च । कुत्वादिकार्यं । सूक्ष्ममल्पतरं । कलौ सूक्ष्मतरो धर्मः ॥

पातेर्डुम्सुन् ॥ १७७ ॥

पा रक्षणे ॥ अतो डुम्सुन् स्यात् । डित्वात् टिलोपः । उकार उच्चारणार्थः । नकारः स्वरार्थः । पुंस् । स्वादिषु पुंसोऽसुङ् । पा° ७. १. ८९. । इत्यादिकार्यं । पुमान् पुरुषः । पुमांसौ । पुमांसः । असुङ उकार उगित्कार्यः । उगितश्च । पा° ४. १. ६. । इति ङीप् । सुपुंसी ॥ पुंसोऽसुङित्यत्र न्यासरक्षिताभ्यां पुनातेर्मक् सुक् निन् ह्रस्वश्चेति सूत्रं पठित्वा पुमान् साधितः ॥

रुचिभुजिभ्यां किष्यन् ॥ १७८ ॥

आभ्यां किष्यन् स्यात् ॥ रुचिष्यमिष्टं ॥ भुजिष्यो दासः ॥

वसेस्तिः ॥ १७९ ॥

वसेस्तिः स्यात् ॥ वस्तयः स्युर्दशासूत्रे । वस्तिर्नाभेरधो द्वयोरित्यमरः ॥ बाहुलकात् शासः शास्ती राजप्रहारः ॥ यतो यष्टिः । मुष्टायों ऽयमिति पशुपतिः ॥ अस्यतेरस्तिः । अगेन सह कृयोगवद्धयाः समासः । शकंध्वादित्वात्पररूपत्वे विंध्याख्यमगमस्यतीत्यगस्तिः । अगस्तिनाध्यासितविंध्यशृंगं । १२. ७१. । इति भट्टिः ॥ अस गत्यादौ । पुलं महत्त्वमसते गच्छतीति पुलस्तिः । तस्या-

पत्यं गर्गादित्वाद्यञ्। पौलस्त्यः॥ एवं गभस्तिः॥ दूतिर्दूतो च। त्वां कामिनो दूतिमुदाहरंतीति वर्णविवेकः ॥

सावसेः ॥ १८० ॥

असु भुवि॥ अतः सुशब्द उपपदे तिप्रत्ययः। बहुलवचनान्न भूभावः। स्वस्ति कल्याणं। स्वरादिपाठादव्ययत्वं ॥

वौ तसेः ॥ १८१ ॥

तसु उपक्षेपे॥ अतो विपूर्वात्तिः स्यात्। वितस्तिर्द्वादशांगुलः। अम° २. ६. २. ३५.। स्त्रीपुंसयोर्वितस्तिः स्यादित्यमरमाला ॥

पदिप्रथिभ्यां नित् ॥ १८२ ॥

आभ्यां तिः स्यात्स च नित्॥ पत्तिः पदातिः॥ प्रथितिः प्रख्यातिः। नितुत्रेति सूत्रे ऽग्रहादीनामितीट् ॥

दृणातेर्ह्रस्वश्च ॥ १८३ ॥

दृ विदारणे ॥ अतस्तिर्धातोर्ह्रस्वश्च। दृतिश्चर्मनिर्मितपात्रमिति विश्वः। दृतिहरिः श्वा। मांसादष्टगुणा दृतिः ॥

कृतॄकृपिभ्यः कीटन् ॥ १८४ ॥

एभ्यस्त्रिभ्यः कीटन् स्यात् ॥ इत्त्वादिकार्यं। किरीटं मुकुटे न स्त्री किरीटं वेष्टनं मतमिति चंद्रगोमी॥ तिरीटं शिरोवेष्टनमित्यरुणदत्तः। लोध्रश्च॥ कृपीटं कुक्षिवारिणोः। बाहुलकादत्र लत्वाभावः। कृपे रो ल इत्यत्र न्यासे कृकृपिभ्यां चेति सूत्रं दृश्यते। अतस्तरतिरत्र नास्तीति लक्ष्यते ॥

रुचिवचिकुचिकुटिभ्यः कितच् ॥ १८५ ॥

चतुर्भ्य एभ्यो धातुभ्यः कितच् स्यात्॥ रुचितं मिष्टं॥ उचितं युक्तं॥ कुचितं परिमितं। कुटितं कुटिलं ॥

कुटिकुषिभ्यां क्मलन् ॥ १८६ ॥

आभ्यां क्मलन् स्यात्॥ कुड्मलं मुकुलं। तारकादित्वात्कुड्मलितः॥ कुष्मलं छेदनं ॥

कुषेर्लश्च ॥ १८७ ॥

कुष्णातेः क्मलन् स्यात् लश्चांतादेशः। कुल्मलं पापं ॥

सर्वधातुभ्यो ऽसुन् ॥ १८८ ॥

कृत्स्नेभ्यो धातुभ्यो ऽसुन् स्यात् ॥ वर्च दीप्तौ। वर्चः पुरीषं ॥ रक्ष पालने। रक्षः कौणपः। प्रज्ञादित्वाद्राक्षसः ॥ रुधिर्। रोधस्तटी ॥ चिती। चेतश्चित्तं ॥ सृ गतौ। सरस्तडागः। गौरादित्वात्सरसी तु महासर इति शब्दार्णवः। अकारांतो ऽपि दृश्यते। निपातनं महासर इति न्यासे व्याख्यातं। मतुप्। सरस्वानर्णवः। स्त्रियां सरस्वती नदीगिरोः। विनेरत्रानभिधानमिति भाष्यं ॥ रुदिर्। रोदः। गौरादित्वात् द्यावाभूमी च रोदस्यावित्यमरः ॥ वी गतौ। वयः कालकृतावस्था। अर्थो न संभृतः कश्चिन्न विद्या का चिदर्जिता। न यशः संभृतं किं चिद्गतं च चतुरं वयः ॥ प्रज्ञादित्वाद्वायसः काकः। यावादित्वाद्वायस्कः ॥ षद्लृ विशरणे। सदः सभा। स्त्रीनपुंसकयोः सद इत्यमरः ॥ इण्। अयो लोहं। अयस्कांतस्तु चुंबकः। अयस्कांतेन लोहवत्। कु॰ २.५९.। इति कालिदासः ॥ अन प्राणने। अनो भक्तं तत्स्थानमपि। अनो ऽस्यां महत्संपद्यते इति टच्। महानसं रसवती ॥ तमु। तमः। तमसी। तमांसि। तमः क्लीबं गुणे क्लेशे सैंहिकेयांधकारयोरिति रभसः। स्वर्भानुस्तु तमो राहुः सैंहिकेयो विधुंतुद इत्यमरमालायां पुंस्कांडे। अकारांतो ऽपि तमशब्दो ऽस्ति। सत्यं वक्ष्यंति ते ऽकस्मादसत्यनीरसं तमा इति वर्णविवेकः। तथा च ज्योतिषे होरायां। भृगुतमबुधजीवैरिति। राहो यथा कितवस्तमस्येति वराहः ॥ महतेरसुन्। महः। महसी। महांसि। अच्प्रत्यये ऽकारांतो ऽपि। न खलु दूरगतो ऽप्यतिवर्तते महमसाविति बंधुतयोदितैः। ६.१९.। इति माघः। एवं महति महे ऽस्मिन्निति कस्य चिदाप्तस्य। गुणे ध्वांते तमो राहौ मह उत्सवतेजसोरिति दंत्यांते रंतिदेवः। स्वभावादेवासुनंतो नपुंसकमिति के चित् ॥ सहतेरसुन्। मार्गशीर्षः सहाः। सहसी। सहसः। सहो बलं च। सहसा वर्तते साहसिकश्चोरः। अच्प्रत्यये ऽकारांतो ऽपि सहशब्दः। सहस्य प्रथमे चैव वाहयेत् दोषसंचयमिति चरके। मार्गशीर्षस्य सहस्येत्युक्तं ॥ तपतेस्तपः। तपसी। तपांसि। तपा माघ इत्यमरे माघवाची पुंल्लिंगः। तपसि मंदगभस्तिरभीशुमान्। ६.६३.। इति माघः। अच्प्रत्यये ऽकारांतो ऽपि। देवा विंशतिरेवैते सुतपाः सुतपाश्च त इति शब्दार्णवः। तपोपवासाध्ययनब्रह्मचर्य-

गतायुषामिति चरके। ग्रीष्मे तु अदंत एव। तपन वर्षाः शरदा हिमागमः। १. ६६.। इति माघः॥ माङ् माने। असुन्। माः। माःशब्दो मासि चंद्रे च संमतो बहुदृश्वनामित्युत्पलिनीकोशः॥

रपेरत एच्च ॥ १८९ ॥

रपेरसुन्नत एच्च॥ रेपो ऽवद्यं। रेपसी। रेपांसि। विरेपो ऽनवद्यं॥ बहुलमन्यत्रापि। पिबतेरसुन्निकारश्चांतादेशः। पयः स्यात् क्षीरवारिणोः। अस्मायेति विनिः। पयस्वी। पयस्वान्। पयसस्तु विभाषयेति पयायते पयस्यते॥

अशेर्देवने युट् च ॥ १९० ॥

अश्नोतेरसुन्धातोर्युडागमश्च। देवने स्तुतौ॥ यशः कीर्तिः। यशोधनानां हि यशो गरीय इति भारविः। विनिः। यशस्वी॥

उब्जेर्बले बलोपश्च ॥ १९१ ॥

उब्ज आर्जवे॥ अस्मात् बले ऽभिधेये ऽसुन्। बकारस्य लोपः। ओजो बलं। ठक्। औजसिकः। क्यङ्। ओजायते॥

श्वेः संप्रसारणं च ॥ १९२ ॥

श्वयतेरसुन्धातोः संप्रसारणं च॥ शवो मृतकशरीरं॥ बाहुलकाद्वहेर-प्यसुन्। संप्रसारणे कृते दीर्घत्वं धकारश्चांतादेशः। ऊधस्तु क्लीवमापीनं। अम° २. ९. ७३.। ऊधसो ऽनङ्। पा° ५. ४. १३१.। बहुव्रीहेरूधसो ङीष्। पा° ४. १. २५.। कुंडोध्नी। घटोध्नी॥

श्रयतेः स्वांगे शिरः किच्च ॥ १९३ ॥

श्रियः स्वांगे वाच्ये ऽसुन् कित्स्यात्। धातोः शिरादेशः॥ शिरो मस्तकं। शिरसी। शिरांसि। शिरशब्दो ऽकारांतो ऽपि भारते दर्शितः। कुंडलोद्घृष्टगंडानां कुमाराणां तरस्विनां। निचकर्त शिरान् द्रौणिर्नालेभ्य इव पंकजान्। चकाड्ढि पलितं शिरः। शिरः पलितं सशकाड्ढि शोभस्वेत्यर्थ इति धि च। पा° ८. २. २५.। इत्यत्र सूत्रे वृत्तिः॥

अर्तेरुच्च ॥ १९४ ॥

ऋ गतौ ॥ अतो ऽसुन् कित्स्यात् धातोरुत्वं रपरत्वं च। उरो वक्षः। पिच्छिलादित्वादुरसिलः ॥

व्याधौ शुट् ॥ १९५ ॥

अर्तेरेव व्याधौ वाच्ये ऽसुन् तस्य शुडागमश्च॥ अर्शो गुदरोगः। अर्श-आदित्वादच्। अर्शसः पुमान्। पृषोदरादित्वादसलोप इति शोपितार्शों सुशो भवेदिति विदेहाधिपः ॥

उदके नुट् ॥ १९६ ॥

अर्तेरुदके वाच्ये ऽसुन् तस्य नुडागमश्च। रषाभ्यामिति णत्वं॥ अर्णः पानीयं। तदस्यास्तीत्यर्णसः सलोपो वप्रत्ययश्च। अर्णवः समुद्रः ॥

इण आगसि ॥ १९७ ॥

इणो ऽपराधे वाच्ये ऽसुन् तस्य नुडागमश्च॥ एनः पापं। एनोनिवृत्तेंद्रियवृत्तिरेनं। ५.२३.। इति रघुः ॥

रिचेर्धने घित्किच्च ॥ १९८ ॥

रिचिर्॥ अतो धने वाच्ये ऽसुन्। स च घित्किच्च स्यात्। प्रत्ययस्य नुट्। रिक्णः सुवर्णं ॥

चायतेरन्ने ह्रस्वश्च ॥ १९९ ॥

चायृ पूजादौ॥ अतो भक्ते वाच्ये ऽसुन् तस्य नुट् च। धातोर्ह्रस्वत्वं च। चनो भक्तं ॥

वृङ्शीङ्भ्यां रूपस्वांगयोः पुट् ॥ २०० ॥

वृङ्शीङ्भ्यां यथाक्रमं रूपस्वांगयोरभिधेययोरसुन् तस्य पुडागमश्च ॥ वर्पो रूपं॥ शेपो गुह्यावयवः। शेपः स्याद्वृषणं पेलमिति सुभूतिचंद्रः। शेपसी। शेपांसि। अकारांतो ऽपि शेपशब्दो मेढ्रवाची विद्यत इति पद्व्या आक्रोशे। पा° ६.३.२१.। इत्यत्र रक्षितः। शुन इव शेपो ऽस्य। शुनःशेपो मुनिः। तत्रैव फ चेति के चित्पठंति। तेषां वर्फः शेफ इति देशना ॥

स्रुरीभ्यां तुट् च ॥ २०१ ॥

स्रु गतौ। रीङ् स्रवणे॥ आभ्यामसुन् तस्य तुट् च। स्रोतो ऽंबुसरणं स्वतः। अम° १.२.३.११.। बाहुलकादकारांतो ऽपि। तेन स्रोतो महानिति वर्षाविवेकः ॥ रेतः शुक्रं ॥

पातेर्बले जुट् च ॥ २०२ ॥

पा रक्षणे ॥ अतो बले वाच्ये ऽसुन् जुडागमश्च। पाजो बलं ॥

उदके थुट् च ॥ २०३ ॥

पातेरेवोदके वाच्ये ऽसुन्। तस्य थुडागमः॥ पाथो जलं। पाथोनिधिः कुसुमचापभृतो विकारः ॥

अन्ने च ॥ २०४ ॥

अन्ने वाच्ये पातेरसुन् तस्य थुट् च। पाथो भक्तं ॥

अदेर्नुम्धौ च ॥ २०५ ॥

अदेर्भक्ते वाच्ये ऽसुन् नुम्धौ चागमांतादेशौ॥ अंधो ऽन्नमोदनो भिस्सेत्यमरः। द्विजातिशेषेण यदेतदंधसा। कि° १.३९.। इति भारविः॥

स्कंदेश्च स्वांगे ॥ २०६ ॥

स्कंदिर्॥ अतः स्वांगे वाच्ये ऽसुन्धकारश्चांतादेशः। स्कंधः शरीरावयवः। स्कंधशब्दो ऽकारांतो ऽप्यस्ति ॥

आपः कर्माख्यायां ह्रस्वस्तुट् च वा ॥ २०७ ॥

आप्नोतेः कर्माख्यायामसुन् ह्रस्वश्च धातोः। प्रत्ययस्य तुडागमः॥ अप्नः। अपः। आप इत्यपि। आपोमयं। आपोभिर्मार्जनं कृत्वा। यज्ञकर्मनाम ॥

रूपे जुट् च ॥ २०८ ॥

आप्नोते रूपे वाच्ये ऽसुन् ह्रस्वत्वं च धातोर्जुट् च प्रत्ययस्य। अज्ञो रूपं॥

उदके नुम्भौ च ॥ २०९ ॥

आप्नोतेरेवोदके वाच्ये ऽसुन् ह्रस्वत्वं च नुमागमो भश्चांतादेशः॥ अंभ उदकं। अलुक्यंभसाकृतं। अंभसा वर्तते। आंभसिको मत्स्यः ॥

नहेर्दिवि भश्च ॥ २१० ॥

नहेर्गगने वाच्ये ऽसुन् भश्चांतादेशः ॥ नभो गगनं । नभस्यः ॥

इण आगोऽपराधे च ॥ २११ ॥

एतेरपराधे वाच्ये ऽसुन् । धातोरागादेशः ॥ आगो ऽपराधदंडयोः । आगः पापापराधयोरित्यमरः । मदीये हृदये नूनं सखि नागो न विद्यते । वंदति सर्प सर्पेति किं नालिंगसि मामिति ॥

अमेर्हुक् ॥ २१२ ॥

अमेरसुन् हुगागमश्च धातोः । अमंति गच्छंत्यनेनाधस्तादित्यंहः पापं ॥

रमेश्च ॥ २१३ ॥

रमेरसुन् हुगागमश्च धातोः ॥ रंहो वेगः । अहिरहिभ्यामसुन्नित्यंहो रंह इति धातुप्रदीपः । अहिरहिभ्यामसुन्निति सिद्धे ऽघिरघिभ्यामसुन्यंघो रंघ इति मा भूदिति सूत्रद्वयमिति गोवर्धनः । प्रोघ्रमंघोविघातं । ६. । रंघः संघः सुराणां । ७१. । इति सूर्यशतके घकारानुप्रासरसिकानां प्रमादः ॥

देशे ह्व च ॥ २१४ ॥

रमतेर्देशे वाच्ये ऽसुन् ह्वकारश्चांतादेशः ॥ रमंते ऽस्मिन्निति रहो विश्वासदेशः । देशादन्यत्र रहो ऽव्ययं शब्दांतरं वास्ति सुरतवाचकं । द्विगादित्वाद्रहस्यं । रहस्यं तत्त्वे त्रिपु । अम° २. ८. १. २३. ॥ रह त्यागे । अस्मादसुनि रह इति धातुप्रदीपः ॥

अंच्यंजियुजिभृजिभ्यः कुश्च ॥ २१५ ॥

अंचु । अन्जू । युजिर् । भृजी ॥ एभ्यो ऽसुन् कवर्गश्चांतादेशः । अंकश्चिह्नशरीरयोः ॥ अंगः पक्षौ ॥ योगः समाधिकालयोः ॥ भर्गः प्रजापतिः । इमानि स्वभावान्नपुंसकानि ॥ बाहुलकादुच्यतेरप्यसुन् । कुत्वं । गुणः । ओकः स्थानं । अदंतो ऽप्योकशब्दो ऽस्ति । दिवौकसो जलौकस इति । उणादयो बहुलमिति कुत्वं ॥

भूरंजिभ्यां कित् ॥ २१६ ॥

भू सत्तायां । रंज रागे ॥ आभ्यां धातुभ्यामसुन् कित्स्यात् । भुवो ऽन-

रिष्टं । षष्ठ्यंतप्रतिरूपकमव्ययमिति ॥ रजो रेणुर्गुणाश्च । अकारांतो ऽपि रजशब्दो ऽस्ति। रजो ऽयं रजसा सार्धं स्त्रीपुष्पगुणधूलिषु। रादि॰ १.। इत्यजयकोशः। अतो ऽर्थाः पादरजोपमा इति सुखसाधितं। सर्वस्व तु रजः करोति रजयति। ततः पचाद्यचि पादरजोपमा इति साधितं ॥

वसेर्णित् ॥ २१७ ॥

वसेरसुन् णिद्भवति। वासो वस्त्रं ॥

चंदेरादेश्च छः ॥ २१८ ॥

चंदतेरसुन्। आदेश्चकारस्य छकारः ॥ छंदो गायत्र्यादिः कपटं च। इच्छावाच्यपि छंदः। यथा हि छंदसा वचसां प्रवृत्तिरिति स्वरितेनाधिकारः। पा॰ १.३.११.। इत्यत्र सूत्रे न्यासः। अकारांतो ऽपि छंदः। छंदानुवृत्तिदुःसाध्याः सुहृदो विमनीकृताः। २.१०५.। इति माघः। अभिप्रायवशौ छंदावित्यमरः ॥

पचिवचिभ्यां सुट् च ॥ २१९ ॥

आभ्यामसुन्। तस्य सुडागमः। पक्षसी तु स्मृतौ पक्षावित्युत्तररत्नं ॥ वक्षो हृदयं। वक्ष रोष इत्यतो ऽसुनि वक्ष इति धातुप्रदीपः ॥

वहिहाधाञ्भ्यश्छंदसि ॥ २२० ॥

वह्। ओहाक्। डुधाञ् ॥ एभ्यो ऽसुन् छंदसि तस्य सुट् च ॥ वक्षा अनड्वान् ॥ हासाश्चंद्रः ॥ धासाः पर्वतः ॥

इण आसिः ॥ २२१ ॥

एतेरासिः स्यात् ॥ अया वह्निः। स्वरादिपाठादव्ययं। अत एव दीर्घादिः प्रत्ययः ॥

मिथुने ऽसिः पूर्ववच्च सर्वं ॥ २२२ ॥

यत्रोपसर्गो धातुक्रियया युक्तस्तन्मिथुनं। तत्र धातोरसिः स्यात्पूर्ववच्च सकलं कार्यं ॥ पिबतेरिच। सुपयाः स्त्रीपुंसयोः ॥ सुपशाः ॥ एवं न्योजाः सुजवाः सुस्रोता इत्यादयो ऽपि द्रष्टव्याः। पूर्ववदिति वचनादित्वादिकं। प्रत्ययांतरकरणं स्वरार्थं ॥

नञ्याङ्हन एह् च ॥ २२३ ॥

आङ्पूर्वाद्धंतेर्नञ्युपपदे ऽसिः स्याद्धातोरेहादेशश्च । सावनङादिकार्यं ॥ नाहते । अनेहा कालः । अनेहसौ । अनेहसः ॥

विधाञो वेध च ॥ २२४ ॥

डुधाञो विपूर्वादसिः स्याद्वेधादेशश्च सोपसर्गाद्धातोः ॥ विदधातीति वेधा विधाता । विदुष्यपि स्मृतो वेधाः । २५८. । इति हारावली ॥

नुवो धुट् च ॥ २२५ ॥

नौतेरसिस्तस्य धुट् च । नोधा ऋषिः ॥

गतिकारकयोः पूर्वपदप्रकृतिस्वरत्वं ॥ २२६ ॥

प्रादिच्विडाचो गतिसंज्ञाः । गतौ कारके चोपपदे ऽसिः स्यात् । पूर्वपदप्रकृतिस्वरत्वं ॥ सुतपाः । सुतेजाः । सुवक्षाः ॥ कारके । उग्रतेजाः । हिरण्यरेताः । जातवेदाः । सर्ववेदाः स येनेष्टो यागः सर्वस्वदक्षिणः । अम० २. ७. १. ॥ विष्टरे ऽश्वत्थवृक्षे श्रूयते नित्यं तत्र वसतीति विष्टरश्रवाः ॥ तथा वृद्धेभ्यः शृणोति वृद्धश्रवा इंद्रः ॥ गतिकारकोपपदात्कृत् । पा० ६. २. १३९. । इत्युत्तरपदप्रकृतिस्वरत्वे सति प्राप्तस्यानुदात्तत्वे प्राप्ते वचनमिदमारभ्यते ॥

चंद्रे मो डित् ॥ २२७ ॥

चंद्रोपपदान्माङो ऽसिः । स च डिद्भवति ॥ चंद्रमाः । चंद्रमसौ । चंद्रमसः ॥ बाहुलकात्केवलादपि मो ऽसिः । मीयते ऽनेनेति माः । मासौ । मासः । पूर्णो माः । तस्येयं । पौर्णमासी ॥

वयसि धाञः ॥ २२८ ॥

डुधाञो वयस्युपपदे ऽसिर्डिद्भवति ॥ वयोधास्तरुणः ॥

पयसि च ॥ २२९ ॥

पयःशब्दे चोपपदे डुधाञो ऽसिः स्यात् स च डिद्भवति ॥ पयोधाः समुद्रो मेघविशेषश्च ॥

पुरसि च ॥ २३० ॥

पुरःपूर्वाद्धाञो ऽसिर्डिद्भवति ॥ पुरोधास्तु पुरोहित इत्यमरः ॥ वयःपयःपुरःसु धाञ इत्येकयोगे कर्तव्ये सूत्रत्रयं वैचित्र्यार्थं ॥

पुरूरवाः ॥ २३१ ॥

अयं शब्दो निपात्यते ॥ पुरुशब्दाद्रौतेरसिः । पूर्वपददीर्घत्वं । पुरूरवा बुधसुतो राजर्षिश्च । पुरूरवसौ । पुरूरवसः ॥

चक्षेर्बहुलं शिच्च ॥ २३२ ॥

चक्षिङो ऽसिर्बहुलं शिच्च भवति ॥ विचक्षा उपाध्यायः ॥ नृचक्षा राक्षसः ॥ शित्त्वाभावपक्षे ख्याञादेशः । आख्याः प्रख्याः प्रजापतिः ॥

उषः कित् ॥ २३३ ॥

अतो ऽसिः किद्भवति । कित्त्वान्न गुणः ॥ उषः । प्रत्युषः । श्रुत्वा प्रत्युषसि प्रयाणपटहं प्रोत्कंपमानोत्थिता । प्रत्युषः पारिजाते । ४२. । इति सूर्यशतके ॥ कर्णारंध्रे ऽप्युषः प्रोक्तं तथा मलयपर्वते । कर्णारंध्रे । उषःसु लब्धाश्रवणो ऽधिकां श्रियं प्रचक्रिरे नूतनपल्लवा इव । मलये यथा । उषस्तरोः परशुश्चिलाभेदनं । अहरादीनां च पत्यादिषूभयथा । पा० ८.२.७०.२. । उषसि बुध्यते । उषर्बुधो ऽग्निर्बालश्च । कप्रत्यये टाप्युषा । उषा रात्रिस्तदंते च वाणस्यापि सुता तथेति वाचस्पतिः ॥

दमेरुनसिः ॥ २३४ ॥

दाम्यतेरुनसिः ॥ दमुनाः शुक्रश्चित्रभानुर्विभावसुरित्यमरः ॥

अंगिराः ॥ २३५ ॥

अयं शब्दो निपात्यते ॥ अंगतेरसिः । इरुडागमः । अंगिरा ऋषिभेदः । तस्यापत्यमांगिरसः ॥

अप्सराः ॥ २३६ ॥

अयं शब्दो निपात्यते ॥ सर्तेरपपूर्वादसिः । अप्सरस उर्वशीमुखाः । अपि सर्तेरसुन्निति सर्वस्वं । अप्सु मथ्यमानासु जाता इत्यप्सरसः । एकाप्सरःप्रार्थितयोर्विवाद इति रघुः । ७.५०. ॥

विदिभुजिभ्यां विश्वे ॥ २३७ ॥

विद ज्ञाने। भुज पालनादौ ॥ आभ्यां विश्वोपपदाभ्यामसिः। तस्य तत्पुरुषे कृतीति सप्तम्या अलुक्। विश्वेवेदा अग्निः ॥ विश्वेभोजा इंद्रः ॥

वशेः कनसिः ॥ २३८ ॥

वश कांतौ ॥ अतः कनसिः। संप्रसारणादिकार्यं। उशना भार्गवः ५ कविरित्यमरः। उशना वेद यच्छास्त्रं बृहस्पतिस्वभावादेव तत्सर्वं स्त्रीबुद्धौ संप्रतिष्ठितं ॥

॥ इति महोपाध्यायज्ञाज्ञलीत्परनामधेयश्रीमदुज्ज्वलदत्तविरचितायामुणादिवृत्तौ चतुर्थः पादः ॥ ४ ॥

अदि भुवो डुतच् ॥ १ ॥

भवतेरच्छब्द उपपदे डुतच् स्यात्। डित्त्वात् टिलोपः ॥ अद्भुतमाश्चर्यं। न विद्यते यद्यपि पूर्ववासना गुणानुबंधिप्रतिभानमद्भुतं। श्रुतेन यत्नेन च वागुपासिता ध्रुवं करोत्येव कमप्यनुग्रहं ॥ अद्भुतमधीते। अद्भुताध्यापकः। मयूरव्यंसकादित्वात् ॥

गुधेरूमः ॥ २ ॥

गुध्यतेरूमः स्यात् ॥ गोधूमः सुमनः समौ। अम° २.९.१८.। बिल्वादित्वाद्गौधूमः ॥

मसेरूरन् ॥ ३ ॥

मस्यतेरूरन् स्यात्॥ मसूरो व्रीहिकांचनः। १८२.। इति हारावली। स्त्रियां टाप्। वेश्यायां व्रीहिभेदे च मसूरा मसुरा स्त्रियामिति हट्टचंद्रः। बिल्वादित्वान्मासूरः ॥

स्थः किच्च ॥ ४ ॥

तिष्ठतेरूरन् कित्स्यात्। कित्त्वादालोपः ॥ स्थूरो मनुष्यः। गर्गादित्वात्स्थौर्यः ॥

पातेरतिः ॥ ५ ॥

पातेरतिः स्यात् ॥ पातिः स्वामी। संपूर्वात्संपातिः पक्षिराजः ॥

वातेर्नित् ॥ ६ ॥

वातेरतिर्नित्स्यात् ॥ वातिरादित्यसोमयोरिति रभसः ॥

अर्तेश्च ॥ ७ ॥

ऋ गतौ ॥ अस्मादतिः स्यात्स च नित्। अरतिरुद्वेगः ॥

तृन्हेः क्नौ ह्लोपश्च ॥ ८ ॥

तृह हिंसि हिंसायां॥ अतः क्नो हकारलोपश्च। तृणं प्रसिद्धं। पाशादित्वात्तृण्या। शरादित्वात्तृणमयं। तृणे जातो कदादेशः। कत्तृणं तृणजातिः स्यात्। रेफककारसंयुक्तमव्युत्पन्नं शब्दांतरमप्यस्ति। उत्क्षिप्तत्रिणपत्रपांशुविहगः सौम्यस्वनः पूजित इति वराहः ॥

वृञ्लुटितनितांडिभ्य उलन् तंडश्च ॥ ९ ॥

तड आघाते॥ एभ्य उलन् तंडादेशश्च धातोः। व्रियंते लुट्यंते तन्यंते ताड्यंते तंडुलाः प्रसिद्धाः। तंडुलाः। ४.१०७.। इत्येते ऽपि यथा स्युरिति॥

दंसेष्टटनौ न आत् ॥ १० ॥

दसि दंशनदर्शनयोः॥ अतष्टटनौ स्यातां नकारस्य चाकारः। दासः सेवकशूद्रयोः। स्त्रियां ङीप्। दासी चेटिका। पष्ठ्या आक्रोश इत्यलुक् पष्ठ्याः। दास्याःसदृशी॥

दंशेश्च ॥ ११ ॥

दंश दशने॥ अस्मादपि टटनौ नकारस्य चात्वं। दशति मत्स्यानिति दाशो धीवरः। स्त्रियां दाशी धीवरी॥

उदि चेर्डैसिः ॥ १२ ॥

उत्पूर्वाच्चिनोतेर्डैसिः स्यात्। डित्वात् टिलोपः। स्वरादिपाठादव्ययं। उच्चैर्महान्॥

नौ दीर्घश्च ॥ १३ ॥

निपूर्वाच्चिनोतेर्डैसिः। निशब्दस्य दीर्घत्वं। नीचैरमहान्॥

सौ रमतेः क्तो दमे पूर्वपदस्य च दीर्घः ॥ १४ ॥

रमतेः सुपूर्वात् दमे शाने वाच्ये क्तः सुशब्दस्य च दीर्घः। कित्वादनुनासिकलोपः॥ सूरत उपशांतः कृपालुश्च। दमादन्यत्र सुरतः क्रीडायुक्तः॥

पूङो यण्णुक् ह्रस्वश्च ॥ १५ ॥

पवतेर्यत् णुगागमश्च ह्रस्वत्वं च धातोः॥ पुण्यं सुकृतधर्मयोरिति चंद्रः। अहःसर्वैकदेश इति। पा° ५.४.८७.। अच्। पुण्यरात्रः॥

स्रंसेः शि कुट् किच्च ॥ १६ ॥

स्रंसतेर्यत्किद्भवति। तस्य कुडागमश्च। धातोः शिरित्ययमादेशः॥ शिक्यं काच इत्यमरः। तत्राहितं। शैक्यं ॥

अर्तेः क्युरुच्च ॥ १७ ॥

अर्तेः क्युच्प्रत्ययो धातोरुत्वं रपरत्वं च। योरनः। उरणो मेषवाचकः॥

हिंसेरीरन्नीरचौ ॥ १८ ॥

हिसि हिंसायां॥ अस्मादीरन्नीरचौ स्यातां। हिंसीरो व्याघ्रदुष्टयोः। प्रत्ययद्वयोपादानं स्वरार्थं ॥

उदि दृणातेरलचौ पूर्वपदांत्यलोपश्च ॥ १९ ॥

दॄ विदारणे॥ अस्मादुत्पूर्वादलच् अच् इत्येतौ प्रत्ययौ स्यातां। पूर्वपदांत्यलोपश्च। उदरं कुक्षिः। पृषोदरः। पृषोदरं मेदुरं पृषदिति भागवृत्तिः। दुरोदरः पाशके। आश्रित्य दुर्गं गिरिकंदरोदरं क्रीडंत्यमुष्मिंस्सततं दरोदरं। देवद्विषो धैर्यविधूतवासवा दारैः समानं रसितार्तवासवा इति यमकात् दरोदरो निरूकार इति गोवर्धनः। तुंदादित्वादुदरिलः। उदरात् ठगाद्यूने। पा° ५. २. ६७.। औदरिकः। फलेग्रहीति। पा° ३. २. २६.। चकारादुदरंभरयश्चकोरा इति मुरारिः। दामन्युदरमस्य। दामोदरः। संज्ञैषा तत्रभवत इति पारायणं। अत्रापि पूर्ववदुभयोपादानं स्वरार्थं ॥

डित्खनेर्मुट्चोदात्तः ॥ २० ॥

खनतेरलचौ। तयोर्डित्वं। धातोर्मुडागमः। तस्योदात्तत्वं च। आगमो मकारः श्रुत्यर्थ एव॥ मुखमास्यं। दिगादित्वात्तत्र भवे यत्। मुख्यं। शाखादित्वान्मुखमिव मुख्यं। प्रजासृजा यतः खातं तस्मादाहुर्मुखं बुधा इति ॥

अमेः सन् ॥ २१ ॥

अम गतौ॥ अस्मात्सन्। अंसः स्कंधविभागयोः। वत्सांसाभ्यां कामबले। पा° ५. २. ९८.। इति लच्। अंसलः। अंसं हारी। पा° ५. २. ६९.। इति कन्। अंसको दायादः। उत्सादिषु वृषदंश इति पाठादञ्। वार्षद आंशः। वृषान् दंदशीति। कर्मण्यण्। पा° ३. २. १.। वृषदंशः। उत्सादिषु समुदा-

याद्जिति के चित्। वार्षदंशः। एवं च विभागभाव्यंशशब्दस्तालव्यशकारवानपि ॥

मुहेः खो मूर् च ॥ २२ ॥

मुहेः खप्रत्ययः। धातोर्मूरादेशः॥ मुह्यतीति मूर्खः प्रसिद्ध एव। दृढादित्वान्मौर्ख्यं। पृथ्वादित्वान्मूर्खिमा। बाहुलकादोनादेशः खस्य न स्यात्॥

नहेर्हलोपश्च ॥ २३ ॥

णह बंधने॥ अतः खो हलोपश्च। नखः प्राणयंगं॥

शीङो ह्रस्वश्च ॥ २४ ॥

शीङः खप्रत्ययो धातोर्ह्रस्वत्वं च। ह्रस्वविधानसामर्थ्याद्गुणाभावः॥ शिखा। शिखा शिखंडिनां चूडा शिखा ज्वालापि कीर्तिता। व्रीह्यादित्वात् शिखावान् संचारिणी दीपशिखेव रात्रौ। ६.६७.। इति रघुः॥

माङ ऊखो मय च ॥ २५ ॥

माङ् माने॥ अस्मादूखप्रत्ययो मयादेशश्च धातोः॥ मयूखः किरणः। मयूखस्त्विट्करज्वालास्वित्यमरः॥

कलिगलिभ्यां फगस्योच्च ॥ २६ ॥

कल संख्याने। गल अदने॥ आभ्यां फक्प्रत्ययः। धातोरकारस्योत्वं। कुल्फः शरीरावयवो रोगश्च॥ गुल्फः पादग्रंथिः॥

स्पृशेः श्वणशुनौ पृ च ॥ २७ ॥

स्पृश संस्पर्शे॥ अतः श्वणशुनौ प्रत्ययौ भवतो धातोश्च पृ इत्ययमादेशः॥ पार्श्वो ऽस्त्री कक्षयोरध इत्यमरः॥ पर्शुरायुधं॥

श्मनि श्रयतेर्डुन् ॥ २८ ॥

श्मन्शब्दो मुखवाचीति स्मृतिः। श्मन्युपपदे श्रयतेर्डुन्। डित्वात् टिलोपः। मुखमाश्रयत इति श्मश्रु। श्मश्रुणी। श्मश्रूणि। श्मश्रु पुंमुखरोमणीत्यमरमाला। आहिताग्न्यादित्वात् जातश्मश्रुः श्मश्रुजातः। सिध्मादित्वात् श्मश्रुलः॥

अश्वादयश्च ॥ २९ ॥

अश्नोतेर्डुन् रुट् च ॥ अश्रु नयनजलं । एवमन्ये ऽपि यथाप्रयोगमूहनीयाः ॥

जनेष्टन् लोपश्च ॥ ३० ॥

जनी प्रादुर्भावे ॥ अतष्टन्प्रत्ययो भवत्यंत्यलोपश्च धातोः । जटा लग्नकचे मूल इत्यमरः । बाहुलकान्नेत्संज्ञा । सिध्मादित्वाज्जटालः । पिच्छिलादित्वाज्जटिलः ॥

अच् तस्य जंघ च ॥ ३१ ॥

तस्य जनेरच्प्रत्ययो जंघादेशश्च धातोः ॥ जंघा प्रसिद्धैव ॥

हन्तेः शरीरावयवे द्वे च ॥ ३२ ॥

देहावयवे वाच्ये ऽच्प्रत्ययो द्वित्वं च धातोः । अभ्यासकार्यं । अभ्यासाच्च । पा० ७. ३. ५५. । इति कुत्वं ॥ जघनमुपस्थोपरिभागः । पश्चान्नितंबः स्त्रीकट्याः क्लीबे तु जघनं पुर इत्यमरः । इवार्थे शाखादित्वाद्यः । जघन्यं गर्हितार्थकमिति शाश्वतः ॥

क्लिशेरन् लो लोपश्च ॥ ३३ ॥

क्लिश्यतेरन्प्रत्ययो लकारलोपश्च ॥ केशः कचः । केशाद्वो ऽन्यतरस्यां । पा० ५. २. १०९. । केशवः । केशिकः । केशी ॥

फलेरितजादेश्च पः ॥ ३४ ॥

फलेरितच्प्रत्ययः । आदेः फकारस्य पकारः । पलितं केशपाकः ॥

कृञादिभ्यः संज्ञायां वुन् ॥ ३५ ॥

एभ्यः संज्ञायां वुन् ॥ करकः करका वृष्टिपाषाणो । नेत्वं क्षिपकादिपाठात् । करको दाडिमे ख्यातः करकः स्यात्कमंडलौ ॥ कटे वर्षादौ । कटको ऽस्त्री वलये सानौ ॥ नॄ नये । नरकं पापस्थानं । नरको नारको ऽपि चेति द्विरूपकोशः ॥ सृ । सरकं गमनं । अलज् भूषादौ । अलकाश्चूर्णकुंतला इत्यमरः । अलकं क्लीबमपि । हस्ते लीलाकमलमलकं । ६६. । इति मेघदूतः । स्वभाववक्राण्यलकानि तासामिति भारविः ॥ कुर शब्दे । कोरकः । कलिका

कोरकः पुमानित्यमरे प्रमादः। यतः क्लीबे ऽपि दृश्यते। विचकार कोरकाणि। ७.२६.। इति माघे नपुंसकत्वात् ॥

चीकयतेराद्यंतविपर्ययश्च ॥ ३६ ॥

कीचको वंशभेदः ॥

पचिमच्योरिच्च ॥ ३७ ॥

पेचकः ॥ मेचकः ॥

जनेररष्ठ च ॥ ३८ ॥

अस्मादरप्रत्ययष्ठश्चांतादेशः ॥ जठरमुदरं। जठरं कठिने ऽपि स्यादित्यमरः ॥

वचिमनिभ्यां चिच्च ॥ ३९ ॥

वच। मन ॥ आभ्यामरश्चित्स्यात् ठश्चांतादेशः। वठरो मूर्खः ॥ मठरो मुनिशौंडयोः। विदादित्वान्माठरः। गर्गादित्वान्माठर्यः ॥

ऊर्जि दृणातेरलचौ पूर्वपदांत्यलोपश्च ॥४०॥

दृ विदारणे ॥ अत ऊर्ज्युपपदे ऽलचौ भवतः पूर्वपदांत्यलोपश्च। उ-र्दरः शूररक्षसोः। स्वरभेदार्थं प्रत्ययद्वयं ॥

कृदरादयश्च ॥४१॥

कृदरादयो ऽच्प्रत्ययांता निपात्यंते ॥ कृदरः कुशूलः ॥ मृदरो व्याधि-र्विलं च ॥ सृदरः सर्पः ॥

हंतेर्युन्नाद्यंतयोर्घत्वतत्वे ॥ ४२ ॥

हंतेर्युन्प्रत्ययः। आद्यावंते च यथाक्रमं घत्वतत्वे भवतः। घतनो मारकः ॥

क्रमिगमिक्षमिभ्यस्तुन्वृद्धिश्च ॥ ४३ ॥

क्रमु। गम्लृ। क्षमूष् ॥ एभ्यस्तुन्नेषां वृद्धिश्च। क्रांतुः पक्षी ॥ गांतुः पथिकः। पथिक इह गांतुर्गतुगातू च यातुरिति वर्णविवेकः। आङ्पूर्वादागांतुरभ्यागतः ॥ क्षांतुर्मर्षकः ॥

हर्यतेः कन्यन् हिर् च ॥ ४४ ॥

हर्य गतिकान्त्योः ॥ अतः कन्यन्प्रत्ययो हिरादेशश्च धातोः । हिरण्यं सुवर्णं ॥

कृञः पासः ॥ ४५ ॥

करोतेः पासप्रत्ययः ॥ कर्पासः सस्यभेदः स्यात् । यस्य तु गुल्फस्य तलात्वं स स्त्रीलिंगो वनौषधिवर्गे पठितः । कर्पासी बदरेति च । अम० २. ४. ४. ४. । बिल्वादित्वात्कार्पासं वस्त्रं परिधत्ते ॥

जनेस्तु रश्च ॥ ४६ ॥

अतस्तुप्रत्ययो रेफश्चांतादेशः ॥ जर्तुः स्याद्योनिहस्तिनोः ॥

ऊर्णोतेर्डः ॥ ४७ ॥

ऊर्णुञ् ॥ अतो डप्रत्ययः । डित्त्वात् टिलोपः । ऊर्णा मेषस्य रोमाणि । ऊर्णायुरिष्यते मेष ऊर्णायुर्मेषकंबलः । मृदुत्वादूर्णेव नाभिरस्येति ङ्यापोरिति । पा० ६. ३. ६३. । ह्रस्वत्वं । अच्प्रकरणे नाभेरुपसंख्यानमित्यच् । ऊर्णनाभः । नाचारेण विना सृष्टिरूर्णनाभेरपोष्यते । न च निःसाधनः कर्ता कश्चित्सृजति किं चन । अत्रोर्णनाभिरिति चिंत्यं ॥

दधातेर्यत् नुट्च ॥ ४८ ॥

डुधाञ् ॥ यत्प्रत्ययः । तस्य नुडागमश्च । दधाति पुष्णाति लोकानिति धान्यं व्रीहिः । धान्यानि प्राणसप्तदशानीति स्मृतिः । कलिंगे तु धाने पोषणे साधुरिति तत्र साधुः । पा० ४. ४. ९८. । इति यता धान्यशब्दो व्युत्पादितः ॥

जीर्यतेः क्रिन् रश्च वः ॥ ४९ ॥

जॄ वयोहानौ ॥ अतः क्रिन्प्रत्ययः । धातो रेफस्य वत्वं । इरादिकार्यं । जिव्रिः स्यात्कालपक्षिणोः । हलि चेति न दीर्घो बहुलवचनात् ॥

मव्यतेर्यलोपो मश्चापतुट् चालः ॥ ५० ॥

मव्य बंधने ॥ अस्मादालप्रत्ययः । धातोर्यकारस्य लोपो मकारश्चांत्यस्य प्रत्ययस्य चापतुडागमः । ममापतालो विषये स्यात् ॥

अतेः कीकन् ॥ ५१ ॥

अत गतौ ॥ अतः कीकन् । अतीक इंदूधूमयोः ॥

तनोतेर्डउः सन्वच्च ॥ ५२ ॥

तनोतेर्डउप्रत्ययः । सन्वद्स्य कार्यं । अभ्यासस्येत्वादिकार्यं । डित्वात् टिलोपः । पृथगुच्चारणाबलाद्गुणो न भवति ॥ तितउश्चालनी स्मृता । तितउ छत्रं । चालनी तितउः पुमानित्यमर प्रमादः । तितउ । तितउनी । तितऊनि । तितउनीति प्रयोगाणां रामदासादौ दृष्टत्वात् । चालनं तितउन्युक्तमिति कोशांतरं ॥

अर्भकपृथुकपाका वयसि ॥ ५३ ॥

एते वयसि निपात्यंते ॥ ऋधु वृद्धौ । अतो वुन् भकारश्चांतादेशः । अर्भकः ॥ प्रथ प्रख्याने । अतः कुकन् संप्रसारणं च । पृथुकः ॥ पिवतेः कन् । पिबतीति पाकः ॥ बालकपर्याया अमी ॥

अवद्यावमाधमार्वरेफाः कुत्सिते ॥ ५४ ॥

एते निपात्यंते कुत्सिते ॥ वदेर्नञि यत् । अवद्यं ॥ अवतेरमः । अवमं ॥ तत्रैव वकारस्य धकारः । अधमं ॥ ऋ गतौ । अतो वन् । अर्वा ॥ रिफतेस्तोदादिकादकारप्रत्ययः । रेफः ॥ कुत्सितपर्याया अमी ॥

लीङ्रीङो ह्रस्वश्च पुट् च तरौ श्लेषणकुत्सितयोः ॥ ५५ ॥

लीङ् श्लेषणे । रीङ् श्रवणे ॥ आभ्यां त र इत्येतौ प्रत्ययौ यथाक्रमं श्लेषणकुत्सितयोरर्थयोः । धातोर्ह्रस्वत्वं पुडागमश्च प्रत्ययस्य ॥ लिप्तं श्लिष्टं ॥ रिप्रं कुत्सितं ॥

क्लिशेरीच्चोपधायाः कन् लोपश्च लो नाम् च ॥ ५६ ॥

क्लिशू विबाधने ॥ अतः कन् । धातोरुपधाया ईत्वं । लकारस्य लोपो नामागमश्चांत्यस्य । कीनाशः कृषके यम इत्यजयकोशः । विधेहि कीनाशनिकेतनातिथिं । १.७३. । इति माघः । ककारानुबंधस्य फलं न दृश्यते ॥

अश्नोतेराशुकर्मणि वरट् ॥ ५७ ॥

अशू व्याप्तौ ॥ अस्मादाशुकर्मणि वरट् । चकारादुपधाया ईत्वं । ईश्वरः

स्वामिशूलिनोः। ईश्वरी स्वामिनी दुर्गा च। स्थेशभासेति। पा° ३.२.१७५.। वरचीश्वरेत्यपि भवति। ईश्वरः शंकरे प्रोक्तः पार्वत्यामीश्वरी चेति शब्दार्णवः। विन्यस्तमंगलमहौषधिरीश्वरायाः। ५.३३.। इति भारविः॥

चतेरुरन् ॥५८॥

चते याचने॥ अस्मादुरन्प्रत्ययः। अकार उच्चारणार्थः। चतुः संख्यावाचकः। चतुरनडुहोरामुदात्तः। पा° ७.१.९८.। इत्याम्। चत्वारः। चत्वारि। त्रिचतुरोः स्त्रियामिति। पा° ७.२.९९.। चतस्रः॥

प्राततेररन् ॥५९॥

अस्मात् प्रपूर्वादरन्। अकार उच्चारणार्थः॥ प्रातः प्रत्यूषः॥

अमेस्तुट् च ॥६०॥

अमेररन्। तस्य तुडागमः॥ अंतर्मध्यं॥

दहेर्गो लोपो दश्च नः ॥६१॥

